

# गद्यं चम्पू च

COURSE CODE: M23SN06DC

Discipline Core Course

Postgraduate Programme

Sanskrit Language and Literature

SELF LEARNING MATERIAL

SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# गद्यं चम्पू च

Course Code: M23SN06DC

Semester - II

## Discipline Core Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

SGOU

# गद्यं चम्पू च

**Course Code: M23SN06DC**

**Semester - II**

**Discipline Core Course**

**MA Sanskrit Language and Literature**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-971228-9-7

9 788197 122897

# DOCUMENTATION

## Academic Committee

Dr. Shyla C.A.
Prof. M. S. Muraleedharan Pillai
Dr. J.P. Prajith
Dr. N.K. Sundareswaran
Dr. Chandrashekaran Nair
Prof. C.S. Sasikumar
Dr. K. M. Sangameshan
Dr. Sreejith T.G.
Dr. K.Unnikrishnan

## Development of the Content

Dr. Jothilekshmi M.

## Review

Content : Dr. G. Sahadevan
Format : Dr. I.G. Shibi
Linguistics : Dr. G. Pushpangadan

## Edit

Dr. G. Sahadevan

## Scrutiny

Dr. Jothilekshmi M., Dr. Vijayarajan K.U.

## Co-ordination

Dr. I.G. Shibi and Team SLM

## Design Control

Azeem Babu T.A.

## Cover Design

Jobin J.

## Production

September 2024

## Copyright

© Sreenarayanaguru Open University 2024

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P. 01-09-2024

# CONTENTS


BLOCK - 1 गद्यचम्पूसाहित्यसामान्यपरिचयः 1

UNIT - 1 काव्यभेदाः - पद्यगद्यमिश्रम् - गद्यसाहित्यम् - सुबन्धोः वासवदत्ता, दण्डिनः दशकुमारचरितम्, बाणभट्टस्य कादम्बरीहर्षचरितञ्च 2

UNIT - 2 चम्पूकाव्यानि - नलचम्पू ,भारतचम्पू , रामायणचम्पू, केरलीयप्रबन्धाः - मेलपुत्तूर्नारायणभट्टः 22

UNIT - 3 बाणभट्टः - जीवनवृत्तान्तः रचनाः च 38

UNIT - 4 भोजराजः - जीवनकालः कृतयः च 48

BLOCK - 2 कादम्बरी - शुकनासोपदेशः 56

UNIT - 1 'समुपस्थितयौवराज्याभिषेकं च तम्' इत्यारभ्य 'राज्यविषविकारतन्द्राप्रदाराजलक्ष्मीः' पर्यन्तम् 57

UNIT - 2 'आलोकयतु तावत्' इत्यारभ्य 'पतितमपि आत्मानं नावगच्छन्ति' पर्यन्तम् 74

UNIT - 3 'अपरे तु स्वार्थनिष्पादनपरैः' इत्यारभ्य 'भ्रातरः उच्छेद्याः' पर्यन्तम् 100

BLOCK - 3 भोजस्य रामायणचम्पू बालकाण्डे ताटकावधान्तो भागः। (1- 52 श्लोकाः) 113

UNIT - 1 आदितः रावणवृत्तान्तपर्यन्ता कथा 114

UNIT - 2 यागानुष्ठानेन रामादीनां जन्मवृत्तान्तः 151

UNIT - 3 विश्वामित्रागमनं वनयात्रा च 170

UNIT - 4 ताटकावृत्तान्तः 183

BLOK - 4 रामायणचम्प्वोः बालकाण्डस्य अवशिष्टः भागः (53- 110 श्लोकाः) 203

UNIT - 1 कौशिकवृत्तान्तः 204

UNIT - 2 भागीरथीकथा 212

UNIT - 3 अहल्यावृत्तान्तः 236

UNIT - 4 सीतास्वयंवरः 247

Model Question Paper (SET – A) 274

Model Question Paper (SET – B) 276

# गद्यचम्पूसाहित्यसामान्यपरिचयः

# BLOCK - 1

SGOU

# UNIT 1

# काव्यभेदाः - पद्यगद्यमिश्रम् - गद्यसाहित्यम् - सुबन्धोः वासवदत्ता, दण्डिनः दशकुमारचरितम्, बाणभट्टस्य कादम्बरीहर्षचरितञ्च

## Learning Outcomes

- काव्यप्रकारान् अवगच्छति।
- गद्यसाहित्यपरिचयः।
- गद्यकाव्यानि परिचाययति।
- गद्यकाव्यकारान् परिचाययति।

## Background

सहितस्य भावः साहित्यम् इति व्युत्पत्तिबलेन साहित्यमिति शब्दस्य द्वावर्थौ स्तः। प्रथमस्तु 'शब्दार्थयोः संयोगः' द्वितीयस्तु 'हितेन सह'। अर्थात् मानवहितस्य सम्पादनम्। व्यापकार्थे साहित्यस्य द्वौ विभागौ कर्तुं शक्यते। प्रथमः काव्यं, द्वितीयः शास्त्रम्। अस्मिन् शास्त्रे काव्य - व्याकरण - दर्शन - नीति - रस - अलङ्कार-पुराण-इतिहासादीनां सर्वे विषयाः सन्निहिताः भवन्ति। अतः तस्य नाम साहित्यम्। यद्यपि सर्वेषां विषयाणां समावेशः साहित्ये क्रियते तथापि 'काव्यादिलक्षितपदबन्धः एव साहित्यम्' इत्यवबोधः। संस्कृतसाहित्यं भाण्डारः सागरतुल्यम्। संस्कृतवाङ्मये अस्माभिः बहुविधानि कविकर्माणि परिलक्ष्यन्ते। परन्तु कवेः कृतिरियं कीदृशी, तद्विषये सम्यक् परिचयः नैव जायते। कुत्रचित् दृश्यते केवलं गद्यरूपं, कुत्रचित् गद्यपद्योभयात्मकं, कुत्रापि वा केवलं पद्यमयम्। अतः

पठितॄणां मनसि संशयः नितरां वर्तते। अतः अस्मिन् एकके पठितॄणां बोधसौकर्याय किं नाम काव्यं, काव्यभेदाः के, गद्यसाहित्यपरिचयः, गद्यसाहित्ये प्रसिद्धाः साहित्यकाराः तेषां ग्रन्थाः के इत्यादिविषयान् अधिकृत्य प्रतिपाद्यन्ते।

## Keywords

काव्यभेदाः, श्रव्यकाव्यम्, दृश्यकाव्यम्, गद्यम्, पद्यम्, मिश्रं, चम्पूः, कथा, आख्यायिका, सुबन्धुः, वासवदत्ता, दण्डिः, दशकुमारचरितम्, बाणभट्टः,कादम्बरी, हर्षचरितम्।

## Discussion

संस्कृतसाहित्ये काव्यानां अद्वितीयं स्थानमस्ति। तत्र किं नाम काव्यमिति विचारे 'कवयति इति कविः' तस्य कर्म काव्यम् इति विद्याधरः। 'कौति शब्दयते विमृशति रसभावानिति कविः'। तस्य कर्म काव्यमिति भट्टलोट्टटः। 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति काव्यप्रकाशकारः' मम्मटभट्टः। प्रतिभावान् कविः। प्रतिभा तु

**प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता**
**तदनुप्राणनाज्जीवेत् वर्णनानिपुणः कविः।।**

तस्य कर्म काव्यमिति भामहाचार्यः। एवं आचार्यवरैः कविभिः काव्यलक्षणानि उक्तानि।

### 1.1.1 काव्यभेदाः

संस्कृतसाहित्यकाराः काव्यस्य भेदाः द्विधा विभक्ता। 'वाक्यं रसात्मकं

काव्यम्' इति विश्वनाथाचार्यः काव्यस्य लक्षणं दत्वा काव्यं द्विधा विभक्ता। यथा - दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।

लोके यानि काव्यानि प्राप्यन्ते तानि स्वस्ववैशिष्ट्यात् काव्यभेदेषु स्वस्वकोटौ तेषाम् अन्तर्भावः भवति। तेषां भेदाः अधः दीयन्ते। बहुविधानि काव्यानि सन्ति चेदपि स्वरूपानुसारं मूलतः काव्यस्य भेदद्वयं-श्रव्यकाव्यं, दृश्यकाव्यं च।

दृश्यकाव्यं, श्रव्यकाव्यं

### 1.1.2 श्रव्यकाव्यम्

यस्य काव्यस्य रसास्वादनं अन्येभ्यः श्रुत्वा अथवा स्वयं पठित्वा भवति तत् काव्यं श्रव्यकाव्यम् उच्यते। यथा रामायणम् महाभारतम् इत्यादयः। श्रव्यकाव्यस्य अपि बहवः भेदाः वर्तन्ते। ते क्रमशः दीयन्ते।

#### 1.1.2.1 महाकाव्यानि

महाकाव्यं सर्गैः निबद्धं भवति। तत्र अष्टाधिकसर्गाः अवश्यमेव भवेयुः। महाकाव्ये धीरोदात्तादिगुणयुक्तः नायकः भवति। शृङ्गारवीरशान्तकरुण-रसेषु एकः रसः मुख्यः भवति, तथा अन्ये रसाः तस्य अङ्गभूताः भवन्ति। काव्यस्य उपजीव्यम् ऐतिहासिकम् अथवा सज्जनाश्रितं भवति। महाकाव्यस्य फलं चतुर्वर्गेषु एकं भवति। लज्जास्पदविषयस्य महाकाव्येषु वर्णना न क्रियते। महाकाव्यस्य उदाहरणं यथा रघुवंशम्, कुमारसम्भवम् इत्यादयः।

#### 1.1.2.2 शास्त्रकाव्यानि

पदप्रयोगस्य व्याकरणनियमानां ज्ञानाय अन्यशास्त्रीयज्ञानस्य सौलभ्याय च यानि काव्यानि प्रणीतानि तानि शास्त्रकाव्यानि उच्यन्ते। यथा - भट्टिकाव्यम्, रावणार्जुनीयम् इत्यादयः।

#### 1.1.2.3 देवकाव्यानि

यथा शास्त्रकाव्यानि शास्त्रीयतत्त्वप्रख्यापनबुद्ध्या विरचितानि, तथैव प्रधानतया देवतानां कीर्तिः गातुं यानि काव्यानि रचितानि तानि देवकाव्यानि इति अभिधीयन्ते। माघ-कुमारसम्भवादीनि यथा कवित्वप्रदर्शनाय विरचितानि प्रतीयन्ते न तथा देवतानां कीर्तिः वर्णयितुम्। अतः तानि न देवकाव्यानि। देवकाव्यानि तान्येव यत्र देवकीर्तानां प्राधान्यं भवति। यथा - भिक्षाटनकाव्यम्, शिवलीलार्णवः इत्यादि।

### 1.1.2.4 खण्डकाव्यानि

महाकाव्यस्य एकदेशानुसारि खण्डकाव्यं भवति। महाकाव्ये हि एकस्य एकाधिकानां वा नायकनायिकानां समग्रमेव जीवनं चित्रितं भवति। खण्डकाव्ये तु तस्य एकदेश एव चित्रितो भवति। तेन खण्डकाव्यं हि वस्तुतो लघुकाव्यमेव। यतो हि यत्र महाकाव्ये जीवनस्य समग्रतायाः प्रसारः तत्र खण्डकाव्ये जीवनस्य एकस्य एव पक्षस्य तन्मयता भवति, तेन हि खण्डकाव्यम् आकारेण प्रकारेण च महाकाव्यात् लघुतरं तु भवत्येव। अपि च महाकाव्ये जीवनस्य एकाधिकमपि पक्षं प्रस्तौतुं शक्यते, खण्डकाव्ये तु एक एव पक्ष उन्नीयते, अधिकतया प्रस्तूयते। अतो विस्तृतकलेवरात् महाकाव्यात् लघुकलेवरं हि खण्डकाव्यम्। तस्य समधिकमेव लालित्यं माधुर्यञ्च भवति।

खण्डकाव्यं हि मुख्यतश्चतुर्विधं दृश्यते शाङ्गारिकम्, धार्मिकम्, नैतिकं साङ्ग्रहिकञ्च। प्रथमोऽपि भेदः गीति-प्रस्तुति-स्फुटभेदेन त्रिविधः। द्वितीयो हि स्तुतिकाव्यमेव। तृतीयस्तु नीतिपरकः (स एव उपदेशपरकः इति कथ्यते), अन्योक्तिरूपश्च। चतुर्थभेदस्तु सङ्ग्रहपरकः सुभाषितसङ्ग्रहः कोषश्च अस्य भेदौ। क्वचित् च सर्वेषामेव पक्षाणां मिश्रणमपि दृश्यते।

### 1.1.2.5 यमककाव्यानि

यथा शास्त्रकाव्यं देवकाव्यं च पृथक् वर्गभेदे स्थापितं तथैव यमककाव्यं श्लेषकाव्यञ्चापि पृथग्वर्गः अर्हत इति प्रथमं यमककाव्यानि ततः श्लेषकाव्यानि च दृश्यन्ते।

यमकानि बहुविधानि रीतिग्रन्थेषु दृश्यन्ते तत्र कविभिः अत्यन्तमात्रायाम् इमानि समादृतानि कालिदासादिभिः। कतिपयेषु स्वल्पकाव्येषु तेषामादरं तानि प्रयुज्य कृतवन्तस्तत्र साफल्यमलभन्त च। दण्डिना स्वीये काव्यादर्शे यमकं विस्तरेण प्रपञ्चितम्। द्विसन्धाननामकं किमपि काव्यमपि तादृशं दण्डिना स्मृतम्। यथा - यमककाव्यम्, कीचकवधम् इत्यादयः।

### 1.1.2.6 श्लेषकाव्यानि

अनेकार्थसंश्रयः श्लेषः । श्लेषप्रधानानि काव्यानि अनेकानि। यथा - सन्ध्याकरनन्दिनः रामचरितम्। अत्र काव्ये पालवंशोद्भवस्य रामपालस्य भगवतो रामस्य च वर्णनं श्लेषमयभाषयाऽकारि। वंगदेशस्य मध्युयुगीनम् इतिहासं ज्ञातुमिदं काव्यमुत्तमं साधनम्।

### 1.1.3 दृश्यकाव्यम्

यस्य काव्यस्य रसास्वादनं काव्यस्य अभिनयदर्शनेन, अभिनेतॄणां वार्तालापस्य श्रवणेन भवति तत् काव्यं दृश्यकाव्यम् उच्यते। यथा - अभिज्ञानशाकुन्तलम्। दृश्यकाव्यस्य भेदद्वयं वर्तते। रूपकं उपरूपकं च।

### रूपकम्

रूपाणां रामादिस्वरूपाणाम् आरोपात् वेषाभिनयाभ्यां तदारोपस्य बोधनात् रूपकमुच्यते। रूपकाणि दश।

नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः इति दशरूपकाणि।

**उपरूपकम्**

रूपकवत् आचरति व्यभिचरति तद् उपरूपकम्। उपरूपकस्य अष्टादश प्रकाराः सन्ति। नाटिका, त्रोटकम्, गोष्ठी, सट्टकम्, नाट्यरासकम्, प्रस्थानकम्, उल्लाप्यम्, काव्यम्, प्रेङ्खणम्, रासकम्, संलापकम्, श्रीगदितम्, शिल्पकम्, विलासिका, दुर्मल्लिका, प्रकरणिका, हल्लीशः, भणिका च भवन्ति।

**गद्यपद्यमिश्रम्**

गद्यं, पद्यं, मिश्रम्

उपर्युक्तं काव्यभेदाः काव्यस्य स्वरूपदृष्ट्या विहिताः। शैल्यानुसारं पुनः काव्यं त्रिधा विभक्तम्। गद्यकाव्यं, पद्यकाव्यं, मिश्रकाव्यं च।

**गद्यम्**

पादरहितः पदसमूहः गद्यम्। गद्यस्य द्वौ भेदौ - कथा आख्यायिका चेति।

**पद्यम्**

पद्यं चतुष्पदी। पुनः पद्यं वृत्तं जाति इति भेदेन द्विधा विभक्तम्। गद्यकाव्यस्य मुक्तकं कुलकं कोषः सङ्घातः इति भेदाः सन्ति।

**मिश्रम्**

गद्यपद्यतया दृश्यकाव्यानि मिश्रकाव्यानि नाटकानि। गद्यपद्यप्रचुरं काव्यं चम्पूकाव्यम्। गद्य-पद्य-मिश्रात्मकं काव्यं पुनः संस्कृतं-प्राकृतं-अपभ्रंशं मिश्रं इति चतुर्धा काव्यशास्त्रज्ञाः विभजन्ति।




## गद्यसाहित्यम्

अपादः पदसन्तानो गद्यम्

संस्कृतभाषायाः साहित्ये गद्यस्य प्रयोगोऽतीव प्राचीनकालतो दृश्यते। तदात्वे गद्यस्याधिकं महत्वं स्वीक्रियते स्म। गद्यशब्दस्य व्युत्पत्तिः गद् व्यक्तायां वाचि इति धातोः 'गदमदचरयमश्चानुपसर्गे' इति सूत्रेण यत् प्रत्यये सति गद्यम् इति शब्दः निष्पन्नो भवति। यस्य च अर्थः भवति 'स्पष्टं कथनम्' इति। 'पादशून्या पदसंरचना एव गद्यमिति'। समग्रे वेदसाहित्ये पद्येन सह गद्यस्यापि स्थानं विद्यते। गद्यमिदं सरलं समासरहितं भूत्वा सुबोधकमस्ति। कुत्रचित् गद्येऽस्मिन् उपमारूपकादीनाम् अलङ्काराणां च प्रयोगः विहितः। वैदिकगद्यं सरलं स्पष्टं च विद्यते। ततः वेदाङ्गेषु, आयुर्वेदादिग्रन्थेषु, सूत्रवाङ्मये च गद्यस्य प्राधान्यम् अस्ति।

'अपादः पदसन्तानो गद्यम्' इति-दण्डिना उक्तम्। 'गद्यं कवीनां निकषं वदन्ति' इति श्रुतिः। 'वृत्तबन्धोऽज्झितं गद्यम्' इति आचार्यविश्वनाथः।

आंगलभाषायां गद्यम् (prose) प्रोज़ इति शब्देन ज्ञायते। प्रोज़ शब्दस्यार्थः भवति- 'स्पष्ट-सरल-अनलंकृत-भाषायां कथनम्' इति।

**गद्यस्य लक्षणम्** - 'ओजस्समासभूयस्त्वमेतद् गद्यस्य जीवितम्'। ओजो गुणसम्पन्नत्वं, समासबाहुल्यं गद्यकाव्यस्य लक्षणम्।

कथा,
आख्यायिका

**गद्यप्रभेदौ -**

गद्यस्य प्रधानतया द्वौ भेदौ।

(1) कथासाहित्यम्-एतत् लेखकस्य कल्पनासु आधारितं भवति।

(2) आख्यायिकासाहित्यम् - एतत् ऐतिहासिकतथ्याधारितं भवति।

तत्र **कथा** -

**कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।**
**क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापरवक्त्रके।**
**आदौ पद्यैर्नमस्कारः खलादेर्वृत्तिकीर्तनम्।। इति।**

यथा-कादम्बर्यादिः।

**आख्यायिका-**

**आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम्।**
**अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित्॥**

**कथांशानां व्यवच्छेद आश्वास इति कथ्यते।**
**आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्।**

**अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्।। इति।**

यथा - हर्षचरितम्।

गद्यसाहित्यस्ये प्रसिद्धाः केचन ग्रन्थाः -

(1) सुबन्धोः - वासवदत्ता।

(2) बाणभट्टस्य - हर्षचरितम्-कादम्बरी च।

(3) दण्डिनः -अवन्तिसुन्दरकथा - दशकुमारचरितम् च ।

(4) धनपालस्य - तिलकमञ्जरी ।

(5) वादीभसिंहस्य-गद्यचिन्तामणिः ।

(6) मेरुतुंगाचार्यस्य-प्रबन्धचिन्तामणिः ।

(7) राजशेखरस्य - प्रबन्धकोशः ।

(8) वामनभट्टयाणस्य-वेमभूपालचरितम् ।

(9) वल्लालसेनस्य-भोजप्रबन्धः ।

(10) महाकवि वरददेशिकस्य-गद्यरामायणम् ।

(11)महाकविविश्वेश्वरपाण्डेयस्य मन्दारगञ्जरी ।

(12) अम्बिकादत्तव्यासस्य-शिवरावविजयः ।

(13) ऋषिकेश भट्टाचार्यस्य - प्रबन्धमञ्जरी ।

(14) पण्डित क्षमारावस्य कथापत्रकम् ग्रामज्योतिः, कथामुक्तावलं ।

(15) राजगोपालस्य-शैवालिनी, कुमुदिनी ।

(16) कृष्णमाचार्यस्य-मन्दारवती ।

(17) आचार्यमेधाव्रतस्य -कुमुदिनीचन्द्रः ।

(18) आचार्यश्रीशैलस्य -मेनका ।

(19) नृसिंहाचार्यस्य -सौदामिनी ।

(20) भट्टमधुरानाथशास्त्रिणः भारती, संस्कृतरत्नाकरश्च ।

(21) शैलताताचार्यस्य दुर्गेशनन्दिनी ।

(22) हरिचरणभट्टाचार्यस्य-कपालकुण्डला ।

(23) वामनकृष्णचित्तलस्य- श्लोकमान्यतिलकचरितम् ।

(24) वेङ्कटेशवातनसोवानि कवेः- शिवाजी प्रबन्धः ।।

(25) मङ्गलदेवशास्त्रिणः - प्रबन्धप्रकाशः। एवम् आधुनिकसाहित्यं विविधं विपुलं च वर्तते। संस्कृतपत्रपत्रिकाणां योगदानमपि महत्वपूर्णमस्ति।

**संस्कृतगद्यस्य विशेषताः -**

1. स्वातन्त्र्येण प्रयोगः।
2. भाषायाः प्रकृतिकं स्वरूपमेव गद्यम्।
3. गद्यम् अनियतवर्णावसानम्।
4. भाषायाः स्वाभाविकी गतिः तद् गद्यम्। गद्यादेव पद्यसम्भवः।
5. भाषितभाषया सह गद्यं निकटं वर्तते।

गद्यस्य अनेके भेदाः सन्ति।

(1) कथा - ऐतिहासिककथाः, पौराणिककथाः, नैतिककथाः, काल्पनिककथाः, विनोदपूर्णकथाः।

(2) जीवनचरित्रम्।

(3) वैज्ञानिकाविष्काराः।

(4) वर्णनम्, प्राकृतिकदृश्यम्।

(5) विचारात्मक - निबन्धाः।

(6) प्राकृतिकविषयाः, यथा -जीवजन्तुपशुपक्ष्यादिविषयाः।

(7) पत्रव्यवहारात्मकाः।

(8) विमर्शनात्मकाः - यथा ग्रन्थविमर्श: रचनाविमर्शः, सामाजिकविमर्शः।

(9)मानवव्यवहारात्मकाः- यथा निवासः, आचारव्यवहाराः, नीतिनियमादयः।

(10) यात्रा।

कतिपयान् गद्यग्रन्थान् परिचिनुमः।

**सुबन्धुः वासवदत्ता**

सुबन्धुः - सप्तमशतके

सुबन्धुप्रणीतं 'वासवदत्ता' संस्कृतसाहित्ये नितरां प्राधान्यमर्हति। आख्यायिकाविभागे अयं ग्रन्थः अन्तर्भवति। अस्य ग्रन्थकर्तुः जीवनकालमधिकृत्य चरित्रकारमण्डले विसंवादः वरीवर्ति। तथापि सप्तमशतकस्य आदिभागे जीवितमधारयत् इति चरित्रकाराः। सः मगधराजस्य बिन्दुसारस्य सभापण्डितः आसीत्। सुबन्धुना रचितं ग्रन्थं पठितुं राज्ञा बिन्दुसारेण न शशाक। सः राजा गद्यकाव्यं सरलीकर्तुं कविं प्रार्थितवान्। किन्तु काव्यस्य मौलिकता विनष्टा भवेत् इति चिन्तया राज्ञः अभ्यर्थनां कविः न मानितवान्। अतः राजा राज्यात् तं निष्कासितवान्। कौशाम्बीं प्राप्तं तं वत्सेशराजः स्वीचकार इति श्रूयते। सुबन्धुः बाणभट्टस्य पूर्विकः। बाणभट्टः हर्षचरिते एवं सूचयति -

**कवीनामगलद्दर्पो नूनं वासवदत्तया।**
**शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ।।इति।**

वासवदत्तायाः कन्दर्पकेतोः च प्रेमकथा

वासवदत्ताग्रन्थे वासवदत्तायाः कन्दर्पकेतोः च प्रेमकथां वर्णयति। नायकः कन्दर्पकेतुः स्वप्ने कुसुमपुरराजकुमारीं वासवदत्तां पश्यति। तस्याः सौन्दर्ये आकृष्टः सः मकरन्देन सह चलति। देशान्तरं सञ्चरन्नसौ विन्ध्याचलं प्राप्नोति। अत्रान्तरे वासवदत्ता स्वप्ने कन्दर्पकेतुं दृष्ट्वा तस्मिन् आकृष्टचित्ता बभूव। सा कामदेवतुल्यं तमन्वेष्टुं काञ्चन सारिकां प्रेषयति। विन्ध्याटव्यां शुकसारिकयोः संवादमाकर्ण्य कन्दर्पकेतुः वासवदत्ताप्रेमं ज्ञात्वा कुसुमपुरं गच्छति। राजकुमारीं दृष्ट्वा तौ मायाश्वमारुह्य इतस्ततः सञ्चार्य विन्ध्याटवीं प्राप्नुवतः। तत्र तयोः विश्रमवेलायां निद्रावशं कन्दर्पकेतुं विहाय वनशोभया आकृष्टा वासवदत्ता कियन्मात्रदूरं अगच्छत्। तां किराताः अपहृतवन्तः। तस्याः प्राप्त्यर्थं किराताः कलहायमाने अवसरे वासवदत्ता पलायते। सा तु स्त्रीनिषिद्धं मुनेराश्रमं प्रविश्य शिलारूपेण परिणतिं प्राप।

निद्रातः विमुक्तः कन्दर्पकेतुः वासवदत्तामदृष्ट्वा अन्वेषणाय यतते। अन्ते तामेव शिलां स्पृशति। तत्स्पर्शनमात्रेण वासवदत्ता स्वकीयं पूर्वशरीरं प्राप्नोति। मकरन्दोऽपि तत्रैवागच्छति। ते स्वपुरं गत्वा ससुखमवसन्।

अस्य ग्रन्थस्य प्राधान्यमधिकमेव। सुबन्धुः वक्रोक्तिकथने श्लेषे च सर्वातिशयं महत्वमावहति। कविनानेन अनुप्रासश्लेषोपमाद्यलङ्काराः प्रयुक्ताः। सोऽयं कविः

**सरस्वतीदत्तवरप्रसादाच्चक्रे सुबन्धुः भुवनैकबन्धुः।**
**प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम्॥**

सुबन्धुरचनायाम् अतीव सुन्दरा स्वरमाधुरी वर्तते। अपूर्वा च वर्णनाचातुरी दृश्यते। कवीनां अग्रणीं गणयन्ति तम्। गद्यकाव्यस्य आद्यः रचयिता महाकविः च सुबन्धुरेव। तस्यैवोच्छिष्टं सर्वं संस्कृतगद्यसाहित्यम्।

**दण्डी - दशकुमारचरितम्**

दण्डी - सप्तमशतके

संस्कृतशास्त्रमण्डले कविमण्डले च विश्रुतः आसीत् दण्डी। क्रिस्त्वब्दे सप्तमे शतके सः स्वजीवितेनेमं लोकं पावयामास। तेन विख्याताः त्रयः ग्रन्थाः रचिताः। शास्त्रमण्डले विश्रुतमेव तस्य काव्यादर्शः नाम ग्रन्थः। दशकुमारचरितं नामकं गद्यग्रन्थः संस्कृतगद्यसाहित्ये नितरां प्रसिद्धः। अपरः कश्चन प्रसिद्धः ग्रन्थतल्लजं भवति अवन्तिसुन्दरीकथा। तस्य महत्वं सूचयति अयं श्लोकः।

**जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।**
**कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।। इति।**

दशकुमाराणां पुरुषपराक्रमवर्णना

कौशिकगोत्रे सञ्जातः कश्चन ब्राह्मणः आसीत् दण्डी। दण्डी इति नाम यथार्थं वा न वेति संशयः इदानीमवशिष्यते। दशकुमारचरितस्य मङ्गलाचरणे 'ब्रह्माण्डच्छात्रदण्डः शतधृतिभावनाम्भोरुहो नालदण्डः' इति श्लोके पुनः पुनरपि दण्डशब्दस्य प्रयोगे दण्डी इति नाम प्राचलत् इति कांश्चन कथां श्रूयते। अवन्तिसुन्दरीकथायां काचन सूचना वर्तते यत् विदुषः नारायणस्वामिनः पुत्रः आसीत् भारविः (किरातार्जुनीयस्य कर्ता)

इति। तस्य पुत्रत्रये मध्यमः एव आसीत् मनोरथः। मनोरथस्य चतुर्षु पुत्रेषु अन्यतमः आसीत् वीरदत्तः। अयं वीरदत्तः आसीत् दण्डिनः पिता। माता गौरी इति।

दशकुमारचरितं दण्डिनः प्रथमं गद्यकाव्यम्। तस्य पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका चेति त्रयः भागाः। दशानां कुमाराणां पौरुषपराक्रमवर्णना अस्य ग्रन्थस्य विषयः। मगधेशराजस्य पुत्रस्य राजवाहनस्य तन्मित्राणां नवानां सञ्चारः देशाटनानुभवाः सम्यक्तया अस्मिन् ग्रन्थे वर्णयति।

दण्डिनः कल्पना उदात्ता प्रसादमधुरा भावगर्भिता च। प्रसादमधुराणि वचांसि हृदयाह्लादकानि भवन्ति। सर्वालङ्कारप्रयोगे सः प्रवीणः सन्नपि अनुप्रासमयपदविन्यासे नितरां तात्पर्यं दृश्यते। अपि च अस्मिन् गद्यकाव्ये नानाविधाः रोमाञ्चकारिण्यः घटनाः सन्ति। ग्रन्थस्यास्य मुख्यः रसस्तु वीर एव। किन्तु प्राधान्यम् अद्भुतस्यैव।

टीकाः - पददीपिका, पदचन्द्रिका, बालबोधिनी

दशकुमारचरितस्य अनेकाः टीकाः सन्ति। पूर्वपीठिकायाः टीका भवति पददीपिका। कवीन्द्राचार्यसरस्वतिना रचिता पदचन्द्रिका नाम टीका मध्यभागस्य दशकुमारचरितस्य भवति। उत्तरपीठिकायाः टीका न दृश्यते। पूर्वपीठिकायाः मध्यभागस्य च कृते ताराचरणभट्टाचार्यः एकां टीकां रचितवान्। सा भवति बालबोधिनी।

केचन विद्वांसः छन्दोविचितिनामकः वृत्तशास्त्रग्रन्थः दण्डिनः इति मन्यन्ते। एवं तस्याः 'कलापरिच्छेदे रूपमाविर्भविष्यति' इत्युल्लेखात् कलापरिच्छेदः इत्ययमपि ग्रन्थः दण्डिनः इति मन्यन्ते। किन्तु पर्याप्तस्य प्रमाणस्याभावात् एतदुभयग्रन्थावपि दण्डिनः इति वक्तुं न शक्यते। राजशेखरेण सूचितं भवति यत् -

**त्रयोऽग्नयस्त्रयो वेदास्त्रयो गुणाः**
**त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥ इति।**

अतः काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति त्रयः ग्रन्थाः दण्डिना विरचिताः।

### बाणभट्टः - हर्षचरितम्

हर्षवर्धनस्य आस्थानकविः

संस्कृतगद्यसाहित्ये महोन्नतं स्थानमर्हति महाकविः बाणभट्टः। सः हर्षवर्धनमहाराजस्य आस्थानकविरासीत्। सः हर्षवर्धनः स्थाणीश्वरस्य (तानेश्वरस्य) इदानीन्तनस्य कानूज्नगरस्य राजा आसीत्। तस्य भरणकालः ६०६ तः ६४८ पर्यन्तमासीत्। तस्य ग्रन्थतल्लजे आस्तां हर्षचरितं, कादम्बरी च।

बाणभट्टस्य पिता चित्रभानुः, माता राजदेवी चास्ताम्। पिता वात्स्यायनगोत्रे हिरण्यनद्याः तीरे प्रीतिकूटग्रामे जातः आसीत्। इदानीं बीहार् देशे छप्रप्रविश्यायामेव अयं ग्रामः। बाणभट्टस्य चतुर्दशे वयसि पिता ममार। पुनः सः वयस्यैः सह इतस्ततः भ्रमन् अलसजीवितं निनाय। तथापि सः सर्वविद्यापारङ्गतः आसीत्। भ्रमणानुभवाः तस्य काव्यरचनायै साहाय्यकम् अभवत्। पश्चात् कृतोद्वाहः सः स्वस्थो बभूव। तस्य विद्यापाटवं ज्ञात्वा हर्षः तं सभापण्डितत्वेनाङ्गीचकार। एवं पञ्चविंशतिवयस्कः बाणभट्टः श्रीहर्षस्य सभापण्डितः समजायत।

हर्षस्य जीवचरित्रम्

हर्षचरितमेव संस्कृतसाहित्ये आविर्भूतं प्रथमं चरित्रकाव्यम्। हर्षचरिते बाणभट्टः हर्षस्य जीवचरितं लिखितवान्। तस्मिन् अष्टौ उच्छ्वासाः (अध्यायाः) सन्ति। हर्षचरितम् आख्यायिकाविभागे अन्तर्भवति। हर्षचरितस्य प्रथमे द्वितीये च उच्छ्वासे हर्षस्य वंशवर्णना वर्तते। तृतीये उच्छ्वासे हर्षपूर्वजस्य पुष्पभूपतेः वर्णनम्। चतुर्थे प्रभाकरवर्धनस्य शौर्यवर्णनम् अस्ति। अस्मिन्नध्याये एव राज्यवर्धनस्य हर्षवर्धनस्य

राज्यश्रियाश्च जन्मवर्णनाः। राज्यश्रियाः ग्रहवर्मणा सह विवाहः वर्णितः। पञ्चमे उच्छ्वासे राज्यवर्धनस्य हूणविजयार्थगमनं, तथा प्रभाकरवर्मणः वधं च सूचितमस्ति। षष्ठे राज्यवर्धनस्य प्रत्यागमनं, मालवराजेन ग्रहवर्मणः हत्या, राज्यश्रियाः निरोधः च वर्णितः। पुनः राज्यवर्धनः मालवराजं पराजितवान्। किन्तु गौडनरेशः शशाङ्कः राज्यवर्धनं कपटरूपेण जघान। सप्तमे अध्याये हर्षः गौडराजं हन्तुं गमनं, राज्यश्रिया विन्ध्याटव्यां पलायनं, तामन्वेष्टुं हर्षस्य प्रयासः च वर्णितवान्। अष्टमे उच्छ्वासे राज्यश्रिया सह हर्षस्य प्रत्यागमनं वर्णितमस्ति। अपूर्णा इयं कृतिः। कारणं तु राज्ञः हर्षस्य वधमेव भवेत्। बाणोऽपि हर्षवधानन्तरं बहुकालं नैव जीवितः आसीत्।

बाणभट्टस्य जीवितकाले प्रचलितां राष्ट्रीयव्यवस्थां कथमासीदिति ज्ञातुं अनेन ग्रन्थेन शक्यते। अपि च तत्रस्थाः साम्पदिक-सामूहिक-धर्मपराः जीवितरीतयः सुष्टु अवगन्तुं शक्यते। साहित्यदृष्ट्या अयं ग्रन्थः नितरां प्राधान्यमर्हति। श्लेषघटनायां रसाविष्करणे अलङ्कारप्रयोगे अर्थगैरवे कथावर्णनायां च बाणभट्टः कविषु अग्रगण्यः एव।

टीके-
हर्षचरितवर्तिका,
सङ्केता

हर्षचरितवर्तिका नाम टीका रुय्यकः रचितवान्। अपरा टीका भवति शङ्करकविप्रणीता सङ्केता।

**बाणभट्टः - कादम्बरी**

बाणभट्टेन लिखितः कथामयः ग्रन्थः भवति कादम्बरी। सा कृतिः अपि अपूर्णा। कल्पनावैचित्र्येण अलङ्कृता इयं कृतिः संस्कृतसाहित्ये आचन्द्रतारं देदीप्यते।

विशालदेशस्य अधिपः भवति शूद्रकः। तस्य सभायाम् एकदा काचन चण्डालकन्यका पञ्जरस्थं शुकमानीय राज्ञे समर्पयति। तस्य शुकस्य नाम भवति वैशम्पायनः। स शुकः मनुष्यवाचा राजानम् आत्मकथां श्रावयति।

कथायाः अन्ते पूर्वजन्मवृत्तान्तं स्मृत्वा राजा पूर्वजन्मदेहं प्राप्नोति। जन्मत्रयस्य वृत्तान्तम् अस्मिन् ग्रन्थे प्रतिपादयति।

पुण्डरीकस्य त्रयाणां जन्मानां कथा

शुकः स्ववृत्तान्तं श्रावयन् एवं कथयति। यदा सः अजायत तदैव तस्य माता दिवंगता। किञ्चित्कालानन्तरं एकः लुब्धकः पितरं जघान। वृक्षादधः पतितः कथञ्चित् प्राणावशिष्टं तं कश्चन मुनिकुमारः जाबालेः आश्रममानिनाय। जाबालिः तस्य पूर्वजन्मवृत्तान्तं श्रावितवान्। उज्जयिन्यां तारापीडो नाम राजा। तस्य भार्यायां विलासवत्यां चन्द्रापीडो नाम पुत्रः जातः। तारापीडस्य सचिवस्य शुकनासस्य वैशम्पायनः नाम पुत्रः समजनि। अभ्यस्तविद्यं तारापीडं यौवराज्ये अभिषिक्तवान्। शुकनासः चन्द्रापीडं बहूपदेशं दत्तवान्।

एकदा युवराजः चन्द्रापीडः मन्त्रिपुत्रेण वैशम्पायनेन सेविकया पत्रलेखया च सह दिग्विजयायागच्छत्। यात्रान्ते महाश्वेतां ददर्श। महाश्वेता पुण्डरीकवृत्तान्तं श्रावयित्वा तं कादम्बरीवृत्तान्तमपि अकथयत्। कादम्बरीचन्द्रापीडौ परस्परानुरागिणौ अभवताम्। एतस्मिन् समये पितुराज्ञया चन्द्रापीडः उज्जयिनीं प्रत्यागतः। पुनः पत्रलेखा प्रत्यागत्य कादम्बरीविरहावस्थां चन्द्रापीडाय न्यवेदयत्।

बाणः कादम्बर्याम् एतावान् भागः रचितः। शिष्टा कथा बाणपुत्रः भूषणभट्टः लिखितवान्। बाणरचितः भागः कथायाः पूर्वार्धः स्मृतः। भूषणभट्टगुम्भितभागः उत्तरभागः भवति।

कादम्बर्याः विरहव्यथां पत्रलेखातः सविस्तरं श्रुत्वा तस्याम् आकृष्टमनाः चन्द्रापीडः महाश्वेताशापेन वैशम्पायनं शुकभूतं श्रुत्वा विरहातुरः प्राणान् उपेक्षितवान्। तन्मृतशरीरं आलिङ्ग्य कादम्बरी आत्महत्यां कर्तुमारभत। तदा भविष्यत्समागमसन्देशेन नभोवाणी तां मरणात् निवारयामास। सरसि इन्द्रायुधोऽप्यगाहत। ततश्च कपिञ्जलो बहिरागत्य सर्वं रहस्यं श्रावयति।

कादम्बरी टीकाः- कल्पलता, चन्द्रकला,चन्द्रकला

कादम्बरीमधिकृत्य अनेकाः अर्वाचीनाः टीकाः सन्ति। ताः हरिदाससिद्धान्तवागीशकृता कल्पलता, कृष्णमोहनठक्कुरविरचिता चन्द्रकला, शेषराजशर्मणा रचितायाः टीकायाः नामापि चन्द्रकला इत्यादयः।

यद्यपि बाणभट्टस्य उभौ ग्रन्थौ प्रसिद्धौ तथापि तयोः कादम्बरी प्रशस्ततरा। हि कादम्बर्याः पात्रचित्रणं रसपरिपाकः वस्तुविन्यासः च अतीव मनोहारिणः। उभावपि पाञ्चालीरीत्यां रचितौ स्तः। व्यञ्जनाप्रधानः वक्रोक्तिनिर्भरं च भवति ग्रन्थद्वयमिदम्। हर्षचरितस्य अपूर्णतायां हर्षस्य निधनं चेत् कादम्बर्याः अपूर्णतायां कवेरेव मरणं हेतुः भवति।

बाणभट्टेन अस्पृष्टं किमपि वस्तु न दृश्यते। उक्तं च 'बाणोच्छिष्टं जगत्सर्वम्' इति। संस्कृतकथासाहित्ये नवः युगः बाणेन आरब्धः। श्लाघ्यमेव तस्य वर्णनापाटवम्। कविना बाणेन सूचितमेव यत्

**नवोऽर्थो जातिरग्राम्याऽक्लिष्टः स्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्।। इति**

चण्डीशतकं, शिवाष्टकं, शारदचन्द्रिका, पार्वतीपरिणयः

बाणेन रचिताः कृतयः भवन्ति चण्डीशतकम्, शिवाष्टकम्, शारदचन्द्रिका (नाटिका) पार्वतीपरिणयः (नाटकम्) च। चण्डीशतके शतश्लोकैः देवीं स्तौति। शैवधर्मावलम्बितत्वात् शिवाष्टकस्य कर्ता बाणेति कार्ये न सन्देहः। किन्तु मुकुटताडिकस्य शारदचन्द्रिकाया च कार्ये चरित्रकाराः पण्डिताः भिन्नाभिमतं प्रकटयन्ति।

कादम्बरीमुपजीव्य द्वौ ग्रन्थौ प्रसिद्धौ स्तः। एकस्तु मञ्जुनाथस्य कादम्बरीसारः, अपरस्तु गौडाभिनन्दस्य कादम्बरीकथासारः च।

## Summarised Overview

संस्कृतसाहित्ये काव्यानां अद्वितीयं स्थानमस्ति। संस्कृतसाहित्यस्य स्वरूपानुसारं काव्यं द्विधा विभज्यते दृश्यकाव्यं श्रव्यकाव्यं चेति। शैल्यनुसारं काव्यं त्रिधा विभज्यते पद्यं, गद्यं, मिश्रं (चम्पू) च। 'ओजस्समासभूयस्त्वमेतद् गद्यस्य जीवितम्'। गद्यम् तु द्विधा। कथा आख्यायिका चेति।

सुबन्धुप्रणीतं 'वासवदत्ता' संस्कृतसाहित्ये नितरां प्राधान्यमर्हति। सुबन्धुः संस्कृतसाहित्ये प्रसिद्धः कविः भवति। गद्यसाहित्ये तेन रचितः वासवदत्ता इति ग्रन्थः महत्वं प्राप्तम्। मगधराजस्य बिन्दुसारस्य सभापण्डितः सः सप्तमे शतके जीवितमधारयत्। वासवदत्ताग्रन्थस्य प्रतिपाद्यविषयः अस्ति वासदत्तायाः कन्दर्पकेतोः च प्रेमकथा। अस्मिन् गद्यकाव्ये वक्रोक्तिः, श्लेषः, अनुप्रासश्च अलङ्काराणां प्रयोगः द्रष्टुं शक्यते। आद्यः गद्यरचयिता महाकविः च सुबन्धुरेव।

कौशिकगोत्रे सञ्जातः कश्चन ब्राह्मणः आसीत् दण्डी। तेन विख्यातः त्रयः ग्रन्थाः रचिता - दशकुमारचरितं, काव्यादर्शः, अवन्तिसुन्दरीकथा। क्रिस्त्वब्दे सप्तमे शतके सः स्वजीवितेनेमं लोकं पावयामास। दशकुमारचरितं दण्डिनः प्रथमं गद्यकाव्यम्। दशकुमाराणां पौरुषपराक्रमवर्णना अस्य ग्रन्थस्य इतिवृत्तम्। दशकुमारचरितस्य अनेके टीकाः सन्ति। दण्डिनः कल्पना उदात्ता प्रसादमधुरा भावगर्भिता च। प्रसादमधुराणि वचांसि हृदयाह्लादकानि भवन्ति।

हर्षवर्धनमहाराजस्य आस्थानकविः आसीत् बाणभट्टः। सः संस्कृतगद्यसाहित्ये महोन्नतं स्थानमर्हति। तस्य ग्रन्थतल्लजे आस्तां हर्षचरितं कादम्बरी च। हर्षचरितमेव संस्कृतसाहित्ये आविर्भूतं प्रथमं चरित्रकाव्यम्। अस्य ग्रन्थस्य इतिवृत्तं हर्षस्य जीवचरित्रं भवति। अस्य ग्रन्थस्य द्वे टीके स्तः।

बाणभट्टेन रचितं अपरं कथामयः ग्रन्थः भवति कादम्बरी। सा कृतिः अपूर्णा। बाणः कादम्बरीम् पूर्णं न चकार। शिष्टा कथा बाणपुत्रः भूषणभट्टः लिखितवान्। बाणरचितः भागः कथायाः पूर्वार्धः स्मृतः। भूषणभट्टगुम्भितभागः उत्तरभागः भवति। त्रयाणां जन्मनां कथा अत्र प्रतिपादितम्। कादम्बर्याः पात्रचित्रणं रसपरिपाकः वस्तुविन्यासः च अतीव मनोहारिणः। बाणभट्टस्य ग्रन्थौ उभावपि पाञ्चालीरीत्यां रचितौ स्तः। व्यञ्जनाप्रधानः वक्रोक्तिनिर्भरं च भवति ग्रन्थद्वयमिदम्। हर्षचरितस्य

अपूर्णतायां हर्षस्य निधनं चेत् कादम्बर्याः अपूर्णतायां कवेरेव मरणं हेतुः भवति। कादम्बरीमधिकृत्य अनेके टीकाः सन्ति।

## Assignments

1. गद्यसाहित्योद्भवं विकासश्च प्रतिपादयत।
2. किं नाम श्रव्यकाव्यं, तस्य भेदाः के?
3. किं नाम दृश्यकाव्यं तस्यभेदान् विशदयत।
4. अवन्तिसुन्दरीकथामधिकृत्य टिप्पणीं लिखत।
5. हर्षचरितमधिकृत्य लिखत।
6. दशकुमारचरितमधिकृत्य लिखत।
7. गद्यसाहित्यभेदौ कौ ?
8. गद्यसाहित्यस्य विशेषताः काः?
9. 'गद्यं कवीनां निकषं वदन्ति' समर्थयत।

## Suggested Readings


1. Samkritasahityacaritram, Dr.K.Kunjunni Raja and Dr.M.S.Menon, Kerala sahitya Academi ,Thrissur.
2. Dasakumaracaritam of Dandin, Meherchand Lexman das, New Delhi.
3. A Classical History of Sanskrit Literature, R.Krishnamacariar, Motilal Banarsidass, New Delhi.


## References

1. आचार्य लोकमणि दाहालः। संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अकादमी, वारणसी २०१९
2. डा उदयशङ्कर् झा। संस्कृतशिक्षणम्, चौखम्बा सुरभारती प्रकाशन, वारणसी, २०१३

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 2

# चम्पूकाव्यानि - नलचम्पू ,भारतचम्पू , रामायणचम्पू, केरलीयप्रबन्धाः - मेलपुत्तूर्नारायणभट्टः

## Learning Outcomes

- चम्पूकाव्यानां परिचयः।
- चम्पूसाहित्यकारान् परिचाययति।
- केरलीयप्रबन्धान् प्रति अवगाहः।
- मेल्पुत्तूर् नारायभट्टं परिचाययति।

## Background

पूर्वस्मिन् एकके किं नाम काव्यं, काव्यस्य द्वे भेदौ स्तः। ते दृश्यकाव्यं श्रव्यकाव्यं च। शैल्यनुसारं काव्यानि त्रिधा विभक्तानि। तानि पद्यं, गद्यं, चम्पू (मिश्रं)च इत्यादिविषयान् अधीतम्। इदानीं किं नाम चम्पूकाव्यं, तस्य लक्षणं, चम्पूसाहित्यग्रन्थाः के, चम्पूसाहित्यकाराः के इत्यादि विषयान् अवगच्छामः। अपि च चम्पूकाव्यानां प्रबन्धानां च सम्बन्धः, केरलीयप्रबन्धाः, मेल्पुत्तूर् नारायणभट्टमहोदयं च अधिकृत्य अवगच्छामः।

## Keywords

गद्यपद्यमयी, त्रिविक्रमभट्टः, नलचम्पूः, अनन्तभट्टः, भारतचम्पूः, भोजदेवः, चम्पूरामायणम् , प्रबन्धाः, मेल्पुत्तूर् नारायणभट्टस्य प्रबन्धाः, प्रकाशिताः प्रबन्धाः ।

## Discussion

### 2.1.1 चम्पूकाव्यम्

सामान्यतः काव्यस्य भेदद्वयं दृश्यं श्रव्यञ्चेति। श्रव्यकाव्यमपि द्विप्रकारम् गद्यकाव्यं पद्यकाव्यञ्चेति । स्वीययाऽर्थप्रधानतया गद्यकाव्यं गौरवशालि, यतो हि पद्यकाव्यं कियतांशेन रागद्वारापि श्रोतृजनमनांस्याकर्षयति, गद्यकाव्यं तु स्वीयेनार्थगौरवेणैव श्रोतृजनहृदयान्यावर्जयेत्। गद्यकाव्यगतं रसगौरवं पद्यकाव्यगतमर्थगौरवपुरस्कृतं रागमयत्वं चेत्युभयं मिलितं सदधिकं चमत्कारं जनयेदिति भावनैव चम्पूकाव्यस्योत्पत्तौ कारणत्वेन सम्भाव्यते। चम्पूरामायणप्रणेता भोजराजोऽपीममेवार्थमाह -

भोजस्य चम्पूकाव्यलक्षणं

**गद्यानुबन्धरसमिश्रितपद्यसूक्तिहृद्या हि वाद्यकलया कलितेव गीतिः।**
**तस्माद्दधातु कविमार्गजुषां सुखाय चम्पूप्रबन्धरचनां रसना मदीया॥**

गद्यसम्बन्धेन पद्यानि तथैवानन्ददायकानि जायन्ते यथा वाद्ययन्त्रैरुपेतानि गानानि । यथा केवलं गायनं न तथा चमत्कारकारी यथा वाद्योपस्कृतं, तथैव केवलं गद्यं न तथा चमत्कारकारी तथा पद्यमिश्रमिति भावयित्वैव कवयः चम्पूकाव्यान्यसृजन्।

**चम्पूलक्षणम्।**

सर्वप्रथममाचार्यो दण्डी 'गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते' इति

चम्पूलक्षणमुक्तवान्। तदनन्तरभाविनोऽप्याचार्यास्तदेवान्ववदन्। 'गद्यपद्यमयं काव्यं चम्पूः' इति तल्लक्षणे वाणीस्थाने काव्यपदनिवेशेऽपि न कापि नवीनता -

**क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके।**
**आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्॥**

गद्यपद्यमयी चम्पूः

इति लक्षणानुसारेण कथाऽऽख्यायिकयोरपि गद्यपद्यमिश्रितत्वेन चम्पूलक्षणप्रसक्तिस्तु न शङ्कनीया, तयोर्गद्यस्यैव प्राधान्यात्, लक्षणानुरोधेनैव कतिपयपद्यानां तयोः प्रवेशाच्च।

चम्पूकाव्येषु तु गद्यपद्ययोः समानभागः भवति किमप्येकमङ्गमतिपृथुलं न जायेत इत्यस्मिन् अंशे कवयः सतर्कास्तिष्ठन्ति।

**चम्पूकाव्यविकासः**

चम्पूकाव्यं गद्यकाव्यस्यैव परिमार्जितं रूपमिति कथनेन सत्यमुपलभ्यते यद्यपि यजुर्वेदे गद्यपद्ययोर्मिश्रणमुपलभ्यते तथापि नासौ चम्पूप्रकारः। पाली जातकमाला एव चम्पूकाव्यस्यादिमंस्रोत इति वक्तुं शक्यते। हरिषेणस्य प्रयागप्रशस्तौ गद्यपद्यमिश्रणस्य प्राथमिकप्रयोगरूपं मन्तुं शक्यते। यद्यपि जातकमाला हरिषेणस्य प्रयागप्रशस्तिश्च गद्यपद्यमिश्रं प्राग्रूपभूतं शरीरं धारयतस्तथापि चम्पूकाव्येन वास्तविकं दशमशताब्द्यामेव प्रकटितं यदा नलचम्पूः जनिमलभत।

**चम्पूकाव्यानि**

गद्यपद्योभयस्वरूपं काव्यं चम्पूकाव्यम्। चम्पूकाव्ये सामान्यकथनं तु गद्येनैव कथ्यते किन्तु विशेषकथनाय पद्यमाश्रियते। काव्यप्रकारोऽयं बहुशः प्रचलितः सम्मानितश्च दृश्यते विद्वत्समाजे।

सामान्यतस्तु गद्यकाव्येऽपि यत्र तत्र पद्यानामपि समावेशस्तु भवत्येव यथा वासवदत्ता-हर्षचरित-कादम्बरी-दशकुमारचरितप्रभृतिग्रन्थेषु। तथापि तेषां चम्पूकाव्ये गणना नैव कृताऽस्ति। अनेन इदमवधेयं यत्केवलं गद्यपद्यमयरचना नैव चम्पूकाव्यत्वम् आप्नोति किन्तु तत्र गद्यपद्यभागयोः समानभागः अत्यावश्यकः। यत्र हि गद्यं पद्यञ्च यथावश्यकं समानभागव्याप्यत्वेन प्रयुक्तं तदेव काव्यं चम्पूरिति।

काव्यप्रकारोऽयं कदा वा केन प्रारब्ध इति तु नैव ज्ञातमधुनाऽपि। किन्तु एतावत् तु निश्चितमेवं यद् असौ विक्रमपूर्वकालेऽपि लब्धप्रचार आसीत्। प्रथमं हि अस्य रूपं स्मरति आद्यकाव्यशास्त्राचार्यो भामहः। ततश्च रुद्रदाम्नो गिरिसाराभिलेखेऽनेकेषु गुप्तकालीनाभिलेखेषु चास्य स्वरूपमुच्यते। दण्डी तु - 'गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते' ( १/३१ )

चम्पूकाव्यानि

इति नामत एव स्मरति काव्यभेदमिमम्। तथापि चम्पूकाव्यस्य स्वतन्त्रग्रन्थरूपेण त्रिविक्रमभट्टस्य नलचम्पूरेव प्रथममुदेति। ततश्च सोमप्रभसूरेः यशस्तिलकचम्पूः, हरिश्चन्द्रस्य जीवन्धरचम्पूः, भोजस्य रामायणचम्पूश्च केचन प्राचीनाश्चम्पूग्रन्थाः। एवमेव भागवतं महाभारतश्चाश्रित्याऽप्यनेके चम्पूग्रन्ताः प्रणीताः सन्ति। एवमेव वरदाम्बिकापरिणयचम्पूः, नीलकण्ठविजयचम्पूः, विश्वगुणादर्शचम्पूः, मुक्ताचरित्रचम्पूः, आनन्दवृन्दावनचम्पूः, गोपालचम्पूः, आनन्दकन्दचम्पूः, चितचम्पूः, अवन्तिसुन्दरीकथाचम्पूः, पारिजातहरणचम्पूः, उषापरिणयचम्पूः, गजेन्द्रचम्पूः, भरतेश्वराभ्युदयचम्पूः, पुरुदेवचम्पूः, अमोघराघवचम्पूः, यतिराजविजयचम्पूः, विरूपाक्षवसन्तोत्सवचम्पूः, रूक्मिणीपरिणयचम्पूः, आचार्यविजयचम्पूः, वेङ्कटेशचम्पूः, धर्मविजयचम्पूः, शङ्करचेतोविलासचम्पूः, गङ्गावतरणचम्पूः, रामचन्द्रचम्पूः, आनन्दचम्पूः, सुदर्शनचम्पूः, सिन्देविजयविलासचम्पूः, द्रौपदीपरिणयचम्पूः, इत्याद्याः सन्ति प्रकाशिता

अप्रकाशिताश्च सार्धद्विशताधिकश्च चम्पूग्रन्थाः। अथैतेषु कतिपयेषां चम्पूग्रन्थानां परिचयोऽत्रोपस्थाप्यते।

### 2.1.2 त्रिविक्रमभट्टः - नलचम्पूः

अद्यावधि जातेषु हि चम्पूकाव्येषु त्रिविक्रमभट्टस्य नलचम्पुरेव प्रथमत्वेन गृह्यते। त्रिविक्रमो हि शाण्डिल्यगोत्रस्य श्रीधराऽऽख्यस्य पौत्रो देवादित्यस्य पुत्रः ९७२ मितवैक्रमाब्दमभितः स्थितिमान्। स हि बाणभट्टं स्मरति -

**'शश्वद्बाणद्वितीयेन नमदाकारधारिणा।**
**धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः॥ ( १ ।१४)'**

बाणभट्टस्य समयः श्रीहर्षस्यसभापण्डितः

इति कथनेन। बाणभट्टस्य समयः श्रीहर्षसभाकवित्वेन ६५०-७१५ मित-वैक्रमाब्दानभितो मतः। तेन ह्ययमेव कालस्त्रिविक्रमस्य पूर्वसीमा स्थिति-कालस्य। एवमेव विक्रमैकादशशतकोत्तरार्द्धभवो भोजो नलचम्पूं स्मरतीतीयमेव तस्य स्थितिकालस्यावरसीमा। तथैव स हि राष्ट्रकूटवंशीयस्य तृतीयेन्द्रराजस्य समये आसीदिति -

**'श्रीत्रिविक्रमभट्टेन नेमादित्यस्य सूनुना।**
**कृता शस्ता प्रशस्तेयमिन्द्रराजाङ्घ्रिसेविना॥'**

इति कथनाज्ज्ञायते। कथनमिदं ९७२ मितवैक्रमाब्दे समुट्टङ्किताभिलेखे विद्यते। तेन हि ९७२ मितविक्रमाब्दमभितस्तस्य स्थितिकाल इति। केचित्तु-

**'कैलाशायितमद्रिभिर्विटपिभिः श्वेतातपत्रायितं**
**मृत्पङ्केन दधीयितं जलनिधौ दुग्धायितं वारिभिः।**
**मुक्ताहारलतायितं व्रततिभिः शङ्खायितं श्रीफलैः**
**श्वेतद्वीपजनायितं जनपदैर्जाते - शशाङ्कोदये॥' (७ ।२८)**

एवमेव

**'मदनमिति युवानं यौवराज्येऽभिषिञ्चन्**
**कृतकुमुदविकासो भासयन् दिङ्मुखानि।**
**इमममृततरङ्गैः प्लावयञ्जीवलोकं**
**गगनमवजगाहे मन्दमन्दं मृगाङ्कः॥' (७।२७)।**

इति कथनेन श्लेषबलात्कमपि शशाङ्कसंज्ञितं नृपं स्मरतीति तर्कयन्ति। तदनुसारेण हि कवेरस्य शशाङ्कसमकालिकत्वं सिध्यति। शशाङ्कः हर्षसमकालिकस्तत्प्रतिद्वन्द्वी गौडनरेशो वैक्रमसप्तमशतकोत्तरार्द्धस्थितिमान्। किन्तु कथनमिदं न तथा युक्तियुक्तं यतस्तथा सति तस्य बाणपूर्ववर्तित्वं सिध्यति यद्धि तस्यैव 'शश्वद्बाणद्वितीयेन नमदाकारधारिणा' इति कथनस्य (१-१४) विरोधः सञ्जायते। श्रीहर्षेण शशाङ्कवधानन्तरमेव बाणस्तत्सभायां प्रविष्ट आसीत्।

नलचम्पूर्हि दमयन्तीकथाप्युच्यते। ग्रन्थोऽयं सप्तोच्छ्वासेषु विभक्तोऽस्ति यत्र हि आर्यावर्तवर्णनमारभ्य नलदमयन्तीपरिणयपर्यन्ता कथा वर्णिताऽस्ति।

**नलदमयन्तीकथा**

कथ्यते। एकदाऽस्य पिता कार्यवशाद्दूरदेशं गत आसीत्। तदैव कश्चिदपरः पण्डितस्तं तत्रागत्य शास्त्रार्थाय समाहूतवान्। स तु भीतभीतः सरस्वतीमस्तौषीत्। साऽपि तत्पितृप्रत्यागमनपर्यन्तं तज्जिह्वावासं स्वीकृतवती। ततः शास्त्रार्थे तं पण्डितं पराजित्य गृहं प्रत्यागत्य ग्रन्थमिमं लिखितुमारब्धवान्। एतदन्तरे हि तत्पिता प्रत्यागतो गृहम्। ततो भारती तं त्यक्तवती येन ग्रन्थोऽपूर्ण एव संवृत्तः।

ग्रन्थेऽस्मिन्नर्थालङ्कारापेक्षया शब्दालङ्कारस्यैव प्राधान्यं दृश्यते। तथाऽपि इयं सरसा रमणीयार्था चमत्कारपूर्णा च। यथोक्तम् -

**प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविलक्षणाः।**
**भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः॥**

वस्तुतस्तु तस्य कृतिः सदूषणाऽपि निर्दोषा सखराऽपि सुकोमला विद्यते रामायणीय कथेव। श्लेषस्य दुर्बोधत्वं स्वीकुर्वन् कविः स्वयमेव कथयति - वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः।

**नोद्वेगस्तत्र कर्तव्यो यस्मान्नैको रसः कवेः ॥ (१।१६) इति।**

अस्य हि यमकच्छटा निभालनीया दृश्यते यथा -

**धृतकदम्बकदम्बकनिष्पतन्नवपरागपरागममन्थराः**
**हृततुषारतुषारतिरागिणां प्रियतमा मरुतो मरुतो वधूः ॥ (१।४३)** इत्यादि।
स हि भावनिबन्धनेऽपि पटुर्दृश्यते। भर्तृहरेः -

**'व्यतिसंजति पदार्थानन्तरः कोऽपि हेतु-**
**र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।**
**विकसति हि पतङ्गस्योदये पुण्डरीकं**
**द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥'**

इति कथनम् -

**भवति हृदयहारी क्वापि कस्यापि कश्चित्**
**न खलु गुणविशेषः प्रेमबन्धप्रयोगे।**
**किसलयति वनान्ते कोकिलालाप रम्ये**
**विकसति न वसन्ते मालती कोऽत्र हेतुः ॥ ( ७।४७)।**

इत्यनुवदति भावतः। तस्य हि वर्णनाचातुर्यं यथा-

**'आवासाः कुसुमायुधस्य शवरीसङ्केतलीलागृहाः**
**पुष्पामोदमिलन्मधुव्रतवधूझङ्काररुद्धाध्वगाः**
**सुस्निग्धाः प्रियबान्धबा इव दृशो दूरीभवन्तश्चिरात्**
**कस्यैते न वहन्ति हन्त हृदयं विन्ध्याचलस्य द्रुमाः ॥'**

इत्थं हि तस्य काव्ये शृङ्गारस्य सुन्दरः परिपाको वर्णनस्य माधुर्यं कल्पताया मनोज्ञता श्लेषच्छटा च समन्विता दृश्यन्ते।

समालोचकैस्त्रिविक्रमस्य कतिचित् त्रुटयोऽपि इङ्गिताः सन्ति। यासु पाण्डित्यप्रदर्शनार्थं कथावस्त्वनपेक्षा, रसपरिपाकापेक्षया शाब्दक्रीडायाः प्राधान्यं, कलाप्राबल्येन भावपक्षस्योपेक्षा, कथाविकासे गतिशीलतायाः स्वाभाविकसञ्चाराभावः, श्लेषपरिसङ्ख्यादीनां श्रमसाध्यता, कथाया अकाण्डे एव विच्छित्तिरित्यादि।

नलचम्प्वोः अनेके टीकाः सन्ति

नलचम्पूमधिकृत्य सन्ति प्रसिद्धाः अनेकाष्टीकाः यासु चण्डपालकृता विषमपदप्रकाशा गुणविनयगणिकृता वृत्तिः (१६५० वै०) दामोदरी टीका, नागदेवी, बृहट्टीका, विवृतिटीका, नन्दकिशोरस्य भावबोधिनी च ज्ञाताः काश्चन प्राचीनाः शेषराजशर्मणश्चन्द्रकला च नवीनासु ज्ञाता।

अस्यैव ग्रन्थान्तरं मदालसाचम्पूः। अयमेव कुवलयाश्वचरितसंज्ञकोऽपि। काव्यमिदं कुवलयाश्वमदालसयोः प्रेमकथावर्णनपरम्। नलचम्प्वपेक्षया ग्रन्थोऽयं न्यूनश्रेणीकः। तथापि काव्यस्यास्य सुन्दरता रसवत्ता च प्रशस्या विद्यते। ग्रन्थस्यास्यैका टीका लभ्यते कस्यापि । ग्रन्थोऽयं कवेः प्रथमैव कृतिर्दृश्यते। कथानकञ्च मार्कण्डेयपुराणाद् गृहीतं प्रतिभाति।

### 2.1.3 अनन्तभट्टः - भारतचम्पूः

भारतचम्पूः महाभारतमाश्रित्य , भागवतचम्पू इत्यपि श्रूयते

अनन्तभट्टप्रणीतभारतचम्पूर्महाभारतमाश्रित्य प्रणीतो द्वादशस्तबकेषु विभक्तो ग्रन्थः। एवं हि १६६० मितवैक्रमाब्दमभितः स्थितिमान् नारायणभट्टः स्मरतीति तस्य स्थितिकालः १५५० मितवैक्रमाब्दमभिमतोऽनुमितः। अस्यैव भागवतचम्पूरपि श्रूयते। अस्योपरि नारायणसूरेष्टीका लभ्यते मुद्रिता। अस्य हि ग्रन्थाद्यपद्ये-

**'दिगन्तरलठत्कीर्तिरनन्तकविकुञ्जरः।**

**प्राणैस्तुल्यं सरस्वत्याः त्राणैषीच्चम्पूभारतम्॥' (१२।३३)**

इति लिखितमस्ति। वस्तुतः कवेरस्य श्लेषचमत्कारो निभालनीयो दृश्यते। यथा हि-

**'नवतरुणिमलक्ष्मीनन्दनीयं शरीरं**
**कुरुवृषभसुतानां कुर्वती नेत्रपात्रम्।**
**मुनिततिरिति मेने मोहनाय त्रिलोक्याः**
**स्वविशिख इव कामः सोऽपि किं पञ्चधाऽभूत्॥' (१।६७)** इत्यादि।

### 2.2.4 भोजदेवः - चम्पूरामायणम्

चम्पूरामायणं हि चम्पूग्रन्थेषु सर्वोत्कृष्टकाव्यम्। अस्य प्रणेता १०६२-११११ मितवैक्रमाब्दानभितः स्थितिमान् परमारवंशीयो धारानगरीशो भोजः स्मृतः। किन्तु ग्रन्थे न कुत्रापि प्रणेतृनाम दत्तमस्ति। तथैव प्रतिकाण्डपुष्पिका- वाक्ये 'श्रीविदर्भराजविरचिते चम्पूरामायणे' इत्युल्लिखितं दृश्यते। ग्रन्थस्यास्य प्रणेता भोजाऽऽख्या इति तु 'भोजेन तेन रचितामपि पूरयिष्यन्' इति युद्धकाण्डगतलक्ष्मणभट्टपद्याज्ज्ञायते। किन्तु कोऽसौ भोजः कतमोऽयमिति तु सम्प्रत्यपि अनिर्णीतमेव, ग्रन्थपुष्पिकावाक्यात्तु अस्य प्रणेता कश्चित् विदर्भराजो दृश्यते। विदर्भेषु राजानो हि भोजशब्देन व्यपदिश्यन्ते प्राचीनकालादेव। यथा 'भोजेन दूतो राघवे विसृष्टः' इति रघुवंशेऽपि। धारानगरीशः परमारवंशीयः सिन्धुराजपुत्रोऽपि भोजशब्देन व्यपदिश्यते। भारतीया हि परम्परा तु धारानगरीशभोजमेव ग्रन्थस्यास्य प्रणेतृत्वेन गृह्णाति। अपरञ्च, भोजप्रबन्धादावपि स एव विद्वन्मूर्धन्यत्वेन गृहीतोऽस्ति। सम्भवति केनापि लिपिकारेण भोजं हि वैदर्भं मत्वा तथाविधं पुष्पिकावाक्यं पश्चात्संयोजितं स्यात्। ग्रन्थगौरवदृष्ट्या त्वयं ग्रन्थो धारानरेशस्यैव भवितुमर्हति। ग्रन्थस्यास्याद्यानि पञ्च काण्डानि भोज- प्रणीतानि युद्धकाण्डं तु

रामायणमाश्रित्य रचितं

लक्ष्मणभट्टनाम्ना विदुषा प्रणीय पूरितम् । तथैव वेङ्कटराजाख्येन कविना उत्तरकाण्डमपि विरच्य पूरितमिति कथ्यते।

ग्रन्थेऽस्मिन् वैदर्भी रीति सर्वातिशयित्वेन विलसति । वर्णनेऽत्र प्रयुक्ता कल्पना नितान्तोच्चकोटिका। अत्र हि अनुप्रासस्योपमायाश्च वैचित्र्यं कुमारदासं स्मारयति । अस्योत्प्रेक्षाऽपि निभालनीया । दिङ्मात्रमुदाहरणं यथा-

**'सीता पुरा गगनचारिभिरप्यदृष्टा मा भूदियं सकलमानवनेत्रपात्रम् ।**
**इत्याकलय्य नियतं णिदधे विधाता बाष्पोदयेन नयनानि शरीरभाजाम्॥'**

(२।३३)

वैदर्भी रीतिं प्रयुक्तवान्

**'इति विविधरसाभिः कौशिकव्याहृताभिः**
**श्रुतिपथमधुराभिः पावनाभिः कथाभिः।**
**गलितगहनकृच्छ गच्छतोर्दाशरथ्योः**
**समकुचदिव सद्यस्तादृशं मार्गदैर्घ्यम्॥'** (१।४७)

'राजन्, भवतः कुमारेण विनयाभिरामेण रामेण शरासनमित्रेण सौमित्रि-मात्रपरिजनेन क्रियमाणक्रतुरक्षो रक्षोदुरितमुत्तीर्य कृतावभृथो भवितुमभि-लषामीति'।

**केरलीयप्रबन्धाः**

लोकप्रसिद्धस्य लघुचम्पूकाव्यस्य अपरं नाम भवति प्रबन्धः। संस्कृत-साहित्ये प्रबन्धस्य महत्वपूर्णं विभागो अस्ति। 'प्रबन्धः इत्यस्य अर्थो अस्ति प्रबध्यते इति प्रबन्धः'। संस्कृतसाहित्ये केरलस्य अद्वितीयं योगदानमेव अस्ति प्रबन्धस्य। शब्दकोशे प्रबन्धः इति निरन्तरं अथवा सम्बद्धं आख्यानं वा प्रवचनं वा कोऽपि साहित्यिककृतिः स्पष्टतया वा इति परिभाषितम्। मध्यकालसंस्कृतसाहित्ये तु प्रबन्धः इति पदं साहित्यरूपस्य विचित्रं भावं

लघुचम्पूकाव्यस्य अपरं नामधेयोऽस्ति प्रबन्धः

धारयति। चम्पूप्रबन्धयोः भेदः केवलं तस्य परिमाणस्य दृष्ट्या एव, न किमपि मौलिकतया। चम्पूकाव्यानि अपेक्षया प्रबन्धाः बहुलघुतरं भवति। केरले नाट्यकारैः चाक्यारैः संस्कृतनाटकेषु प्रबन्धः उपयुज्यन्ते। यस्य कूत्त् इत्यस्य मुलग्रन्थरूपेण अथवा पौराणिककथानां लोकप्रियाख्यानरूपेण प्रयुज्यते। प्रबन्धः अपि पाठकं इति पौराणिककथाकथनाय वा प्रयुज्यते। यत् कूत्त् इव न तावत् विस्तृतं यत् चाक्यार् अतिरिक्तं अभिनेता अपि कर्तुं शक्यते।

**मेल्पुत्तूर्नारायणभट्टः**

चाक्यारः प्रार्थनया प्रबन्धः रचितवान्

मेल्पुत्तूर्नारायणभट्टः संस्कृतभाषायां महापण्डितः आसीत्। केरलस्य उत्तरभागे निलानद्याः उत्तरतीरे चन्दनक्कावुनामग्रामे मेल्प्पत्तूर् इति प्रथिते नम्पूतिरिब्राह्मणकुले नारायणभट्टस्य जन्म अलभत। तस्य पिता मातृदत्तः, माता पय्यूर् द्विजकुलान्तर्गतैका च आस्ताम्। मातृदत्तः बहुशिष्यसम्पन्नः वेदपण्डितः आसीत्।

कूत्त् नारायणभट्टस्य प्रबन्धानां प्रादुर्भावानन्तरमेव स्वतन्त्रं साहित्यरूपं भवति। तस्मात् पूर्वं प्रसिद्धः चम्पूकाव्यस्य चयनितभागः यथा भोजचम्पूः, अगस्त्यभट्टस्य भारतचम्पूः, अनन्तभट्टस्य बालभारतचम्पूः च चाक्यारैः स्वतन्त्रतया उपयोगः कृतः आसीत्। कदाचित् नारायणभट्टः नारायणीयं इत्यस्य आकर्षकरचनया प्रसिद्धः कविः इति लोकप्रियः अभवत्। तदा कश्चन चक्यार् तस्य समीपं गत्वा स्वप्रदर्शनार्थं प्रबन्धस्य रचनां कर्तुं प्रार्थितवन्तः स्यात्। प्रमुखेषु चम्पुलेखकेषु त्रिविक्रमभट्टः श्लेषप्रयोगे प्रसिद्धः अस्ति, रसस्य कृते भोजः, अनन्तभट्टः उल्लेखस्य कृते नीलकण्ठदीक्षितः च विनोदपूर्णस्य हास्यवाक्यस्य च। नारायणभट्टस्तु सर्वैः तत्त्वैः युक्तः आसीत्। महाकविः पाण्डित्यविद्वान् च आसीत्। तथा च संस्कृतभाषायां साहित्ये च तस्य योगदानं अद्भुतम् अस्ति।

भारतस्य अन्येभ्यः कविभ्यः अपेक्षया नारायणभट्टेन अधिकाः चम्पूग्रन्थाः रचिताः। किन्तु चम्पूनां सङ्ख्या अद्यापि निर्धारिता न अस्ति।

**मेलपुत्तूर् नारायणभट्टेन प्रकाशितप्रबन्धाः**

नारायणभट्टस्य त्रयोविंशतिप्रबन्धाः प्रकाशिताः सन्ति। नारायणभट्टात् परं कोऽपि एतेषां प्रबन्धानां कर्ता नास्ति इति न्यूनाधिकं निश्चितम्। ननु ते तस्य साहित्यरचनायाः महत्त्वपूर्णानि लक्षणानि स्पष्टतया प्रकटयन्ति। तस्य प्रकाशितप्रबन्धानां सूची अधोलिखिता अस्ति।

त्रयोविंशतिः प्रबन्धाः प्रकाशिताः

1. अजामिलमोक्षम्
2. अष्टमीमहोत्सवम्
3. किरातम्
4. कुचेलवृत्तम्
5. कोठीविरहम् अथवा श्रृङ्गारकेतुचाहितम्
6. कैलासवर्णनम्
7. कौन्तेयाष्टकम्
8. गजेन्द्रमोक्षम्
9. त्रिपुरदहनम्
10. दक्षयागम्
11. दूतवाक्यं अथवा कृष्णदूतम् अथवा भगवद्दूतम्
12. नलचरितं अथवा पञ्चेन्द्रोपाख्यानम्
13. निरनुनासिकम् अथवा शूर्पणखाप्रलापः
14. नृगमोक्षम्
15. पाञ्चालीस्वयंवरम्
16. मत्स्यावतारम्
17. युधिष्ठिराभिषेकम्
18. राजसूयम्

19. रुक्मणाङ्गचरितम्
20. सन्तानगोपालम्
21. सुन्दोपसुन्दोपाख्यानम्
22. सुभद्राहरणम्
23. स्वाहासुधाकरम्

## Summarised Overview

संस्कृतकाव्यशास्त्रे विशिष्टः काव्यप्रकारः भवति चम्पूकाव्यम्।

'गद्यानुबन्धरसमिश्रितपद्यसूक्तिहृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्दधातु कविमार्गजुषां सुखाय चम्पूप्रबन्धरचनां रसना मदीया।' इति भोजः चम्पूकाव्यस्वरूपं प्रतिपादयति। तदनन्तरं गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते इति दण्डिना चम्पूकाव्यस्य लक्षणमुक्तम्। गद्यपद्योभयरूपं काव्यं चम्पूकाव्यम्। चम्पूकाव्ये सामान्यकथनं तु गद्येनैव कथ्यते विशेषकथनाय पद्यमाश्रिते। काव्यप्रकारोऽयं बहुशः प्रचलितः सम्मानितश्च दृश्यते विद्वत्समाजे। प्रकाशिताः अप्रकाशिताः च सार्धद्विशताधिकश्च चम्पूग्रन्थाः सन्ति।

चम्पूग्रन्थेषु त्रिविक्रमभट्टस्य नलचम्पूरेव प्रथमत्वेन गृह्यते। सः शाण्डिल्यगोत्रस्य श्रीधरनामधेयस्य पौत्रः देवादित्यस्य पुत्रः ९७२ मितविक्राब्दाभिमतः जातः। नलचम्पूः हि दमयन्तीकथां वर्णयति। अत्र आर्यवर्तवर्णनमारभ्य नलदमयन्तीपरिणयपर्यन्तकथा वर्णिताऽस्ति। ग्रन्थोऽयं सप्तमोच्छ्वासेषु विभक्ताऽस्ति। ग्रन्थे अर्थालङ्कारान् अपेक्षया शब्दालङ्कारस्यैव प्राधान्यं दृश्यते। नलचम्प्वोः अनेके टीकाः सन्ति।

अनन्तभट्टप्रणीतभारतचम्पूर्महाभारतमाश्रित्य प्रणीतो द्वादशस्तबकेषु विभक्तो ग्रन्थः। एवं हि १६६० मितवैक्रमाब्दमभितः स्थितिमान् नारायणभट्टः स्मरतीति तस्य स्थितिकालः १५५०

मितवैक्रमाब्दमभितोऽनुमितः। अस्यैव भागवतचम्पूः इति नामान्तरं श्रूयते। अस्योपरि नारायणसूरेष्टीका लभ्यते मुद्रिता।

लोकप्रसिद्धस्य लघुचम्पूकाव्यस्य अपरं नाम भवति प्रबन्धः। संस्कृतसाहित्ये प्रबन्धस्य महत्वपूर्ण विभागो अस्ति । 'प्रबन्धः इत्यस्य अर्थो अस्ति प्रबध्यते इति प्रबन्धः' । संस्कृतसाहित्ये केरलस्य अद्वितीयं योगदानमेव अस्ति प्रबन्धस्य।

भारतस्य अन्येभ्यः कविभ्यः अपेक्षया नारायणभट्टेन अधिकाः चम्पूग्रन्थाः रचिताः। नारायणभट्टस्य त्रयोविंशतिप्रबन्धाः प्रकाशिताः सन्ति।

## Assignments

1. चम्पूकाव्यस्य लक्षणं प्रतिपादयत।
2. चम्पूकाव्यानि अधिकृत्य उपन्यस्यत।
3. नलचम्पूः - टिप्पणीं लिखत।
4. नलचम्प्वोः टीकाः काः?
5. त्रिविक्रमभट्टस्य कालः कदा आसीत्?
6. भारतचम्पूः - टिप्पणीं लिखत।
7. चम्पूरामायणं - टिप्पणीं लिखत।
8. केरलीयप्रबन्धान् अधिकृत्य विशदयत।
9. मेल्प्पुत्तूर् नारायणभट्टमधिकृत्य उपन्यस्यत।

## Suggested Readings

1. Samkritasahityacaritram, Dr.K.Kunjunni Raja and Dr.M.S.Menon, Kerala sahitya Academi ,Thrissur.
2. Vadakkamkoor Rajarajavarma. Keraleeya Samskruthasahithyacharithram, Published -Thrishivaperoor Manglodayam.
3. A Classical History of Sanskrit Literature, R.Krishnamacariar, Motilal Banarsidass, New Delhi.

## References

1. आचार्य लोकमणि दाहालः। संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अकादमी, वारणसी २०१९
2. डा उदयशङ्कर् झा। संस्कृतशिक्षणम्, चौखम्बा सुरभारती प्रकाशन, वारणसी, २०१३
3. Prabhandhas of Melputtur Narayana Bhatta, University of Kerala, Thiruvananthapuram

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# बाणभट्टः - जीवनवृत्तान्तः रचनाः च

## Learning Outcomes

- गद्यकाव्यकर्तुः बाणभट्टस्य परिचयः।
- बाणभट्टस्य जीवनवृत्तान्तम् अवगच्छति।
- बाणभट्टस्य ग्रन्थान् तस्य गद्यशैलीवैशिष्ट्यं च अवगच्छति।

## Background

भोः पठितारः,

प्रथमे एकके गद्यकाव्यस्य भेदौ अधीतं किमिति जानीथ? अस्तु। कथा आख्यायिका चेति। तस्मिन् भेदे कथाविभागे प्रसिद्धः काव्यं किमिति जानासि? अस्तु। कादम्बरी इति कथामयः काव्यम्। तस्य कर्तुः नाम किमिति जानासि? सम्यक्, उत्तमं महाकविः बाणभट्टः। तं कविम् अधिकृत्य पठामः।

## Keywords

SGOU

सप्तमशतकस्य, वात्स्यायनस्य गोत्रसम्भवाः, चित्रभानोः तनयः, हर्षचरितं, कादम्बरी,चण्डीशतकम्, पार्वतीपरिणयनाटकम्, मुकुटताटिकम्, पाञ्चाली।

## Discussion

**बाणभट्टः**

अलौकिकप्रतिभासम्पन्नः काव्यचातुरीचर्चितः विद्यावतारः महाकविः बाणभट्टः जगदम्बिकायाः सरस्वत्याः सर्वमान्यः वरदपुत्र इवासीत्। प्रायो हि विद्वांसः निर्धनाः भवन्ति, परश्च बाणभट्टे श्री शारदयोः समभावेन महती कृपा विद्यमाना आसीत् । यथा प्रतिभामण्डिते कविसमुदाये समादरः आसीत् तथैव राजसदसि प्रतिष्ठितः कविरासीदिति नास्त्यत्र सन्देहावसरः। कविताकामिनीचूडामणिरयं स्वजीवनचरितं हर्षचरितस्याद्यपरिच्छेदद्वये विस्तरेणावर्णयत्। एतत्र केवलं जीवनचरितज्ञानायोपयोगि किन्तु साहित्यशास्त्रदृष्ट्यापि नितरां प्रशंसनीयमनुपमञ्च।

बाणभट्टस्य वंशपरम्परा

अयं हि शोणनद्याः तटे शाहाबादमण्डले प्रीतिकूटनामकनगरे प्रतिवसति-स्म। हर्षचरिते अस्य वंशवर्णनं विस्तरेण उपलभ्यते। ब्रह्मणः प्रजापतेः मानसपुत्रेषु पुलहर्षेः पुत्रस्य वात्स्यायनस्य गोत्रसम्भवाः कुबेर-पाशुपत-अर्थपति- चित्रभानवः क्रमेणाभूवन्। चित्रभानोस्तनयः बाणभट्टः बभूव। राजदेवी नाम्नी माता बाल्यावस्थायामेवा लोकान्तरमगमत्। जनकोऽपि चित्रभानुश्चतुर्दशवर्षदेशीयस्यास्य कवेः सायुज्यमलभत। तदनन्तरं तादृशमभिभावकमप्राप्याऽपि बाणभट्टः वयस्यैः सहायकैश्च सह अटाट्यमानः शिक्षां प्राप्य बहोः कालात्परं स्वनगरं

प्रत्याजगाम। प्रशस्तां लोकचातुरीम् अलौकिकं पाण्डित्यञ्च सम्प्राप्य स्थानेश्वरराजधान्यां महाराजहर्षवर्द्धनस्य राजविद्वत्सभायाः सर्वप्रतिष्ठितं उत्कृष्टञ्च पदमवाप्तवान्।

**बाणस्य कालः**

सप्तमशतकस्य पूर्वार्द्धात् किञ्चिदुत्तरार्द्धं यावत्

नास्त्यविदितं विदुषां यत् संस्कृतसाहित्यस्य कविकुले बाण एव एतादृशः महाकविः यस्य जीवनचरितविषये पर्याप्तं ज्ञानं मिलति। अन्तरङ्ग-बहिरङ्गप्रमाणपरिशीलनेन निश्चप्रचमेतत् यत् महाकवेर्बाणस्य समयः सप्तमशतकस्य पूर्वार्द्धात् किञ्चिदुत्तरार्द्धं यावत् । हर्षचरिते वर्णितस्य हर्षवर्द्धनस्य चरित्रस्याधारं बाणः हर्षराज्यस्य उत्तरे काले तस्य सदस्यः आसीत्।

**बाणस्य कृतयः**

हर्षचरितं, कादम्बरी, चण्डीशतकम्, पार्वतीपरिणयनाटकम्, मुकुटताडिकम्

प्राप्तानुसन्धानेन यद्यपि बाणस्य तिस्रः कृतयः प्रामाणिकरूपेणोपलब्धाः सन्ति। किन्तु महाकवेर्महाकवित्वं हर्षचरितकादम्बर्ययोः उभयोराश्रित्य लब्धमस्ति। उपलब्धाः तिस्रः रचनाः सन्ति (१) हर्षचरितम् (२) कादम्बरी (३) चण्डीशतकञ्चेति। केचन विद्वांसः 'पार्वतीपरिणयं' नामकं नाटकमपि बाणस्य कृतिमामनन्ति। परञ्च पाश्चात्यविदुषा ए० बी० कीथेन एतत् खण्डनं विधाय निश्चितं यत् नाटकमिदं सप्तदशशतके विद्यमानस्य वामनभट्ट बाणनामकस्य कस्यापि दाक्षिणात्यस्य वत्सगोत्रीयस्य ब्राह्मणस्य कृतिरस्ति। एतदतिरिक्तं नलचम्पोः टीकायां चण्डपालेन गुणविजयगणिना च मुकुटताडितकं' नामकस्य बाणस्यैकस्यातिरिक्तस्य नाटकस्य चर्चा विहिता, परञ्चाधुनापि नाटकमिदमनुपलब्धमेवास्ति।

सम्प्रति प्राप्तक्रमे तेषां ग्रन्थानां समीक्षणं संक्षेपेण - प्राचीनसूक्तिसंग्रहेषु अलङ्कारग्रन्थेषु च एतन्नाम्ना हृद्यानि सुमनोहराणि पद्यानि दृष्टिपथे समा-

यान्ति। औचित्यविचारचर्चायां क्षेमेन्द्रेण बाणकृतमेकं पद्यं स्यात् पद्यबद्धायां कादम्बर्याम् -

**हारो जलार्द्रवसतं नलिनीदलानि प्रालेयशीकरमुचस्तुहिनांशुभासः ।**
**यस्येन्धनानि सरसानि च चन्दनानि निर्वाणमेष्यति कथं स मनोभवाग्निः ॥**

(१) हर्षचरितम् - अष्टोच्छ्वासेसु विभक्तमिदमाख्यायिकारत्नं हर्ष-चरितमतिप्राचीनमस्ति। ऐतिहासिकविषयमवलम्ब्य गद्यलेखने बाणस्यायं प्रथमः प्रयासः। अस्य ग्रन्थरत्नस्य भाषा तादृशी सुविमला न यथा कादम्बर्याः । यच्च प्राचीनाः कथयन्ति - 'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्' तदत्रोपलभ्यन्ते।

(२) कादम्बरी - प्रस्तुतेयं कादम्बरी महाकवेर्बाणभट्टस्यैव किमु गद्य-साहित्यस्याप्युत्कृष्टा रचना विद्योतते।

(३) चण्डीशतकम् - ओजगुणबहुलायां भाषायां एकशत (शतक)-स्रग्धरावृत्त्या निर्मितमतीवरमणीयं भगवत्याः स्तुत्यात्मकः अस्ति।

(४) पार्वतीपरिणयनाटकम् - शिवपार्वत्योः पाणिग्रहणपवित्रकथया समन्वितमतिरमणीयं नाटकम्। इदमेव कर्तृत्वविषये विवादास्पदम् नवीनस्य प्राचीनस्य बाणभट्टस्य वा - इति शंकास्थानम्।

(५) मुकुटताडिकम् - इत्यपि केवलं टीकायां चर्चाविषयीभूतम् । अनेन प्रकारेण महाकवेर्बाणस्य व्यक्तित्वं कृतित्वञ्च समीक्षणेनेदमायातं

यत्-

**रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।**
**सा किं तरुणी ! नहि नहि बाणी बाणस्य मधुरशीलस्य॥**

## बाणस्य गद्यशैली

पाञ्चाली रीतिः

संस्कृतस्य गद्यसाहित्ये महाकवेर्बाणस्य महदुज्ज्वलं स्थानमस्ति। पाञ्चालीरीतिगुम्फिताऽस्य शैली गद्यकाव्यकविभ्यः मानदण्डरूपेणादर्श भूताऽस्ति । प्रभावोत्पादकस्य गद्यस्य रचनायां कविना प्रयुक्तयः रीतयः परमप्रवीणाः सन्ति। ये केचन समालोचकाः बाणगद्यं भारतीयारण्यमिव भयाक्रान्तं तथा चाप्रसिद्धैः क्लिष्टशब्दैर्मण्डितञ्चामनन्ति, वस्तुतस्ते यथार्थनिरूपणे सर्वथा दूरङ्गमाः प्रतीयन्ते । यत्र कविवरेण बाणभट्टेन कथासाहित्ये चर्चितानां पात्राणां चित्रणे प्राणवन्तं प्रभावोत्पादकत्वञ्च कलावैशिष्ट्योत्पादनस्थाने समासबहुलायाः ओजोगुणमण्डितायाः शैल्याः प्रचुरः प्रयोगः कृतस्तत्रैवान्यत्र लघुवाक्यकदम्बानां प्रयोगेण स्वशैलीविधानमपि प्रस्थापितम्। क्रान्तदर्शिनः कवयः कस्या अप्येकस्या कलायाः क्रीतदासा न भवन्ति, ते तु उन्मुक्तगगने सञ्चरणशीलाः परमस्वतन्त्राः भवन्ति। विषयसापेक्षतया यथाविहितं मनोऽनुकूलं शैली-विधानमपि समाचरन्ति। तथा हि कविवरेण बाणभट्टेन कादम्बर्याम् अटव्याः सन्ध्यायाश्च वर्णनप्रसङ्गे यत्र दीर्घसमासानां मनोरमा छटा प्रवेशिता तत्रैव वियोगदशा वर्णनावसरे स्वल्पानां प्रासादिकवाक्यानां हृद्या उत्कृष्टा च सुषमा उपस्थापिता। कविताकामिनीविलासचतुरस्य बाणस्य लेखविन्यासकलाऽपेक्षानुरूपा विषयवस्तुनः नितान्तमनुकूला हृद्या सरसा च विद्योतते। यत्र हृद्गतभावानामभिव्यक्तिरस्ति तत्र न समासानां प्रयोगः न चापि वाक्यानां दैर्घ्यमस्ति। स्वल्पस्वल्पेषु वाक्येष्वेवोचितं वर्णनं विद्यते। अवलोकयन्तु कादम्बर्यामेव वर्णी कपिञ्जलः ब्रह्मचारिणः पुण्डरीकस्य कामवेगेनोन्मथिते सति तदवसरे भर्त्सनं करोति -

'सखे पुण्डरीक ! नैतदनुरूपं भवतः, क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चित् प्राकृत इव विकलीभवन्तमात्मानं न रुणत्सि। क्व ते तद् धैर्यम् ? क्वासौ इन्द्रियजयः' ? इत्यादि।

अनेनैव प्रकारेणान्यत्रापि शुकनासोपदेशे तथैव प्रयुक्तमस्ति। परञ्च तत्रैव राजवैभववर्णनावसरे, नारी सौन्दर्यचित्रणावसरे, प्रकृतिसुषमामण्डिते च विषये-अलङ्कारैरलङ्कृतैर्वाक्यः दीर्घसमासबहुलैश्च वाक्यकदम्बैः सम्पृक्तमस्ति। निष्कर्षोऽयं यत् महाकवेर्बाणस्य गद्ये शैलीविधानस्य वर्ण्यविषये अनुपमेयं सामञ्जस्यं तिष्ठतीति दिक्।

**बाणस्य वैशिष्ट्यम्**

सहृदयाः साहित्यिकाः जानन्ति यत्- 'अपारे काव्यसंसारे कविरेकः प्रजापतिः' इति नियमानुसारेण संस्कृतकाव्यजगतः प्रजापतिस्वरूपाः आदिकविवाल्मीकिः, महाकविकालिदासः,भारवि-माघ-नाटककारभव-भूतिः, महाकविर्बाणभट्ट प्रभृतयः सन्ति। एतेषां महाकवीनां कृतित्वस्य व्यक्तित्वस्य च समीक्षणं कृत्वैव तत्सम्बन्धे प्रशस्तयः प्रचलिताः सन्ति। एताः प्रशस्तयः सम्बद्धकवीनामालोचनासमीक्षणावसरे भूयोभूयः प्रेरयन्ति।

सम्भावयन्ति समीक्षकाः यत् कस्यापि महाकवेर्विषये कथिता प्रशस्तिः तस्य काव्यप्रतिभायाः आदर्शभूता भवति। परीक्षणनिकषे तस्य व्यक्तित्वं कृतित्वं च परीक्ष्यते। आस्वेव प्रशस्तिषु गद्यकाव्यप्रणेतुः बाणभट्टस्य विषयेऽपि 'बाणोच्छिष्टं जगत् सर्वम्' इयं प्रशस्तिः पण्डितमण्डलेषु अतीव सुप्रसिद्धाऽस्ति। अस्याः प्रशस्तेः शाब्दिकोऽर्थः - अखिलोऽयं संसारः बाणभट्टकवेः उच्छिष्टः (चर्वितः मुखेन स्पृष्टः)। सामान्यतः इयमुक्तिः कस्यापि भावुकस्य प्रशंसकस्य प्रतीयते, यो हि कविप्रतिभया अत्यन्तं प्रभावितः स्यात्। विद्वांसः अस्याः प्रशस्तेः विचारक्रमे पक्षद्वयमामनन्ति- प्रथमः पक्षः प्रशस्तेः समर्थने, अपरञ्च विरोधे। द्वयोः समीक्षणं स्वस्थपरम्परया भाव्यम्, अस्याः प्रशस्तेः समुदयात्पूर्वं काव्यशास्त्रविदः विद्वत्समुदाये कथयन्ति स्म 'व्यासोच्छिष्टं जगत्सर्वम्'। अस्याः आर्थप्रशस्तेः

आधारः महर्षेः वेदव्यासस्येयमुक्तिः वर्तते यत्- 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्'। अत्रायमभिप्रायः - महाभारतस्य लोके ईदृशी व्यापकता वर्तते यत्तत्र वर्णितानां विषयाणामतिरिक्तं न किमपि तिष्ठति। एतेनेदमायाति यत् व्याससाहित्यादतिरिक्तं साहित्यमुच्छिष्टमिव सिद्धयति। व्यासस्यातिप्राचीनत्वात् कथनस्यास्य सार्थकता तु प्रमाणिता भवति। किन्तु 'बाणोच्छिष्टं जगत्सर्वम्' इयमुक्तिः विवादं जनयति। बाणभट्टस्यालौकिकी प्रतिभामवलोक्य समीक्षकैरुद्घोषितं - 'बाणोच्छिष्टं जगत्सर्वम्' इत्यस्य शाब्दिकोऽर्थः वर्तते परवर्तिभूतं कल्पनामयं काव्यजगत् उच्छिष्टस्य चार्थोऽस्ति - पूर्ववर्णितम्। अत्रायमाशयः बाणोत्तरकवीनां कल्पनासु नवीनताया चमत्कारं नास्ति न वा मिलति। अत्र स्फुटोक्तिः - बाणोत्तरकाव्यकल्पनाया समस्तविधानां वर्णनं बाणकाव्येषु पूर्वत एव विद्यमानमस्ति। अपरञ्च बाणस्य काव्यधारायामवगाहनेनावश्यं प्रतीयते यत्तेषां विमलधारायाः स्वच्छन्दता प्रवहणता च कामप्यलौकिकी प्रतिभामुद्भावयति। यतो हि बाणात्पूर्ववर्तिना गद्यकविना सुबन्धुना यद्यपि 'वासवदत्ता' गद्यकथायाः प्रारम्भस्तु विहितः। परञ्च तत्कथायां दृश्यविधानस्य समावेशो नाभूत्। महाकवेर्माघस्य भारवेश्च महाकाव्ये सर्गबन्धताया सीमां नातिक्रामते। तथैव नैषधकारस्य श्रीहर्षस्योत्कृष्टकाव्यसर्गकस्यापि स्थितिः तादृश्येवासीत्। पूर्वोक्तानां महाकवीनां काव्यस्य परिधावेव प्रतिभा सीमिता बभूव। न तथा महाकवेर्बाणस्य। अतः बाणभट्टविषये प्रस्तुतेयं प्रशंसोक्तिः 'बाणोच्छिष्टं जगत्सर्वम्' सर्वथा सार्थपूर्णा समुचिता च।

## Summarised Overview

संस्कृतगद्यसाहित्ये महाकवेर्बाणस्य महदुज्ज्वलं स्थानमस्ति। महाकवेर्बाणस्य समयः सप्तमशतकस्य पूर्वार्द्धात् किञ्चिदुत्तरार्द्धं यावत्। ब्रह्मणः प्रजापतेः मानसपुत्रेषु पुलहर्षेः पुत्रस्य वात्स्यायनस्य गोत्रसम्भवाः कुबेर-पाशुपत-अर्थपति- चित्रभानवः क्रमेणाभूवन्। चित्रभानोस्तनयः बाणभट्टः बभूव। पाञ्चालीरीतिगुम्फिताऽस्य शैली गद्यकाव्यकविभ्यः मानदण्डरूपेणादर्शभूताऽस्ति। प्रभावोत्पादकस्य गद्यस्य रचनायां ते परमप्रवीणाः सन्ति। 'बाणोच्छिष्टं जगत्सर्वम्' इत्यस्य शाब्दिकोऽर्थः वर्तते परवर्तिभूतं कल्पनामयं काव्यजगत् उच्छिष्टमेवेति। अत्रायमाशयः बाणोत्तरकवीनां कल्पनासु नवीनताया चमत्कारं नास्ति न वा मिलति। अत्र स्फुटोक्तिः - बाणोत्तरकाव्यकल्पनाया समस्तविधानां वर्णनं बाणकाव्येषु पूर्वत एव विद्यमानमस्ति। अपरञ्च- बाणस्य काव्यधारायामवगाहनेनावश्यं प्रतीयते यत्तेषां विमलधारायाः स्वच्छन्दता प्रवहणता च कामप्यलौकिकीं प्रतिभामुद्भावयति। यतो हि बाणात्पूर्ववर्तिना गद्यकविना सुबन्धुना यद्यपि 'वासवदत्ता' गद्यकथायाः प्रारम्भस्तु विहितः परश्च तत्कथायां दृश्यविधानस्य समावेशो नाभूत्। महाकवेर्माघस्य भारवेश्च महाकाव्ये सर्गबन्धताया सीमां नातिक्रामते। तथैव नैषधकारस्य श्रीहर्षस्योत्कृष्टकाव्यसर्गकस्यापि स्थितिः तादृश्येवासीत्। पूर्वोक्तानां महाकवीनां काव्यस्य परिधावेव प्रतिभा सीमिता बभूव। न तथा महाकवेर्बाणस्य। अतः बाणभट्टविषये प्रस्तुतेयं प्रशंसोक्तिः 'बाणोच्छिष्टं जगत्सर्वम्' सर्वथा सार्थपूर्णा समुचिता च। अतः संस्कृतसाहित्ये आदर्शकविः अस्ति महाकविः बाणभट्टः।

## Assignments

1. बाणभट्टस्य वंशपरम्परां विशदयत।
2. बाणभट्टस्य कृतयः काः? विशदयत।
3. बाणभट्टस्य काव्यशैली कीदृशी भवति?
4. बाणभट्टस्य कादम्बरीम् अधिकृत्य टिप्पणीं लिखत।
5. 'बाणोच्छिष्टं जगत्सर्वम्' इयमुक्तिः समर्थयत।

## Suggested Readings

1. Samkritasahityacaritram, Dr.K.Kunjunni Raja and Dr.M.S.Menon, Kerala sahitya Academi ,Thrissur.
2. A Classical History of Sanskrit Literature, R.Krishnamacariar, Motilal Banarsidass, New Delhi.

## References

1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अकादमी, वारणसी २०१९
2. The Kadambari of Banabhatta. With the commentaries of Bhanuchandra and Siddhachandra, Ed by Kashinath Pandurang parab, Nirnaya sagar press, Bombay 1916

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

SGOU

UNIT 4

# भोजराजः - जीवनकालः कृतयः च

## Learning Outcomes

- भोजस्य रचनाशैलीं जानाति ।
- भोजस्य जीवनकालं जानाति ।
- भोजस्य कृतीन् परिचाययति ।

## Background

पूर्वस्मिन् एकके बाणभट्टस्य जीवनकालः कृतयः इति विषयमधिकृत्य अध्ययनं कृतम्। अस्मिन् एकके चम्पूरामायणरचनकर्तारं भोजकविं परिचयामः।

## Keywords

१०१९ ई०, धारानगरीशः, परमारवंशीयः, एकविंशतिसंख्याकाः, काश्मीरकानन्तराजसमकालिकः, अनुप्रासः, विरोधाभासः, उत्प्रेक्षा ।

# Discussion

**भोजराजः**

चम्पूरामायणस्य प्रणेता भोजः परमारवंशीयः क्षत्रियः आसीत्। अस्मिन् वंशे सर्वप्रथमः उपेन्द्रनामको राजा बभूव, यस्य कालः ८०० ईस्वीतः ८३५ ईस्वीं यावदासीत्। भोजो हि धारानगरीशः सरस्वतीलक्ष्मीभूमीनां समान एवाश्रयः। अयं मालवाप्रदेशस्य शासक आसीत्। भोजराजस्य सरस्वतीकण्ठाभरणं हि काव्यशास्त्रेतिहासाकाशे ध्रुवनक्षत्रम्। स्ववंशस्य प्रशंसायां सरस्वतीकण्ठाभरणनामके ग्रन्थे भोजराजः स्वयमेव लिखत।

**जीवनकालः**

भोजस्य कालः १०१९ ई०

क्षत्रियाणां चत्वारो भेदाः सन्ति। परमारः, प्रतिहारः, चालूक्यः, चाहमानश्च। इमे चत्वारः स्ववंशं अग्नेरुद्भूतं स्वीकुर्वन्ति। अस्मिन् परमारवंशे एव भोजः स्वजनिं लेभे। राज्ञो भोजस्य कालः १०१९ ई० स्वीक्रियते।

**स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ।**
**सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ।।**

इति राजतरङ्गिणीवचनात् ज्ञायते। स चेति अनन्तराजः कलशपतिना। अनन्तराजश्च १०२० - ११५८ मितवैक्रामब्दानभितः स्थितिमानिति, राजतरङ्गिणीतो ज्ञायते। एतदतिरिक्तं १०७८ मितविक्रमाब्दे कृतं भोजस्य दानपत्रमपि लभ्यत इति तस्यापि स्थितिकालः १०३० - ११९० मितवैक्रमाब्दान्तरालयवर्तीति समनुमीयते।

**कृतयः**

भोजराजप्रणीताः ग्रन्थाः निम्नाङ्किता एकविंशतिसंख्याकाः सन्ति -

कृतयः एकविंशतिसंख्याकाः

| ग्रन्थनामानि | | विषयााः |
|---|---|---|
| १. आदित्यप्रतापसिद्धान्तः | | ज्यौतिषम् |
| २. राजमार्तण्डः | - | ज्यौतिषम् |
| ३. राजमृगाङ्कः | - | ज्यौतिषम् |
| ४. विद्वज्जनवल्लभः | - | ज्यौतिषम् |
| ५. आयुर्वेदसर्वस्वम् | - | वैद्यकम् |
| ६. विश्रान्तविद्याविनोदः | - | वैद्यकम् |
| ७. चाणक्यनीतिः | - | नीतिशास्त्रम् |
| ८. नामतालिका | - | कोषः |
| ९. तत्त्वप्रकाशः | - | शैवदर्शनम् |
| १०. शिवतत्त्वरत्नमालिका | - | शैवदर्शनम् |
| ११. युक्तिकल्पतरुः | - | शैवदर्शनम् |
| १२. सिद्धान्तसङ्ग्रहः | - | शैवदर्शनम् |
| १३. राजमार्त्तण्डः | - | पातञ्जलयोगसूत्रव्याख्या |
| २४. व्यवहारसमुच्चयः | - | धर्मशास्त्रः |
| १५. चारुचर्या | - | धर्मशास्त्रः |
| १६. शालिहोत्रम् | - | अश्ववैद्यकम् |
| १७. शब्दानुशासनम् | - | व्याकरणम् |
| १८. समराङ्गणसूत्रधारः | - | शिल्पशास्त्रम् |
| १९. सुभाषितप्रबन्धः | - | सुभाषितम् |
| २०. सरस्वतीकण्ठाभरणम् | - | अलङ्कारशास्त्रम् |
| २१. चम्पूरामायणम् | - | चम्पूकाव्यम् |

SGOU

**गद्यशैली**

चम्पूकाव्यस्य उपजीव्यं श्रीवाल्मीकीयं रामायणमेवास्ति; कुत्रचन साहित्यिक विच्छित्तिविशेषाय भोजराजेन कथायां परिवर्तनं कृतम्। अत एव भोजराजेन चम्पूरामायणस्यादौ स्पष्टरूपेण कथितम् -

**'वाल्मीकिगीत रघुपुङ्गवकीर्तिलेशै**
**स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।**
**गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः,**
**किं तर्पणं न विदधाति नरः पितृणाम्' ॥ इति।**

महर्षेः बाल्मीकेः मुखात् सर्वप्रथमम् -

**'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्' ॥ इति**

अनुप्रासः, विरोधाभासः, उत्प्रेक्षा अलङ्काराणां प्रयोगः

छन्दोमयी वाणी निस्सृता बभूव। तेन महर्षिः आश्चर्यचकितो बभूव। तदा तत्राविर्भूय ब्रह्मणाभिहितं यत् - 'ममानुभावेनैवास्याः वाण्याः विलासमवेहि। त्वया लौकिकानां छन्दसामवतरणं सञ्जातम् अत एव श्रीरामचरितस्य निबन्धनं कुरु'। तत्र ब्रह्मण आविर्भावं वर्णयता भोजराजेनाभिहितम् - 'वाणीविलासमपरत्र कृतोपलम्भमम्भोजभूरसहमान इवाविरासीत्'।। इति। भोजराजः चित्रकाव्यस्य प्रणयनेऽतीव निपुण आसीत्।तथाहि - 'एनां पुराणनगरी नगरीतिसालां सालाभिरामभुजनि- -र्जितयक्षराजः। हेलाभिभूतजगतां रजनीचराणां राजा चिरादवति रावणनामधेयः'।। अत्रानुप्रासालङ्कारस्यातीव मनोज्ञो विन्यासो वर्त्तते। निम्नाङ्किते श्लोके

भोजराजः विरोधाभासोत्प्रेक्षयोः मनोज्ञः सन्निवेशः कृतो वर्तते।

**'सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव रामभद्रः।**
**क्षात्रक्रमात् पिप्पलदण्डयोग्यः पलाशदण्डाहृतपाणिरासीत्' ॥**

गङ्गावतरणविषयकेषु त्रिषु श्लोकेषु माघस्य शैली चम्पूरामायणेऽवलोकनीया वर्तते। तथाहि -

**'अथ वीचीचयच्छन्नदिगन्तगगनान्तरा।**
**शशाङ्कशङ्खसम्भिन्नतारामौक्तिकदन्तुरा॥**
**तरङ्गा कृष्टमार्तण्डतुर ङ्गायासितारुणा।**
**फेनच्छन्नस्वमातङ्गमार्गणब्यग्रवासवा॥**
**आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा।**
**एकोदकनभोमार्ग दिङ्मूढ दिवसेश्वरा'** ॥ इति।

किन्तु निम्नाङ्कितेषु श्लोकेषु कालिदासीयः प्रसादगुणो वर्तते।

**'कल्याणवादसुखितां सहसैव कान्तां**
**कान्तारचारकथया कलुषीचकार।**
**अम्भोदनादमुदितां विपिने मयूरीं**
**सन्त्रासयन्निव धनुर्ध्वनिना पुलिन्दः'** ॥

चम्पूरामायणस्य कविता हृदयपक्षमधिकं स्पृशति। यथा तारा रामंप्रत्याह किष्किन्धाकाण्डे -

**'सन्त्रस्य पूर्वममुतस्तव बन्धुरेष,**
**भेजे यथाद्रिमकुतोभय मृष्यमूकम्।**
**भर्ता ममायमपि रामशरैरभेद्यं**
**प्राप्तो मदीयहृदयच्छलमद्रिदुर्गम्'** ॥ इति।

हते वालिनि ताराऽतीव दुःखिता यदा रामं वक्ति-

**'नाहं सुकेतुतनया न च सप्तसाली;**
**वाली न च त्रिभुवनप्रथितप्रभावः।**
**तारास्मि वज्रहृदया विशिखैरभेद्या,**
**धन्वी कथं भवति राघवमामविद्धा'** ॥

तदा तु कारुण्यमतिवेलं भवति प्रवाहितम्। अरण्यकाण्डस्य हेमन्तवर्णनम्, सुन्दरकाण्डस्य सायंकालवर्णनम्, किष्किन्धाकाण्डस्य वर्षर्तुवर्णनम् इतीमानि वर्णनान्यतीव मनोज्ञानि सन्ति।

यद्यपि लङ्काकाण्डं लक्ष्मणसुरेः प्रणीतमास्ते तथापि लङ्काकाण्डस्य भाषा भोजस्य भाषयातीव साम्यं बिभर्ति भोजराजः। चम्पूरामायणे महर्षेः वाल्मीकेः कथायाः भावस्यार्थस्य चाप्यनुसरणं करोति। अत एव सः महर्षेः वाल्मीकेविषये अतीव प्रश्रितो वर्तते।

## Summarised Overview

चम्पूरामायणस्य प्रणेता भोजः परमारवंशीयः क्षत्रियः आसीत्। अस्मिन् वंशे सर्वप्रथमः उपेन्द्रनामको राजा बभूव, यस्य कालः ८०० ईस्वीतः ८३५ ईस्वीं यावदासीत्। भोजो हि धारानगरीशः सरस्वतीलक्ष्मीभूमीनां समान एवाश्रयः। सः मालवाप्रदेशस्य शासकः आसीत्।राज्ञो भोजस्य कालः १०१९ ई० स्वीक्रियते। काश्मीरकानन्तराजसमकालिकः आसीत्। आयुर्वेदः, ज्योतिषं, शैवदर्शनं इत्यादि विषयेषु भोजस्य काव्यग्रन्थाः अद्वितीया एव। भोजराजः चित्रकाव्यस्य प्रणयनेऽतीव निपुण आसीत्। भोजराजस्य श्लोकेषु अनुप्रासालङ्कारस्यातीव मनोज्ञो विन्यासो वर्तते। अपि च विरोधाभासोत्प्रेक्षयोः मनोज्ञः सन्निवेशः कृतो वर्तते। भोजराजेन एकविंशतिसंख्याकाः ग्रन्थाः प्रणीताः। भोजराजस्य काव्यस्य भारतीयसंस्कृतसाहित्ये महत्वपूर्णं स्थानं वर्तते। तस्य कृतयः न केवलं साहित्यदृष्ट्या महत्वपूर्णाः, अपि तु तस्य बहुमुखीज्ञानं प्रज्ञा च भारतीयपरम्परायां अमूल्यं अस्ति।

## Assignments

1. भोजस्य जीवनकालः विचारयत।
2. भोजस्य कृतयः के?
3. भोजस्य चम्पूरामायणस्य शास्त्रीयमध्ययनं कुरुत।

## Suggested Readings


1. Samkritasahityacaritram, Dr.K.Kunjunni Raja and Dr.M.S.Menon, Kerala sahitya Academi ,Thrissur.
2. A Classical History of Sanskrit Literature, R.Krishnamacariar, Motilal Banarsidass, New Delhi.


## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. आचार्य लोकमणि दाहालः संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अकादमी, वारणसी २०१९


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# कादम्बरी - शुकनासोपदेशः

# BLOCK - 2

SGOU

UNIT 1

# ‘समुपस्थितयौवराज्याभिषेकं च तम्’ इत्यारभ्य ‘राज्यविषविकारतन्द्राप्रदाराजलक्ष्मीः’ पर्यन्तम्

## Learning Outcomes

- गद्यसाहित्यस्य परिचयः।
- गुरूपदेशस्य महत्वम् अवगच्छति।
- नूतनपदावलीपरिचयः जायते, पद-पदार्थबन्धं स्थापयति।

## Background

सुविदितमस्ति यदिह काव्यसंसारे कविरेव प्रजापतिः भवति, एवं भूतस्य कवेः भावः काव्यं भवति। पौराणिककालादारभ्य अधुना पर्यन्तमनेकविधानि काव्यलक्षणनि उपलभ्यन्ते, तथैव काव्यस्य प्रयोजनमप्यनेकविधं प्रतिपादितमास्ति। दृश्यश्रव्यत्वभेदेन काव्यं द्विधा मतम् । गद्य-पद्य-चम्पू-भेदैस्त्रिविधं स्वरूपम् । गद्यकाव्यं तु द्विधा विभज्यते कथा आख्यायिका चेति । सुविदितमस्ति प्रेक्षावतां समीक्षकाणां मध्ये यत् 'कादम्बरी' गद्यकथारूपा महाकवेर्बाणभट्टस्य सर्वश्रेष्ठेयं रचना वरीवर्ति। न केवलं संस्कृतसाहित्यस्यैवोज्ज्वलं रत्नमस्ति, अपि तु विश्वसाहित्यस्यानुपमं ग्रन्थ-रत्नमिदम्। पाश्चात्या विद्वांसोऽपि भारतीयशब्दशास्त्रस्यारण्यमिव दुरवगाहं मन्यन्ते। अस्मिन् ग्रन्थरत्ने भाषाभावयोः तथा शब्दार्थयोश्च समुचितः समावेशः दृश्यते। वर्णनाचातुरी शब्दविन्यासश्चेत्येतद्द्वयं प्रकृतवर्णनावलोकने नैव भविष्यति। क्वचिद्राज्ञः शूद्रकस्य वर्णने गङ्गाप्रवाह इव सुविमला भाषा। क्वचिद् विन्ध्यगिरेः उच्चावचविकटारण्यस्य वर्णनं, क्वचिदपूर्वसाहसिकस्य शबरसेनापतेः रोमाञ्चितं

वर्णनम्, क्वचिच्च धर्मस्य साक्षान्मूर्त्तेः, सदयभावापन्नतायाः परमावतारस्य, आध्यात्मिकतायाः प्रतीकस्य जाबालिमुनेः स्वरूपनिरूपणम्। एवमेव परमपावनाश्रमस्य क्वचिद् सुचारुवर्णनम्। अरसिकमपि सहसा रसप्लुतं करोति। अलङ्काराणां विशेषतः उपमोत्प्रेक्षा-संसृष्टि-सङ्करालङ्काराणां मनोहारिणी छठा वाचकानां श्रावकानाञ्चातिशयमानन्दं जनयतीति सर्वे साहित्यिकाः जानन्ति । यथार्थतः रसालङ्कारयोः संमिश्रणे भाषाभावयोः परस्परसम्पर्ककल्पनावर्णनयोरनुरूपसंघटने संस्कृतसाहित्ये प्राचीनार्वाचीनसर्वकथातिशायिनी कादम्बरी अनुपमेति नास्त्यत्र सन्देहावसरः।

शृङ्गाररसराजप्रधानीभूता कादम्बरी कथा विद्योतते। करुणाद्भुतवीररसाः सहयोगमापन्नाः बीभत्सशान्तादयश्च क्वाचित्करूपेणोन्मेषं प्राप्नुवन्ति। एवञ्चात्र शुद्धशुचिशृङ्गारस्य वर्णनम्। प्रस्तुतायामस्यां कादम्बर्यां कविरयं ओजोगुणस्य चरमां सीमां चुम्बति। सत्यमेवोक्तं केनापि विदुषा - 'ओजः समासभूयस्त्वम् एतद् गद्यस्य जीवितमिति। दीर्घसमासानामपि प्रयोगाः पदे पदे सन्त्येव।

पात्राणां यथास्थानविनिवेशितानां चरित्रचित्रणे श्रीमता बाणभट्टेनाद्भुतचमत्कारः प्रदर्शितः। कादम्बर्याः अखिलानि जीवनचित्राणि प्रस्तुतीकृतानि सन्ति। नायिकाचित्रणे कविना नावशिष्टं स्थापितम्। मानवजीवनस्य समग्रस्य रूपस्य वर्णनमतिशयेन कृतम्। हारीतमुनेर्महानुभावता, राज्ञः तारापीडस्य परोपकारपरायणता, विलासवत्याः प्रेमालोलुपता, मन्त्रिणः शुकनासस्य विश्वसनीयता, कपिञ्जलस्य मित्रवात्सल्यं, महाश्वेतायाः शारीरिक-मानसिक पवित्रता, पत्रलेखायाः स्वामिभक्तिः च अतिशयेन पाठकानां हृदयानि रञ्जयति। कादम्बर्यां विशेषरूपेण चर्चितस्य राजकुमाराय चन्द्रापीडाय शुकनासनामकेन अमात्येन याः उपदेशाः वितरिता तदेव शुकनासोपदेशनाम्ना व्यवहृतः। अस्मिन् एकके शुकनासोपदेशे अनर्थपरम्परानिरूपणं, गुरूपदेशस्य वैशिष्ट्यं, तस्य उचितः कालः इत्यादि - विषयान् पश्यामः।

## Keywords

चन्द्रापीडः, शुकनासः, प्रधानामात्यः, लक्ष्मीमदः, गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्,

यौवनारम्भः, भाजनान्युपदेशानाम्, अपगतमले, कुसुमशरशरप्रहरजर्जिरे, अखिलमलप्रक्षालनक्षमं, राज्यविषविकारतन्द्रीप्रदा।

## Discussion

महाराजः तारापीडः चन्द्रपीडनामकस्य स्वपुत्रस्य यौवराज्याभिषेकार्थम् उपयुक्तसामग्रीसमुदायस्य एकत्रीकरणार्थम् स्वसेवकान् आज्ञापितवान्। तदनन्तरं राजकुमारं चन्द्रापीडं प्रति यौवराज्याभिषेकात् पूर्वं प्रधानामात्यः शुकनासः राजनीतिविज्ञानविषये उपदिशति।

शुकनासस्य उपदेशं श्रोतुं चन्द्रापीडः आगतवान्

**समुपस्थितयौवराज्याभिषेकञ्च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनासः सविस्तरमुवाच।**

**व्याख्या -** समुपस्थितः -विद्यमानः, यौवराज्यभिषेकं - युवराजपदप्रतिष्ठया यस्य तं तादृशम्, च, कदाचित् - कस्मिंश्चित् समये, दर्शनार्थं - अवलोकनार्थं, आगतं - प्राप्तम्, आरूढविनयम् - सञ्जातविनयम्, अपि, तं - चन्द्रापीडम्, शुकनासः - प्रधानमन्त्री, विनीततरम् - अतिशयेन विनयिनम्, कर्तुं, इच्छन् - अभिलषन्, सविस्तरम् - विस्तरेण, उवाच- अब्रवीत्।

शुकनासस्य उपदेशः आरभते

**सारः** - कदाचित् स्वयमेव दर्शनार्थम् उपस्थितं, युवराजपदे शीघ्रं सम्भाविताभिषेकं विनयशीलम् अपि चन्द्रापीडं विनीततरं कर्तुं इच्छन् शुकनासः विस्तरेण उवाच।

**तात चन्द्रापीड! विदिततवेदितव्यस्याऽधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एवाऽभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्।**

**व्याख्या** - तात - वत्स, चन्द्रापीड!, विदितवेदितव्यस्य - समस्तज्ञातविषयो येन तस्य तादृशस्य, तथा अधीतानि - पठितानि , सर्वशास्त्रस्य - सर्वाणि समस्तानि शास्त्राणि वेदादीनि येन तस्य तादृशस्य, ते - तव , अल्पम् - स्तोकं, अपि, उपदेष्टव्यम् - वक्तव्यं, न, अस्ति- न विद्यते। केवलं, च, निसर्गतः - स्वभावतः, एव, अतिगहनं, यौवनप्रभवम् तारुण्यात् प्रभवतीति समुत्पद्यते, तमः - तमोगुणसमुत्पन्नमज्ञानेन अन्धकारः, अभानुभेद्यम् - न सूर्येण उच्छेद्यम्, अरत्नालोकच्छेद्यम् - न रत्नानां मणीनां कान्त्या विनाशयितुं शक्यम्, अत एव अप्रदीपप्रभापनेयम् अतिशयेन अलब्धमध्यम् (भवति)। विग्रहः - अभानुभेद्यम् - भानुना भेत्तु योग्यं भानुभेद्यम्। न भानुभेद्यम् अभानुभेद्यम्।

यौवनप्रभावः अन्धकारः सूर्यस्य किरणैः दूरीकर्तुं न शक्यः

**सारः** - वत्स ! ज्ञातुं समर्थस्य ते किमपि वक्तव्यं नास्ति। परन्तु स्वभावत एव गहनतमः युवावस्थाप्रभवः अन्धकारः सूर्यस्य किरणैः, मणीनां तेजोभिः दीपकानां प्रकाशेनापि च नैव दूरीकर्तु शक्यः।

**अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽतितीव्रो दर्पदाहज्वरोष्मा।**

**व्याख्या** - लक्ष्मीमदः - धनसम्पत्तेः मदः तदुत्पन्नमत्तता, अपरिणामोपशमः - वृद्धावस्थायां न शान्तिं प्राप्तः, अत एव दारुणः - भीषणः, ऐश्वर्यतिमिरान्धत्वम् - धनसम्पत्तिरेव तिमिरं तिमिरसंज्ञकनेत्रव्याधिः तेन अन्धत्वम् अवलोकनशून्यत्वम्, अनञ्जनवर्तिसाध्यम्- नैव बिडलादि - वसाकज्वलादिना, साध्यम् - प्रतिक्रियते इति तत्तादृशं, अपरं -प्रसिद्धात्, कष्टम् - दुःखकरम्। दर्पदाहज्वरोष्मा - सम्पत्यहङ्कार एव दाहज्वरः

धनोन्मादः तु जीवनपर्यन्तं न उपशमति

तीव्रतापः तस्य ऊष्मा उष्मणत्वं, अशिशिरोपचारहार्य्यः - नैव शिशिरैः - शीतलैः, उपचारैः - स्रक्कन्दनादिभिः, हार्यः - हर्तुं योग्यः, शमनीयः (सन्) अतितीव्रः - अतितीक्ष्णः भवति।

विग्रहः - अपरिणामोपशमः - परिणामेन उपशमयितुं योग्यः परिणामोपशमः, न परिणामोपशमः अपरिणामोपशमः।

**सारः** - साधारणमदानां किञ्चित् कालानन्तरं स्वयमेव उपशमो भवति, परन्तु धनोन्मादस्य तु जीवनपर्यन्तं न उपशमो भवति। तिमिरसंज्ञको नेत्ररोगस्तु अञ्जनादिभिः साध्यः भवति, किन्तु धनजन्यतिमिरान्धत्वम् अञ्जनादिभिः अपि अचिकित्स्यं एव भवति। अन्यविधोष्मा साधारणोपचारैः दूरीकर्तु शक्या दर्पोष्मा तु शीतलोपचारादिभिः अपि अपरिहार्यं एव भवति।

**सततममूलमन्त्रशम्यो विषमो विषयविषास्वादमोहः। नित्यमस्नानशौच-बाध्यो बलवान् रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति विस्तरेणाभिधीयसे।**

विषयविषास्वादमोहः मन्त्रादिभिः न दूरीकर्तुं शक्यः

**व्याख्या** - विषयविषास्वादमोहः -स्रक्चन्दनादयः एव विषाणि अनर्थकारणत्वाद् गरलानि तेषां आस्वादनेन सम्भोगेन यो मोहो मूर्च्छा (अज्ञानता), सततम् निरन्तरं, अमूलमन्त्रशम्यो, न मूलैः - ओषधिमूलैः, मन्त्रैः - विषनिवारकमन्त्रैश्च शम्यो - निवर्त्तयितुं शक्यः इति स तादृशः, विषमः - कठिनः। रागमलावलेपः - रागः (विषयासक्तिः) एव मलः - पङ्कः तस्य अवलेपः - लेपनम्, नित्यम् - प्रतिदिनम्, अस्नानशौचबाध्यः - न स्नानेन - मज्जनादिना, शौचेन - शुचिक्रियया, च बाध्यः - नाशनीयः। बलवान् - नितान्तः। राज्यसुखसन्निपातनिद्रा - राज्यम् - आधिपत्यम् तस्मात् तस्य वा यत् सुखं - आनन्दः तदेव सन्निपातनिद्रा -सन्निपात-प्रमीला यद्वा-सन्निपातः - संघात एव निद्रा, अजस्रम् - नित्यम्, अक्षपावसानप्रबोधा

- न क्षपावसाने रात्र्यन्ते प्रबोधाश्चैतन्योदयो यस्यां सा तादृशी भवति, अत एवास्य अन्यनिद्रया अपेक्षया घोरत्वं इत्याशयः। इति होतोः विस्तरेण अभिधीयसे। त्वयि सम्भाव्यमानानां तारुण्योत्पन्नज्ञानादीनां निवृत्त्यर्थ-मित्याशयः।

विग्रहः - अमूलमन्त्रशम्यः - मूलमन्त्रेण शमयितुं योग्यः मूलमन्त्रशम्यः, न मूलमन्त्रशम्यः अमूलमन्त्रशम्यः।

**सारः -** विषोत्पन्ना मूर्च्छा मन्त्रोषिधिविशेषैः शमयितुं शक्या, किन्तु विषय वासनानुरागेण जनितो मोहः मन्त्रादिभिः अपि न दूरीकर्तुं शक्यः। साधारणमललेपं स्नानादिभिः दूरीभवति किन्तु अनुरागामलावलेपः जलादिभिः अप्रक्षालनीय एव। साधारणी निद्रा रात्र्यवसाने समापनीया भवति परन्तु साम्राज्यसुखसमूहनिद्रायां कदापि न जागृतिः भवति।

**१. गर्भेश्वरत्वम्, २. अभिनवयौवनत्वम्, ३. अप्रतिमरूपत्वम्, ४. अमानुष-शक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषा-मायतनम्, किमुत समवायः।**

गर्भेश्वरत्वमित्यादि अनर्थमूलाः जायन्ते।

**व्याख्या -** गर्भेश्वरत्वम् - गर्भात् अशैशवात् ईश्वरत्वं धनशालित्वम्, अभिनवयौवनत्वम् - अभिनवं नूतनं यौवनं तारुण्यं यस्य तस्य भावः, अप्रतिमरूपत्वम् - अप्रतिमं निरुपमं रूपं सौन्दर्यं यस्य तस्य भावम्, च अमानुषशक्तित्वं - अलौकिकी शक्तिः शारीरिकसामर्थ्यं यस्य तस्य भावः तत्त्वञ्च, इति इयं खलु - निश्चयेन महती - गरीयसी, अनर्थपरम्परा-विपत्तिपङ्क्तिः। एषाम् - गर्भेश्वरत्वादीनां मध्ये, सर्वेषां - निखिलानाम्, सर्वाविनयानाम् - सर्वेषां दुर्व्यवहारणाम्, आयतनम् - आश्रयस्थानम्, समवायः - समूहः, किमुत - किम् वक्तव्यम्।

**सारः -** जन्मजात प्रभुत्वादि चतुष्टयेषु अनर्थमूलेषु यदि पृथक् पृथक् रूपेण एकैकमपि सर्वेषाम् अविनयादि दोषाणाम् निवासस्थानं तर्हि का कथा एतेषां समूहस्य।

**यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागेव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्त्रं समुद्धूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततदुरन्तेयमुपभोगमृगतृष्णिका नवयौवनकषा - यितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।**

युवावस्था प्रायः दोषपूर्णा भवति

**व्याख्या** - च - तथा, प्रायः - बाहुल्येन, यौवनारम्भे - तारुण्यस्य आरम्भकाले, शास्त्रजलप्रक्षालननिर्मला - शास्त्रमेव जलं - सलिलं स्वच्छहेतुत्वात्, तेन प्रक्षालनेन निर्मलापि - स्वच्छा अपि बुद्धिः - प्रज्ञा, कालुष्यम् - समलत्वम्, उपयाति - प्राप्नोति। अनुज्झिता - अपरित्यक्ता, धवलता - श्वेतता यया सा तादृशी सत्यपि, यूनां - तरुणानां, दृष्टिः - अवलोकनम् अपि, सरागा - अनुरागयुक्ता, एव - हि भवति। च - तथा, शुष्कपत्त्रं - नीरसदलमिव, समुद्धूतरजोभ्रान्तिः - समुद्धूता-समुत्पन्ना रजसा रजोगुणेन, भ्रान्तिः - भ्रमः, अतस्मिन् तद् बुद्धिरिति, वात्या - वातसमूहेन, इव - समानः, प्रकृतिः - स्वभावः, यौवनसमये - तारुण्यकाले, आत्मेच्छया - स्वेच्छया, पुरुषं - नरं, अतिदूरम् - अतिविप्रकृष्टम्, अपहरति - नयति। च सततं - निरन्तरं, इन्द्रियाणि - करणान्येव, हरिणान् - मृगान्, हारिणी - हरतीति सा तादृशी इयम्, उपभोगः - रमण्यादिसंभोगाभिलाषैव, मृगतृष्णिका - मरीचिका, अतिदुरन्ता - अत्यन्तदुर्निवारः (अस्ति)। च नवयौवनेन कषायितः - नवयौवनेन - अभिनवतारुण्येन, कषायितः - विकृतः, आत्मा - स्वरूपम् यस्य तस्य पुरुषेति शेषः यद्वा आत्मनः -

आस्वाद्यमानानि - अनुभूयमानानि, सलिलानि - जलानि इव विषयस्वरूपाणि - भोग्यवस्तूनि, मनसः मधुरतराणि - अतिशयेन सुरसानि, आपतन्ति - अवगम्यन्ते । च - किञ्च, उन्मार्गप्रवर्त्तकः - उन्मार्गे - कुपथे, प्रवर्त्तकः - प्रेरकः, दिङ्मोहः - दिशाभ्रान्तिः, इव - यथा, विषयेषु - चन्दनवनितादिषु, अत्यासङ्गः - अतीवासक्तिः. पुरुषम् - नरम्, नाशयति - नाशं प्रापयति ।

विग्रहः - शास्त्रजलप्रक्षालनम् - शास्त्रमेव जलं शास्त्रजलं, तेन प्रक्षालनं शास्त्रजलप्रक्षालनम् ।

**सारः -** शास्त्ररूपजलप्रक्षालनेन मलरहितापि विचारशक्तिः युवावस्थाजाले प्रायः दोषपूर्णा भवति। गृहीतश्वेतत्वम् अपि तरुणानां नेत्रम् रागयुक्तं एव भवति। यथा भ्रमता धूलीकरणसमन्वितेन वायुसमुदायेन शुष्कतृण-पत्रादिकं अतिदूरं नीयते तथैव युवावस्थायुक्तः पुरुषः अपि संवर्धितस्य रजोगुणस्य विभ्रमेण संयुक्तया प्रकृत्या स्वेच्छया अतिदूरम् अपनीयते। नितरन्तरं नेत्रादि इन्द्रियरूपाणां मृगाणां हारिणी, अङ्गनाद्युपभोगरूपा मृगमरीचिका परिणामेऽत्यन्तदुःखप्रदा। यथाऽमलक्यादि कषायद्रव्याणां उपभोगानन्तरं मधुरं जलं अधिकं मधुरं प्रतीयते तथैव युवावस्थाजनित-वासनादिविषयजातं मधुरतरं अनुभवति। यथा दिग्भ्रमः पथिकं कुमार्गे नयति, तथैव विपरीताचारणशीलनं पालनादिविषयशक्तिरपि पुरुषं उत्तममार्गात् पातयति।

**भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभ्यव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदाय-मधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव दोषजातं प्रदोषसमय-**

**निशाकर इव। गुरूपदेशः प्रशमहेतुर्वयःपरिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।**

उचितपात्रे उपदेशः करणीयः

**व्याख्या** - भवादृशा एव - त्वादृशा एव जना इति शेषः, उपदेशानाम् - शिक्षाणाम्, भाजनानि - पात्राणि, भवन्ति - जायन्ते। हि - यतः, अपगतमले - अपगतः (शास्त्रोपदेशेन) दूरीभूतः मलः कालुष्यं कामक्रोधादिरित्यर्थः यस्मात् तथाविधे, मनसि - चेतसि, स्फटिकमणौ - स्फटिकरत्ने, रजनिकरगभस्तयः- रजनिकरः चन्द्रः तस्य गभस्तयः किरणानि, इव-तद्वत्, उपदेशगुणाः - शिक्षागुणाः, सुखेन - अनायासेन, विशन्ति- प्रविशन्ति। गुरुवचनम् - गुरोः आचार्यस्य वचनम् वाक्यम्, अमलमपि-कल्याणकारि अपि, सलिलमिव - जलमिव, अभव्यस्य- असाधोः असंस्कृतजनस्येति यावत्, श्रवणस्थितं कर्णगतं, (सत्), महत्- अत्यन्तम्, शूलं - वेदनाम्, उपजनयति- उत्पादयति । तु-पुनः, इतरस्य - अभव्येतरस्य सुसंस्कृत- जनस्येति यावत्, (गुरुवाक्यम्), करिणः - हस्तिनः, शङ्खाभरणमिव - शङ्खस्य आभूषणमिव, अधिकतरम् - अतिशयम्, आननशोभासमुदयम् - आननस्य मुखस्य शोभा सौन्दर्यम् तस्याः समुदयः - समूहः, तम्, उपजनयति- उत्पादयति। च - किञ्च, (गुरु-वचनम्), प्रदोषसमयनिशाकर इव - प्रदोषसमयः रजनीमुखकालः सूर्यास्तानन्तरकालं इति यावत् तस्य निशाकरः चन्द्रः इव, अतिमलिनमपि - अतिशयश्याममपि, अन्धकारमिव - तिमिरमिव, सकलं - समस्तं, दोषजातं - दूषणसमूहम् कामक्रोधादि - समूहमित्यर्थः, हरति - अपाकरोति। प्रशमहेतुः - प्रशमस्य शान्तेः हेतुः कारणं, गुरूपदेशः - गुरोः शिक्षा, पलितरूपेण - शुक्लतारूपेण, शिरसिज-कपालम् - कचकलापम्, अमलीकुर्वन् - निर्मलीकुर्वन्, वयः परिणाम इव - वयसः प्रवस्थायाः परिणामः परिणतिः इव, तदेव - दोषजातं, गुणरूपेण परिणमयति -

वैशिष्ट्यरूपेण अवस्थान्तरं गमयति भूषणं करोतीत्यर्थः।

विग्रहः - अपगतमले - अपगतः मलः यस्मात् तत् अपगतमलं, तस्मिन्।

**सारः** - त्वादृश एव जनाः शिक्षाणाम् उपयुक्तपात्राणि भवन्ति। यतः निर्मले स्फटिकमणौ चन्द्रकिरणाः यथा अनायासेनैव प्रविशन्ति तथैव कलुषशून्ये एव चेतसि हितप्रदा उपदेशा प्रवेष्टुं समर्था भवन्ति। यथा कर्णविवरस्थं स्वच्छमपि जलं कर्णपीडां करोति। तथैव कर्णगतं दोषरहितं गुरूपदेशवचनम् असाधून् अधिकं पीडयति। शङ्खाभरणं यथा हस्तिशोभानिकरम् अधिकतरं वर्धयति, तथैव शिष्टजनहृदयगतं 'गुरूपदेशवचनं मुखमण्डलसैन्दर्यसमूहम् अत्यधिकं वर्धयति । यथा सायङ्कालीनश्चन्द्रः सघनमपि रात्रिजम् अन्धकारं दूरीकरोति तथैव गुरूपदेशोऽपि अज्ञानादि समस्तदोषसमूहान् नाशयति। यथा इन्द्रियाणां शिथिलतापादकं वार्द्धक्यं कृष्णं केशसमूहं श्वेतीकुर्वन् तमेव परिपाकं नयति तथैव अन्तरिन्द्रियस्य प्रशमकालः सद्गुरूपदेशः निखिलमपि पुरुषस्य दोषसमूहं गुणरूपेण परिवर्तयति।

**अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। कुसुमशरशर-प्रहारजर्जरिते हि हृदि जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं वाविनयस्य। चन्दनप्रभवो न दहति किमनलः? किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ?**

कामशरबाधिते हृदये उपदेशवचनं निष्फलं भवति

**व्याख्या** - अनास्वादितविषयरसस्य - न आस्वादितः न उपभुक्तः अनुभवविषयीकृतो वा विषयरसः - सांसारिकभोग्यपदार्थगुणः येन तस्य, ते - तव, अयमेव - एष एव, उपदेशस्य - शिक्षायाः, कालः- समयः (विद्यते)। हि - यतः, कुसुमशरशरप्रहारजर्जरिते - कुसुमशरः कन्दर्पः तस्य शराः बाणाः तेषां प्रहारा आघाताः तैः जर्जरितम् शिथिलीभूतम् तस्मिन्, हृदि- मनसि, जलमिव - पानीयमिव, उपदिष्टम् - उपदेशः, गलति - क्षरति। च - किंच, दुष्प्रकृतेः - दुःस्वभावस्य चरित्रहीनस्येति यावत्, अन्वयः-

सत्कुलम्, वा- अथवा, श्रुतं - शास्त्रं, विनयस्य - नम्रतायाः, अकारणं भवति - हेतुर्न भवतीत्यर्थः। चन्दनप्रभवः- चन्दनं मलयजतरुः तस्मात् प्रभवः उत्पत्तिः यस्य तथाविधः, अनलः - अग्निः, किं न दहति - किं न भस्मीकरोति अपि तु दहत्येवेत्यर्थः, किं, वा - अथवा, प्रशमहेतुनापि - शान्तिकारणभूतेनापि, वारिणा - जलेन, वडवानलः - वाडवाग्निः, न प्रचण्डतरी भवति - न समुद्दीप्तो भवति, अपि तु भवत्येव इत्यर्थः।

विग्रहः - अनास्वादितविषयरसस्य - न आस्वादितः विषयरसः येन सः अनास्वादितविषयरसः, तस्य।

**सारः -** अयमेव अनास्वादितवासनारसस्य ते उपदेशावसरः। यतः कामशराघातेन सहस्रशः खण्डिते हृदये उपदेशवचनं तथैव न तिष्ठति यथा सच्छिद्रायाम् चालन्यां सलिलम्। शुद्धवंशोत्पन्नदुष्टानां अविनयत्वं शन्तिप्रदेशेनापि वर्धते एव। यतः शीतस्वभावादपि चन्दनात् उत्पन्नः किं न वर्धते ? अर्थात् वर्धते एव। अग्निशमनहेतुना जलेन बडवानलः वर्धते एव।

**गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः। विशेषेण राज्ञाम्। विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्। उद्दामदर्पश्वयथुस्थगितश्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति। शृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्। अहङ्कार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारिणि धनानि राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः।**

**व्याख्या** - च - किञ्च, गुरूपदेशः - गुरूणाम् हितोपदेष्टृणाम् उपदेशः - शिक्षा, नाम - कोमलामन्त्रणार्थकमव्ययमिदम्, पुरुषाणाम् - जनानाम्, अखिलमलप्रक्षालनक्षमम् - अखिलः समस्तः यो मलः कालुष्यम्

गुरूपदेशेन मनुष्यदोषाः दूरीक्रियन्ते

कामक्रोधादिरित्यर्थः तस्य प्रक्षालनं - शुचीकरणं तस्मिन् क्षमम् - समर्थम्, अजलस्नानम् - जलरहितस्नानम्, अनुपजातपलितादिवैरूप्यम् - अनुपजातम् - अनुत्पन्नम् पलितादि वार्धक्यप्रयुक्तकेशश्वेतत्वादि वैरूप्यं विकृतिः यस्मिन् तत् तादृशम्, (तथा अजरम् - न विद्यते जरा जीर्णत्वं यस्मिन् तथाभूतम्) वृद्धत्वम् - स्थविरत्वम्, अनारोपितमेदोदोषम् - न आरोपितः उत्पादितः मेदोदोषः स्थूलत्वोत्पादकमेदोनामकधातुवृद्धिदोषो येन तत् तथाविधम्, गुरूकरणम् - गौरवहेतुः, असुवर्णविरचनम् - न सुवर्णेन - स्वर्णेन विरचना - निर्माणं यस्य तत् तादृशम् अग्राम्यम् - ग्राम्यत्वदोषरहितम् प्रशस्यमित्यर्थः, कर्णाभरणम् - कर्णभूषणम्, अतीतज्योतिः - अतीतं गतं ज्योतिः तेजः यस्मात् स एवंभूतः, आलोकः - प्रकाशः, नोद्वेगकरः- न सन्तापजनकः, प्रजागरः - जागरणम्। राज्ञां नृपाणाम्, विशेषेण - आधिक्येन (गुरूपदेशः उपकारी भवति)। हि - यतः, विरलाः - अल्पाः (एव), तेषां राज्ञाम्, उपदेष्टारः - उपदेशदातारः (भवन्ति)। प्रतिशब्दक इव- प्रतिध्वनिरिव, जनः - लोकः, भयात् - त्रासात्, राजवचनं - राज्ञः नृपस्य वचनं वचः, अनुगच्छति - अनुसरति (न तु प्रत्युत्तरं दातुं समर्थ इति भावः)। उद्दामदर्पश्वयथुस्थगितश्रवणविवराः- उद्दामाः - उत्कटाः दर्पाः अहंकाराः एव श्वयथवः शोथाः तैः स्थगितानि आच्छादितानि श्रवणविवराणि कर्णच्छिद्राणि येषां ते तथाविधाः ते - राजानः, उपदिश्यमानानि - कथ्यमानानि, न श्रृण्वन्ति - आकर्णयन्ति। श्रृण्वन्तोऽपि - आकर्णयन्तोऽपि, गजनिमीलितेन -गजः हस्ती तद्वत् यत् निमीलितं नेत्रसंकोचः तेन, अवधीरयन्तः - अवहेलनां कुर्वन्तः, हितोपदेशदायिनः- कल्याणशिक्षादातॄन्, गुरून्, खेदयन्ति - क्लेशयन्ति। हि - यतः, राजप्रकृतिः- राज्ञां स्वभावः, अहंकारदाहज्वरमूर्च्छान्धकारिता - अहङ्कारः - दर्पः स एव दाहज्वरः - तीव्रतापः तेन या मूर्च्छा - मोहः तया अन्धकारिता - अन्धकारं इव आचरिता, अत एव विह्वला - व्याकुला

भवति। धनानि - सम्पदः, अलीकाभिमानोन्मादकारिणि - अलीकः मिथ्या यः अभिमानः गर्वः तेन उन्मदः मत्तता तं कर्त्तुं शीलं येषां तानि तथाविधानि भवन्ति। राजलक्ष्मीः - राज्ञः श्रीः, राज्यविषविकारतन्द्रीप्रदा - राज्यम् आधिपत्यम् एव विषं गरलं तस्मात् यो विकारः तेन तन्द्रीं निद्राजन्यालस्यं प्रददाति या सा तथाभूतं भवति।

विग्रहः - अखिलमलप्रक्षालनक्षमम् - अखिलानां मलानां प्रक्षालनाय क्षमम्।

**सारः** - यथा जलस्नानेन शरीरस्था मलाः प्रक्षालिता भवन्ति तथैव गुरूपदेशेन मनुष्यदोषाः दूरीभवन्ति। अत एव गुरूपदेशः जनानां जलरहितस्नानम्। केशादीनां परिपक्वतया जरया वृद्धत्वं आयाति किन्तु गुरूपदेशेन केशादीनां श्वेतत्वाभावेनैव वृद्धत्वं ( महत्वं) आयाति। अत एव गुरूपदेशः पुरुषाणां जरारहितं वृद्धत्वं (श्रेष्टत्वं)। स्थूलत्वे मेदोदोषाः हेतवो भवन्ति। किन्तु गुरूपदेशेन पुरुषाणां मेदोदोषं विनैव गुरुत्वम् आयाति। एष एव गुरूपदेशः पुरुषाणां मेदोदोषं विनैव गुरुत्वम्। कर्णभूषणं प्रायः सुवर्णनिमित्तं भवति। गुरूपदेशस्तु विनैव ज्योतिः प्रकाशरूपः। जागरणं सन्तापकरं भवति, गुरूपदेशस्तु सन्तापरहितं जागरणम्। अयम् उपदेशः प्रधानतया राज्ञां कृते बहु उपदेशः। ततः तेषां उपदेष्टारः अल्पसंख्यकाः भवन्ति। प्रतिध्वनिः यथा ध्वनिमनुसरति तथैव भयवशात् लोकः राजवचनानि अनुसरति। अपरं च - अहङ्कारेण विनिद्धकर्णः बधिरप्रायाः नृपतयः गुरुजनानां उपदेशमपि न श्रृणवन्ति । चेत् श्रृण्वन्ति तर्हि मदमत्तगज इव नेत्रनिमीलनेन गुरूपदेशान् उपेक्षमाणाः राज्ञः तिरस्कुर्वन्ति। यथा तीव्रतापजनितमूर्च्छाया जनाः चेतनारहिताः भवन्ति तथैव अहङ्कारेण राज्ञां चित्तवृत्तयः अपि विभ्रान्ता भवन्ति। धनादिभिः मिथ्याभूतौ एव अहङ्कारौ उत्पन्नौ भवतः। यथा विषविकारेण शिथिलता उत्पद्यते तथैव राजलक्ष्मीः राज्यमदेन प्रमादोत्पादिका भवति।

अस्मिन् प्रकरणे शुकनासः उचिते पात्रे एव उपदेशः सफलतां प्राप्नोति इत्याशयं दृष्टान्तपुरःसरं प्रस्तौति।

## Summarised Overview

यौवनारम्भः धनसम्पत्तिश्च सर्वथा अनर्थहेतुः भवति इति चन्द्रापीडम् उद्बोधयति शुकनासः एतादृशैः वाक्यैः। अन्धकारं सूर्यस्य, रत्नानां, दीपानां वा प्रकाशनेन दूरीकर्तुं शक्यन्ते। यौवनप्रभवं तमः तु केनापि एतेन उपायेन न अपनेतुं शक्यते। ऐश्वर्यजन्यः मदः मदिरादिसेवनेन जनितः मदः इव औषधादिना न निवर्तते, न वा कालेन शाम्यति। तिमिराह्वयनेत्ररोगः तु अञ्जनवर्त्या उपशाम्यति। ऐश्वर्यतिमिरेण प्रवृत्तमान्ध्यं तु न कथमपि दूरीकर्तुं शक्यते। अहङ्कारदाहज्वरोष्मा केनापि शमितुं न शक्यते। लौकिकसुखास्वादजन्यः मोहः न कदापि नियन्तुं शक्यः। युवराजपदप्राप्तौ चन्द्रापीडस्यापि एते दोषाः संभाव्यन्ते इति मनसि कृत्वा इष्टचिन्तकेन शुकनासेन तत् पूर्वमेव एवं उपदिश्यते।

अनन्तरं अनर्थपरम्पराणां निरूपणं क्रियते- यौवनं, निरुपमसौन्दर्यं, धनसम्पत्तिः प्रभुत्वं इत्येतानि सौभाग्यानि पुरुषस्य मदकारणानि भवन्ति। अधीतसर्वशास्त्रस्य अपि पुरुषस्य यौवनारम्भे बुद्धिः वैपरीत्यम् उपयाति। नवयौवनेन कषायिते मनसि वस्तुतो हानिकराणि अपि विषयसुखानि निपतन्ति। तत् च पुरुषः कुपथे गामिनं विधाय नाशयति। अतः अभ्युदयचिन्तकेन जनेन चन्द्रापीडसदृशाः उपदेष्टव्याः एव इति शुकनासवचनस्याशयः।

अथ गुरूपदेशस्य वैशिष्ट्यं प्राधान्यम् उपादेयता च उचितदृष्टान्तप्रदर्शनपुरःसरम् उपपादयति शुकनासः। सत्पात्रे एवं उपदेशस्य साफल्यम् अस्तु तच्छ्रवणे ग्रहणे वा दुर्जनःन तत्परः भवति। तच्छ्रवणे तत्परस्य साधोः गुरूपदेशः प्रमादाहङ्कारादिदोषानां प्रशमनाय उपकरोत्येव। विषय-रसास्वादनेन कलुषितबुद्धौ तु प्रायेण उपदेशाः विफलाः भवन्ति। उन्नते कुले उत्पत्तिः, सर्वशास्त्रेषु अवगाहो वा न विनयस्य कारणं भवति। राजानः सामान्येन उपदेष्टव्या एव किन्तु तेषां उपदेष्टारः अतिविरलाः। भयात् राजवचनमनुचितमपि अनुगच्छन्ति लोकाः। न कोऽपि निर्भीक सन् हिताय

तमुपदेष्टुं प्रयतते। यदि कश्चित् प्रयतेत तर्हि अहंकारातिशयेन ते न शृण्वन्ति। हितोपदेशदायिनः गुरून् तदुपदेशस्य अवज्ञासम्पादनेन खेदयन्ति च। रुढाहङ्कारेण सदसद्विवेकशून्यो भवति राजस्वभावः।

## Assignments

व्याख्यानं कुरुत

1. अपरिणामोपशमो दारुणो लक्ष्मीमदः।
2. अविनयानमेकैकमप्येषामायतनम् किमुत समवायः?
3. अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः।
4. अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः।
5. इन्द्रियहरिणहारिणि च सततमपि दुरन्तेयमुपभोगमृगतृष्णिका।
6. नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुतराण्यापतन्ति मनसः।
7. नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमात्यसङ्गो विषयेषु।
8. अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः।
9. अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलबिम्बाप्रशमहेतुनापि न प्रचण्डतरी भवति वडवानलो वारिणा।
10. गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः।
11. अहङ्कार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारिणि धनानि राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः।

**उत्तरयत -**

1. यौवनप्रभवं तमः कुतः अतिगहनं भवति?

2. चन्द्रापीडम् उपदेष्टव्यमल्पमपि नास्ति इति शुकनासः कुतो वदति?
3. लक्ष्मीमदस्य कुतः अतिदारुणत्वम्?
4. का नाम अञ्जनवर्तिः?
5. शुकनासपक्षे अनर्थपरम्परा का?
6. अधीतसर्वशास्त्रस्यापि पुरुषस्य बुद्धिः कदा कालुष्यमुपयाति?
7. विषयेषु अत्यासक्तिः कथं पुरुषं नाशयति?
8. 'अयमेव चन्द्रापीडस्य उपदेशकालः' इति शुकनासः कुतो वदति?
9. गुरूपदेशः पुरुषाणां कीदृशं स्नानं भवेत्?
10. विरला हि तेषां उपदेष्टारः। केषां? कुतः?

## Suggested Readings


1. Kadambari of Banabhatta. translated by Mandoor Sukumaran, DC Books Kottayam 1999
2. The Kadambari of Banabhatta. With the commentaries of Banuchandra and Siddhachandra, Ed by Kashinath Pandurang parab, Nirnaya sagar press, Bombay 1916


## References


1. Kadambari of Banabhatta with , Dr Jayasankarlal Tripady' commentary, Chowkhamba Krishnadas academy, Varanasi 2013
2. Kadambari - Sukanasopadesha of Banabhatta, with Rampal Sastri's Commentary Chaukhamba Publishers Varanasi 2018
3. Ramnarayanlal arunkumar, Kadambari - Sukanasopadesha of Banabhatta, 2 Katra road, Allahabad 2002

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# ‘आलोकयतु तावत्’ इत्यारभ्य ‘पतितमपि आत्मानं नावगच्छन्ति’ पर्यन्तम्

## Learning Outcomes

- महाकवेः बाणभट्टस्य रचना वैशिष्ट्यम् अवगच्छति।
- नूतनपदावलीं गृह्णाति।
- लक्ष्म्या परिगृहीतानां नराणां स्वभावविशेषतां अवगच्छति।

## Background

महाकविना बाणभट्टेन विरचितायां कादम्बर्यां शुकनासोपदेशे धनानि मिथ्याभिमानं उन्मदकारीणि भवन्ति च प्रतिपादितम्। राजश्रीः आलस्यदायिनी च भवति। अधीतसर्वशास्त्रस्यापि पुरुषस्य बुद्धिः यौवनारम्भे कलुषीभवति। ऐश्वर्येण लब्धिश्च तं उन्मादयति विषयेषु। विषयेषु अत्यासक्तः सः सन्मार्गात् स्खलति। हितकांक्षिणा मानवेन उचितोपदेशद्वारा तां सत्पथं आनीतव्यम्। अतः यौवनस्य निरङ्कुशताम्, ऐश्वर्यस्य मदकारितां, राजप्रकृतेः अहङ्कारमूर्छान्धकारितां चाधिकृत्य चन्द्रापीडं उद्बोधयति अत्र शुकनासः। एतत् कार्यम् अतीते एकके अस्माभिः पठितम्। अनन्तरं अस्मिन् एकके लक्ष्म्याः कारणेन मानवजीवने किं किं संभविष्यति इति शुकनासोपदेशद्वारा पठामः।

## Keywords

क्षीरसागरात्, दृढगुणपाशसन्दाननिष्पदीकृता, गन्धर्वनगरलेखेव, नारायणमूर्त्तिम्, अप्रत्ययबहुला, वसुजनन्यपि, सरस्वतीपरिगृहीतम्, परस्परविरुद्धञ्चेन्द्रजालमिव, रेणुमयीव, दीपशिखेव, पुरलोकदर्शनं, राहुजिह्वा, अलोख्यगता, विह्वलतामुपयान्ति, मदनशरैः, कुलीरा इव, सप्तच्छदतरवः, दुष्टवारणा इव, दण्डविक्षेपैः, जलबिन्दव इव।

## Discussion

**पाठभागः**

**आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिं, मदिरायाः मदम्, कौस्तुभमणेरतिनैष्ठूर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता।**

लक्ष्म्याः स्वरूपम्

**व्याख्या** - कल्याणाभिनिवेशः कल्याणे मङ्गले अभिनिवेशः आग्रहः यस्य स तथाभूतः, (भवान्) तावत् - इति वाक्यालङ्कारे, प्रथमम् - आदौ, लक्ष्मीम् एव - श्रियम् एव, आलोकयतु - पश्यतु। हि - निश्चितम्, सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी - सुभटाः कुशलयोद्धारः तेषां खड्गमण्डलम् असिसमूहः तदेव उत्पलवनं कमलवनं तस्मिन् विभ्रमः विचरणम् तस्मिन् भ्रमरी मधुकरी, इयं - साक्षात्, लक्ष्मीः - श्रीः, पारिजातपल्लवेभ्यः - मन्दारकिसलयेभ्यः, रागम् - रक्तिमानम् लोकानुरागं वा (गृहीत्वा इव क्षीरसागरात् उद्गता। एवम् अन्यत्रापि अन्वयः कार्यः), इन्दुशकलात् - चन्द्रखण्डात्, एकान्तवक्रताम् - अतिकुटिलताम्, उच्चैःश्रवसः - इन्द्राश्वात्,

चञ्चलताम् - चपलताम्, कालकूटात् - हालाहलविषात्, मोहनशक्तिम् - मूर्च्छोत्पादनसामर्थ्यम्, मदिरायाः - मद्यात्, मदम् - उन्मत्तताम्, कौस्तुभमणेः - विष्णोः कण्ठरत्नस्य सकाशात्, अतिनैष्ठुर्यम् - नितान्तकठोरत्वम् इत्येतानि - रागादीनि, सहवासपरिचयवशात् - सहवासः एकत्र स्थितिः तेन परिचयः सम्बन्धविशेषः तस्य वशात् कारणात्, विरहविनोदचिह्नानि - विरहस्य विनोदचिह्नानि - अपनोदनलक्षणानि, गृहीत्वा इव - आदाय इव, क्षीरसागरात् - दुग्धसमुद्रात्, उद्गता - उत्थिता।

विग्रहः - कल्याणाभिनिवेशी - कल्याणे अभिनिवेष्टुं इच्छा यस्य सः कल्याणाभिनिवेशी।

**सारः** - मङ्गलाभिलाषी भवान् प्रथमं लक्ष्मीमेव पश्यतु तावत्। कमलवने निरन्तरम् भ्रमणशीला मधुकरी इयम् लक्ष्मीः सुभटानां खड्गमण्डलेषु विलसति। एषा हि लक्ष्मीः सहवासजनितसम्बन्धवशात् वियोगकाले मनोविनोदार्थं मन्दारवृक्षाणां पल्लवेभ्यः अनुरागम्, इन्दुखण्डात् कौटिल्यम्, उच्चैश्रवसः अश्वात् चाञ्चल्यं; विषेभ्यः मुग्धतां, मद्यात् उन्मादं, कौस्तुभमणेः काठिन्यं (निर्दयत्वं) च आदाय एव क्षीराम्बुधेः प्रादुर्भूता इव अस्ति।

**पाठभागः**

महत्प्रयासेन प्राप्ता लक्ष्मीः दुःखेन परिपाल्यते

**नह्येवंविधमपरमपरिचितमिह जगति किञ्चिदस्ति, यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणपाश-सन्दाननिष्पन्दीकृतापि नश्यति। उद्दामदर्प-भटसहस्रोल्लासिता-सिलता-पञ्जर-विधृताप्यपक्रामति। मदजल-दुर्दिनान्धकारगजघटितघनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमलोकयते। न कुलक्रममनुवर्त्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमनुबुध्यते, न लक्षणं प्रमाणीकरोति। गन्धर्वनगरलेखेव पश्यत एव नश्यति।**

**व्याख्या** - इह जगति - अस्मिन् संसारे, एवंविधम्- एतादृशम्, अपरिचितम् - परिचयशून्यम्, परिचयनिबन्धवन्युत्वनिरपेक्षमिति यावत्, अपरम् - अन्यत्, किञ्चित् - वस्तु, नहि - न, अस्ति - विद्यते, यथा- येन प्रकारेण, इयम् - लक्ष्मीः, अनार्या - अश्रेष्ठा। यतोहि लक्ष्मीः लब्धापि - महता कष्टेन प्राप्तापि, दुःखेन - क्लेशेन, खलु - निश्चयेन, परिपाल्यते - परिपालनविषयीक्रियते । दृढगुणपाशसन्दाननिष्पन्दीकृतापि- दृढाः - स्थिराः गुणाः - शौर्यादयः स एव पाशः रज्जुः तल्लक्षणं सन्दानं बन्धनं तेन निष्पन्दीकृतापि - निश्चलीकृतापि इयं नश्यति - क्षयं प्राप्नोति। उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविवृतापि - उद्दामः उत्कटः दर्पः - अहङ्कारः येषाम् एवम्भूताः ये भटाः - योद्धारः तेषां सहस्रं तेन उल्लासिता - ऊर्ध्वीकृता या असिलताः - खड्गलताः सा एव पञ्जरं - पक्ष्यादिबन्धनगृहं तत्र विवृतापि - स्थापितापि (लक्ष्मीः), अपक्रामति - अपसरति। मदजलदुर्दिनान्धकारगजघनघटापरिपालितापि - मदजलं दानवारि तदेव कृष्णत्वसाम्यात् दुर्दिनान्धकारः मेघच्छन्नदिनतिमिरं तद्युक्ता ये गजाः - हस्तिनः स एव घनाः - मेघाः तेषां घटया - समूहेन परिपालितापि - रक्षितापि (लक्ष्मीः) प्रपलायते - पलायनं विदधाति। सा परिचयं - संस्तवं, न रक्षति - न पालयति। अभिजनकुलं, न ईक्षते - न विलोकयति। रूपं - सौन्दर्यं न आलोकयति - न पश्यति। कुलक्रमम् - वंशपरिपाटीं, न अनुवर्तते - न अनुगच्छति। शीलं - सच्चरित्रं, न पश्यति - न अवलोकयति। वैदग्ध्यं - पाण्डित्यं, न गणयति -न विचारयति। श्रुतम् - शास्त्रम्, न आकर्णयति - न शृणोति। धर्मम् - सुकर्मं, न अनुरुध्यते- न अनुसरति। त्यागम् - दानम्, न आद्रियते - न सम्मानयति। विशेषज्ञताम् - विशेषज्ञातृत्वम्, न विचारयति - न गणयति। आचारम् - शिष्टजनसेवितं मार्गम्, न पालयति - न रक्षति । सत्यम्-ऋतम्, न अवबुध्यते - न जानाति। लक्षणम् - ध्वजवज्रादिसामुद्रिकशास्त्रप्रतिपादितं, न प्रमाणीकरोति - ध्वजवज्रादिरेखया युक्तं पुरुषं नालम्बते

इत्यर्थः। गन्धर्वनगरलेखा - दृष्टिभ्रमेण आकाशे नगरवदलोक्यमाना कापि रेखा हरिश्चन्द्रपुरीति यावत्, इव - तद्वत्, इयं लक्ष्मीः पश्यत एव - अवलोकयत एव नश्यति - नष्टा भवति।

विग्रहः - उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरे - उद्दामः दर्पः येषां ते उद्दामदर्पाः, उद्दामदर्पाः च ते भटाः च उद्दामदर्पभटसहस्रं, तेन उल्लासिता एव पञ्जरम् उद्दामदर्पभटसहस्रोल्लासिता असिलता एव पञ्जरम् उद्दामदर्पभटसहस्रोल्लासितपञ्जरं, तस्मिन् उद्दामदर्पभटसहस्रोल्लासितासित-लतापञ्जरे।

**सारः** - इह लोके एतादृशं दाक्षिण्यरहितं न किञ्चिदपि अपरं अस्ति। यथा अयं दुर्विनीता लक्ष्मीः अस्ति। महत्प्रयासेन प्राप्ता अपि इयं कष्टेन सुचिरं रक्ष्यते। गुणगणानां दृढबन्धनेन निगडीकृताऽपि पलायते। उत्कटदर्पयुक्त-योधानां सहस्रेण ऊर्ध्वीकृतखड्गरूपपिञ्जरे स्थापिताऽपि सद्यः अपसरति। दानवारीणां अजस्रधाराभिः दुर्दिनविधायकैः गजानां धनसमूहैः रक्षितापि पलायनं करोति। दुषितस्वभावा इयं लक्ष्मीः निजजनसम्बन्धमपि न स्मरति, उच्चकुलमपि न विलोकयति, सुन्दरतामपि न पश्यति, वंशपरम्परामपि न अनुगच्छति, आचारं नाचरति, विद्वत्तां विचारकोटिं न आनयति, शास्त्रोक्तविधानमपि न स्वीकरोति, न धर्मानुसरणं करोति, दानस्य आदरमपि न करोति विशेषेण सर्वार्थनेतृत्वं च न गणयति, शिष्टानुचरितं मार्गं न रक्षति, यथार्थतां च न अवगच्छति, सामुद्रिक-लक्षणानि अपि विशेषतया न प्रमाणयति। दृष्टिभ्रमात् आकाशे दृश्यमाना नगराकारालेखा इव इयं लक्ष्मीः पश्यतः पुरुषस्य अग्रत एव विनाशमुपयाति।

### पाठभागः

**अद्याप्यारूढ-मन्दर-परिवर्त्तावर्त्तभ्रान्ति-जनित-संस्कारेव परिभ्रमति। कमलिनी-सञ्चरणव्यतिकर-लग्न-नलिन-नाल-कण्टकक्षतेव न क्वचिदपि निर्भरमाबध्नाति पदम्। अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविध-**

**गन्धगज-गण्ड-मधुपान-मत्तेव परिस्खलति। पारुष्यमिवोपशिक्षितुमसि-धारासु निवसति। विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्त्तिम्।**

**व्याख्या-** अद्यापि - इदानीमपि, आरूढमन्दरपरिवर्त्तावर्त्तभ्रान्तिजनित-संस्कारेव आरूढः - प्राप्तः या मन्दरस्य - मेरो परिवर्तः परिभ्रमः तज्जनितो य आवर्त्तः अम्भसां भ्रमिः तस्मात् भ्रान्तिभ्रमण तज्जनितः संस्कारः वेगाभिधो यस्या एवंविधा इव, परिभ्रमति - परिभ्रमणं करोति गृहादन्यगृहं गच्छतीत्यर्थः। कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकक्षतेव - कमलिनीषु कमललतासु सञ्चरणं भ्रमणं तस्य व्यतिकरः सम्पर्कः तेन लग्नानि नलिनानां कमलानां नालकण्टकानि तैः क्षता विदीर्ण- चरणा इव, क्वचिदपि - कुत्रापि, पदं - चरणं, निर्भरं - निश्चलं, न आबध्नाति - न निदधाति। परमेश्वरगृहेषु - महाराजभवनेषु, अतिप्रयत्नविधृतापि - अतिप्रयत्नेन महताऽयासेन विधृतापि - स्थिरीकृतापि, विविधगन्धगज-गण्डमधुपानमत्तेव - विविधाः अनेकप्रकाराः ये गन्धगजाः गन्धहस्तिनः तेषां गण्डयोः कपोलयोः यानि मधूनि मद्यानि तेषां पानेन आस्वादेन मत्ता उन्मत्ता इव, परिस्खलति - भ्रंश्यति। पारुष्यं - क्रूरत्वम्, उपशिक्षितुमिव - अभ्यसितुमिव, असिधारासु - खड्गधारासु, निवसति - निवासं करोति। विश्वरूपत्वं - विश्वं ब्रह्माण्डं रूपं यस्य तत् विश्वरूपम् तस्य भावः तत्त्वं तत्, ग्रहीतुमिव आदातुमिव, नारायणमूर्तिम् - विष्णुशरीरम्, आश्रिता - प्राप्ता।

विग्रहः - अतिप्रयत्नविधृता - अतिशयः प्रयत्नः, तेन विधृता।

लक्ष्मी अनवरतं भ्रमणं करोति

**सारः** - मन्दारचलकृतमन्थनोत्पन्नस्य आवर्तस्य भ्रमणेन जायमानात् भ्रमणशीलता नामकसंस्कारात् एव सा अनवरतं भ्रमणं करोति। अथ च पद्मगृहसन्निवासकारणात् लग्नैः नलिननालकण्टकैः क्षता इयं अतिचञ्चला लक्ष्मीः कुत्र अपि स्थिरं पदं न धत्ते। राज्ञां गृहेषु महता प्रयासेन निगृहीता अपि इयं अनेकगन्धगजकपोलतटात् च्यवतः दानवारिणः पानेन उन्मत्ता

इव इतस्ततः पतति। कठोरत्वस्य शिक्षां ग्रहीतुं इव कृपाणजालधारासु आवासं विधत्ते। विविधरूपधारणाय विराटरूपधारिणं विष्णुं आश्रिता।

### पाठभागः

**अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोशमण्डलमपि मुञ्चति भूभुजम्। लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटितविविधसङ्क्रान्तिः। पाताल-गुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्य्यहृदया। प्रावृडिवाचिर-द्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्रया स्वल्पसत्त्वमुन्मत्ती-करोति।**

विश्वासरहिता इयं लक्ष्मीः स्वल्पसत्वमुन्मत्तीकरोति

**व्याख्या** - च - पुनः, ( इयं लक्ष्मीः) अप्रत्ययबहुला - अप्रत्ययः अविश्वासः बहुलः - अधिकः यस्याम् एवंभूता सती, दिवसान्तकमलमिव - दिवसान्तस्य दिनावसानस्य कमलमिव - पद्ममिव, समुपचितमूलदण्ड-कोषमण्डलमपि - समुपचितानि सम्यक्तया वृद्धिं प्राप्तानि मूलं विजय-निमित्तीभूतं सैन्यं भूभुजम् - राजानम्, मुञ्चति - त्यजति। लता - वल्ली इव, इयं विटपकान् - धूर्तान् पक्षे वृक्षः - शाखाः, अध्यारोहति - आश्रयति। गङ्गा इव - जाह्नवी इव, लक्ष्मीः वसुजननी अपि - वसूनां धनानां पक्षे वसुनाम्ना प्रसिद्धानाम् अष्टदेवविशेषाणाम् जननी अपि - माता अपि, तरङ्गबुद्बुदचञ्चला - तरङ्गाः भङ्गाः बुद्बुदाः स्थासकाः तद्वत् चञ्चला चपला पक्षे तरङ्गबुद्बुदैः चञ्चला, दिवसकरगतिरिव - दिवसकरः - सूर्यः तस्य गतिः गमनं सा इव, लक्ष्मीः प्रकटितविविधसंक्रान्तिः - प्रकटिता - दर्शिता विविधेषु अनेकप्रकारेषु लोकेषु संक्रान्तिः - सञ्चारो यया सा तादृशी पक्षे प्रकटिता विविधाः मेषादिद्वादशविधाः संक्रान्तयो राश्यन्तरसंक्रमणानि यया सा तादृशी। पातालगुहा इव - पातालकन्दरा इव, लक्ष्मीः तमोबहुला - तमः अज्ञानम् पक्षे अन्धकारः बहुलम् अधिकम् यस्याम् सा तथाविधा। हिडिम्बा इव - घटोत्कचमाता इव, लक्ष्मीः भीमसाहसैकहार्यहृदया - भीमसाहसेन अतिकठिनकर्मणा एकम् अद्वितीयं हार्यं हर्तुं शक्यं हृदयं चेतो यस्याः सा

तादृशी पक्षे भीमः वृकोदरः तस्य यः साहसः तेन एकम् हार्यं हृदयं यस्याः सा तादृशी। प्रावृट् - वर्षाकालः इव, (लक्ष्मीः) अचिरद्युतिकारिणी - अचिरा स्वल्पकालीना या द्युतिः प्रकाशः तां कर्त्तुं शीलं यस्याः सा तादृशी। दुष्टपिशाचीव - दुष्टा - क्रूरा या पिशाची - राक्षसी सेव, दर्शितानेकपुरुषोच्छ्रया- दर्शितः प्रकटीकृतः अनेकपुरुषाणाम् बहुमनुष्याणाम् उच्छ्रायः अभ्युदयः यया सा तथाविधा, स्वल्पसत्त्वम् - अल्पसाहसं (जनम्) उन्मत्तीकरोति - उन्मत्ततां नयति पक्षे - दर्शितः अनेकपुरुषाणाम् उच्छ्रायः उच्चता यया सा नितान्तदीर्घेत्यर्थः, स्वल्पसत्त्वम् उन्मत्तीकरोति त्रासेनेति भावः।

विग्रहः - दिवसान्तकमलम् - दिवसस्य अन्तं दिवसान्तं, दिवसान्ते कमलं दिवसान्तकमलम्।

**सारः -** विश्वासरहिता इयं यथा परिणतकन्दनालकोशमण्डलादिकं सायन्तनं कमलं विसृजति। तथैव समृद्धकरकोशदेशसमन्वितं महीपतिमपि समुत्सृजति। यथा लता वृक्षान् आरोहति तथा इयं लक्ष्मीः अपि नीचपुरुषान् आलिङ्गति। भीष्ममाता गङ्गा तरङ्गबुद्बुदाभ्यां चञ्चला अस्ति, तथैव इयमपि धनोत्पादिका सत्यपि तरङ्गबुद्बुदवता चञ्चला। दिनकरः यथा पृथक् पृथक् राशिषु सञ्चरति तथैव लक्ष्मीरपि भिन्नभिन्नपुरुषेषु व्यभिचरति। यथा पातालकन्दरा अन्धकारयुक्ता भवति तथैव इयं तमोगुणप्रधाना भवति। यथा हिडिम्बा भीमस्यैव साहसेन आकृष्टा आसीत् तथैव इयमपि केवलं प्रकृष्टसाहसेनैव आहर्तुं योग्या भवति। वर्षाकालः यथा क्षणमा विद्युल्लतां द्योतयति तथैव इयमपि क्षणिकां शोभाम् एव जनयति, क्रूरपिशाचिनी यथा अनेकपुरुषोच्चता दर्शयित्वा साहसरहितं पुरुषं भयात् उन्मत्तीकरोति। तथा इयमपि अनेकानाम् अभ्युदयं प्रदर्श्य बुद्धिरहितं जनं उन्मत्तीकरोति।

### पाठभागः

**सरस्वती-परिगृहीतमीर्ष्ययेव नालिङ्गति जनम्। गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति। अभिजातमहिमिव लङ्घयति, शूरं कण्टकमिव परिहरति, दातारं दुःस्वप्नमिव न स्मरति, विनीतं पातकिनमिव नोपसर्पति, मनस्विन-मुन्मत्तमिवोपहसति।**

ईर्ष्यवशात् इयं लक्ष्मीः न श्लिष्यति

**व्याख्या** - सरस्वतीपरिगृहीतम् सरस्वत्या शारदया परिगृहीतम् स्वीकृतम् विद्वांसमित्यर्थः, जनम् - पुरुषम्, ईर्ष्ययेव - मत्सरेणेव, नालिङ्गति - नावलम्बते। गुणवन्तम् - शौर्यादिगुणोपेतम्, (जनम् ) अपवित्रमिव - अपावनमिव, न स्पृशति - न स्पर्शं करोति। उदारसत्त्वम् - उच्चाशयम्, (जनम्) अमङ्गलमिव - अशुभमिव, न बहु मन्यते - न अधिकम् आद्रियते। सुजनम् - सत्पुरुषम्, अनिमित्तमिव - अपशकुनमिव, न पश्यति नावलोकयति। अभिजातम् - कुलीनम्, अहिमिव - सर्पमिव, लङ्घयति - अतिक्रामति। शूरम् - वीरम्, कण्टकमिव, परिहरति - परित्यजति। दातारम् - बहुप्रदम्, दुःस्वप्नमिव - अशुभस्वप्नमिव, न स्मरति - न स्मृतिविषयीकरोति। विनीतम् - विनम्रम्, पातकिनमिव - पापिनमिव, नोपसर्पति - न उपगच्छति, मनस्विनम् - महामनस्कम्, उन्मत्तमिव - विक्षिप्तमिव, उपहसति - उपहास्यं करोति।

विग्रहः - उदारसत्वम् - उदारं सत्त्वं यस्य सः उदारसत्त्वः, तम् उदारसत्त्वम्।

**सारः** - सरस्वतीकृपापात्रं विद्वज्जनम् ईर्ष्यावशात् इव इयं लक्ष्मीः न श्लिष्यति। दयादिगुणयुक्तं नरं अपवित्रं मन्यमाना इव तं न स्पृशति। दाक्षिण्यादि गुणयुक्तं मनुष्यम् अशुभम् इव आदरभाजनं न करोति । अपशकुनम् इव मन्यमाना सत्पुरुषाणां दर्शनादपि दूरीभवति। उन्मत्तवंशो-त्पन्नं पुरुषं सर्पमिव अतिक्रामति। वीरं जनं कण्टकम् इव मुञ्चति। दानशीलम् अशुभस्वप्नम् इव न स्मरति । नम्रतायुक्तं जनं पापिनं मत्वा तत्पार्श्वे न गच्छति। मनस्विनं प्रमत्तं मन्यमाना तम् उपहसति।

### पाठभागः

**परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथाहि सततम् ऊष्माणमुपजनयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। तोयराशिसम्भवापि तृष्णां संवर्द्धयति। ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति। बलोपचय-माहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुविपाका। विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। रेणुमयीव स्वच्छमपि कलुषीकरोति।**

परस्परविपर्ययरूपं स्ववृत्तं दर्शयति

**व्याख्या** - च- किञ्च, इन्द्रजालं - कुहहम्, दर्शयन्ती - दृष्टिपथं कारयन्ती, इव - तद्वत्, जगति - संसारे, परस्परविरुद्धम् - अन्योन्यासम्बद्धं, निजम् स्वकीयम्, चरितं वृत्तम्, प्रकटयति - आविष्करोति । तथाहि - तदेव दर्शयति, (इयं लक्ष्मीः) ऊष्माणं - तापम्, आरोपयन्त्यपि - प्रवर्त्तयन्त्यपि - जाड्यम् - शैत्यम्, उपजनयति - करोति इति विरोधः। तत्परिहारस्तूष्माणं दर्पं शैत्यं जाड्यमित्यर्थात्। उन्नतिम् - उच्चताम्, आदधानापि - धारयन्त्यपि, नीचस्वभावताम्, आविष्करोति - प्रकटयति इति विरोधः। तोयराशि-सम्भवापि - तोयराशेः समुद्रात् सम्भवापि समुत्पन्नापि, तृष्णां - पिपासां, संवर्धयति इति विरोधः । तत्परिहारस्तु तृष्णा धनाकांक्षामित्यर्थात्। ईश्वरताम् - शिवत्वं, दधानापि - धारयन्त्यपि, अशिवप्रकृतित्वम् - अनीश्वरस्वभावत्वम्, आतनोति - विस्तारयति इति विरोधः। तत्परिहारस्तु ईश्वरताम् प्रभुताम् दधानापि आपादयन्त्यपि अशिवप्रकृतित्वम् अशुभस्वभावत्वमित्यर्थात्। बलोपचयं - बलवृद्धिम्, आहरन्त्यपि - वर्धयन्त्यपि, लघिमानम् - भारहीनत्वम्, आपादयति - जनयति इति विरोधः । तत्परिहारस्तु बलोपचयं सैन्यवृद्धिलघिमानं कार्पण्यमित्यर्थात् । अमृतसहोदरापि - अमृतेन सुधया सह उत्पन्नापि, कटुविपाका - कटुरसोपेतो विपाकः परिणामो यस्याः सा तथाभूतेति विरोधः। तत्परिहारस्तु कटुः दुःखदायी विपाको यस्याः सेत्यर्थात्। विग्रहवती अपि -

मूर्त्तिमती अपि, अप्रत्यक्षदर्शना - अप्रत्यक्षं चक्षुषा अगम्यं दर्शनम् अवलोकनं यस्याः सा तथाभूता इति विरोधः। तत्परिहारस्तु विग्रहवती कलहवतीत्यर्थात्। पुरुषोत्तमरतापि - पुरुषोत्तमे उत्कृष्टपुरुषे रतापि आसक्तापि, खलजनप्रिया - खलजनाः दुर्जनाः प्रियाः यस्याः सा तथाभूता इति विरोधः। तत्परिहारस्तु पुरुषोत्तमे विष्णौ रतापि खलजनप्रिया बाहुल्येन दुष्टजनावलम्बनात्। रेणुमयीव - रजोनिष्पन्नेव, स्वच्छापि - निर्मलमपि, कलुषीकरोति - मलिनीकरोति - रागादियुक्तं करोति इत्यर्थात्।

विग्रहः - स्वभावतां - स्वस्य भावः स्वभावः, तस्य भावः स्वभावता, तां स्वभावताम्।

**सारः** - मायाजालप्रदर्शनकुर्वन्ती इव अस्मिन् संसारे परस्परविपर्ययरूपं स्ववृत्तं दर्शयति। यथा तापं जनयन्ती अपि शीतलतापमुत्पादयति। इयं लक्ष्मीः ऊर्ध्वगतिं प्रापयन्ती अपि अधोगतिं गमयति अर्थात् पदोन्नतिं कृत्वा अपि दुष्कर्मणि प्रेरयति मनुष्यम्। समुद्रात् उत्पन्ना अपि इयं लक्ष्मीः पिपासां वर्धयति। शिवतां धारयन्ती अपि मङ्गलेतरस्वभावतां वर्धयति। शक्तिं वर्धयन्ती अपि लघुतामुत्पादयति। अमृतेन सह उत्पन्ना अपि कटुरसपरिणामा अनुभूयते। शरीरं धारयन्ती अपि द्रष्टुमशक्या अस्ति। श्रेष्टपुरुषेषु अनुरागं कुर्वन्ती अपि दुष्टैः पुरुषैः सह इयं लक्ष्मीः सम्पर्कं करोति। रजोमयी इयं निर्मलं अपि जनं मलिनं करोति। (अर्थात् रागादि-रहितं जनं रागादियुक्तं करोति।

### पाठभागः

**यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेन कज्जलमलिनमेव कर्म्म केवलमुद्वमति। तथाहि इयं संवर्धनवारिधारा तृष्णाविषवल्लीनाम्। व्याध-गीतिरिन्द्रियमृगाणाम्। परामर्शधूमलेखा सच्चरितचित्राणाम्। विभ्रमशय्या मोहदीर्धनिद्राणाम्। निवासजीर्णवलभी धनमदपिशाचिकानाम्, तिमिरो-द्गतिः शास्त्रदृष्टीनाम्। पुरःपताका सर्वाविनयानाम्, उत्पत्तिनिम्नगा क्रोधा-वेगग्राहाणाम्। आपानभूमिर्विषयमधूनाम्। सङ्गीतशाला भ्रुविकारनाट्या-**

**नाम्, आवासदरी दोषाशीविषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्, अकालप्रावृट् गुणकलहंसकानाम्, विसर्पणभूमिर्लोकापवादविस्फोटकानाम्, प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणः। वध्यशाला साधुमावस्य। राहुजिह्वा धर्मेन्दुमण्डलस्य।**

धर्मरूपचन्द्रमण्डलस्य राहुजिह्वा भवति लक्ष्मीः

**व्याख्या** -च - किञ्च, यथा यथा- येन येन प्रकारेण, इयं - लक्ष्मीः, चपला - चञ्चला, दीप्यते - प्रकाशते, तथा तथा - तेन तेन प्रकारेण, दीपशिखेव - प्रदीपज्वालेव, कज्जलमलिनमेव - कज्जलवत् मलिनमेव, कर्म, केवलम्, उद्वमति - उद्गिरति । पक्षे - कज्जलमेव मलिनं कर्मेति बोध्यम्। तदेव दर्शयति, इयं - लक्ष्मीः, तृष्णाविषवल्लीनाम् - तृष्णा लोभः तल्लक्षणानां विषवल्लीनां विषलतानां, संवर्धनवारिधारा - संवर्धने वृद्धिकरणे वारिधारा जलधारा निरंतरजलसेवकः इति यावत्, इन्द्रियमृगाणाम् - इन्द्रियाणि एव मृगाः - हरिणाः तेषाम्, व्याधगीतिः व्याधस्य गानम्, सच्चरितचित्राणाम् - सच्चरितानि सदाचरणानि एव चित्राणि आलेख्यानि तेषां, परामर्शधूमलेखा-परामर्शाय - प्रोञ्छनाय, घूमलेखा - धूमपंक्तिः, मोहदीर्घनिद्राणाम् - मोहाः कर्तव्याकर्तव्यविवेकाभावा एव दीर्घनिद्राः - दीर्घस्वापाः तासाम्, विभ्रमशय्या - विलासशय्या, धनमदपिशाचिकानाम् - धनमदाः द्रव्याभिमानाः एव पिशाचिकाः राक्षस्यः तासाम्, निवासजीर्णवलभी- निवासार्थं जीर्णा - प्राचीना वलभी - चन्द्रशाला, शास्त्रदृष्टीनाम् - शास्त्राणि वेदपुराणादीनि एव दृष्टयः नेत्राणि तासाम्, तिमिरोद्गतिः- तिमिरस्य नेत्ररोगविशेषस्य उद्गतिः प्रादुर्भावः, सर्वाविनयानाम् - सर्वेषाम् सकलानाम् अविनयानाम् दुराचाराणाम्, पुरःपताका - अग्रवैजयन्ती, क्रोधावेगग्राहाणाम् - क्रोधस्य कोपस्य य आवेगाः - सम्भ्रमाः त एव ग्राहाः मकराः तेषाम्, उत्पत्तिनिम्नगा - उद्भवनदी, विषयमधूनाम् विषयाः भोग्यपदार्था एव मधूनि - मद्यानि तेषाम्, आपानभूमिः- पानस्थली, भ्रूविकार नाट्यानाम् - भ्रुवां विकाराः विकृतय एव नाट्यानि अभिनयाः तेषाम्, संगीतशाला- रंगशाला, दोषाशीविषाणाम् - दोषाः कामादय एव

आशीविषा - सर्पाः तेषाम्, आवासदरी - निवासगुहा, सत्पुरुषव्यवहाराणाम् - सत्पुरुषाः सज्जनाः तेषां व्यवहाराः आचरणानि तेषाम्, उत्सारणवेत्रलता - उत्सारणं दूरीकरणं तदर्थं वेत्रलता वेतसयष्टिः, गुणकलहंसकानाम् - गुणाः एव कलहंसकाः कादम्बाः तेषाम् , अकालप्रावृट् - असमयप्राप्तवर्षाकालः, लोकापवादविस्फोटकानाम् - लोकेषु ये अपवादाः विरोधोक्तयः त एव विस्फोटकाः शिलीन्द्राणि व्रणविशेषा इति यावत् तेषां, विसर्पणभूमिः - विसर्पणाय विस्तरणाय भूमिः स्थली, कपटनाटकस्य - कपटं छलाचरणमेव नाटकम् अभिनयः तस्य प्रस्तावना आमुखम् सूत्रधारादिप्रवेशात्मकप्रारम्भः इति यावत् । कामकरिणः - कामः कन्दर्प एव करी हस्ती तस्य, कदलिका - रम्भा, साधुभावस्य - साधुतायाः, वध्यशाला - हत्यागृहम्, धर्मेन्दुमण्डलस्य - धर्मः सदाचारादिकः एव इन्दुमण्डलं चन्द्रबिम्बं तस्य, राहुजिह्वा - राहोः विधुन्तुदस्य जिह्वा रसना।

विग्रहः - दीपशिखा - दीपस्य शिखा।

**सारः** - यथा दीपशिखा प्रवर्धमाना कज्जलाधिक्यं उत्पादयति तथैव इयं चञ्चला लक्ष्मी यथा तथा केवलं मलिनम् एव कर्म आचरति। यतः यथा जलधाराभिसेचिताः विषवल्लयः सम्वर्धन्ते तथैव अनया लक्ष्म्या अपि लालितास्तृष्णाः वर्धन्ते। यथा व्याधानां वंशीशब्दः मृगान् सम्मोहयति तथैव इयमपि नेत्रादि साधनजातानि आकर्षति। यथा धूमराशयः चित्राणि लिम्पन्ति तथैव इयमपि सत्पुरुषाणां चरितानि आवृणोति। यथा सुरम्यं शयनीयं सुखनिद्रयाः स्थानम् तथैव इयमवि मोहस्य शयनम् । यथा जीर्णशीर्णः गृहोपरिभागः पिशाचाङ्गनानां निवासस्थानं तथैव इयमपि धनाभिमानिनां निकेतनम्। यथा तिमिरानामा रोगः नेत्रयोर्विनाशकः तथैव इयमपि वेद-स्मृति आदिशास्त्राणां अवरोधका अस्ति। इयं लक्ष्मीः समस्तदुराचारणाम् अग्रगामिनी पताका, क्रोधावेगरूपिणः जलनिवासिनः

ग्राहस्य उत्पत्तिस्थानरूपा नदी, विषयवासनारूपमदिरायाः पानस्थानं, भ्रुवश्चालनादिरूपविकारयुक्तस्य अभिनयस्य संगीतस्थानं, दोषरूपिणां सर्पाणां निवासार्थं अन्धकारपूर्णा गुहा अस्ति। एषा लक्ष्मी वेत्रयष्टिरिव शिष्टजनानां आचारान् दूरीकरोति। अकालवर्षा यथा हंसान् दूरीकरोति तथा इयमपि दयादिगुणान् दूरीकरोति। लोकनिन्दारूपविस्फोटकानां प्रसरणायानुकूलं स्थानं अस्ति। इयं लक्ष्मीः छलरूपनाटकस्य भूमिका अस्ति। कामरूपगजराजस्य कदलीवनम् अस्ति। शुद्धभावनायाः हनन-स्थानं तथा च धर्मरूपचन्द्रमण्डलस्य राहुजिह्वा।

**पाठभागः**

**न हि तं पश्यामि यो हि अपरिचितयानया न निर्भरमुपगूढः, यो वा न विप्रलब्धाः। नियतमियमालेख्यगतापि चलति। पुस्तमय्यपीन्द्रजालमाच-रति, उत्कीर्णापि विप्रलभते श्रुताप्यभिसन्धत्ते, चिन्तितापि वञ्चयति।**

**व्याख्या** - हि - निश्चयेन, तं जनं, न पश्यामि - नावलोकयामि, यो हि - जनः, अपरिचितया - परस्परपरिज्ञानरहितया, अनया - लक्ष्म्या, निर्भरम् - अतिशयम्, नोपगूढः - नालिङ्गितः, घनचेष्टया तया न संश्लिष्ट इत्यर्थः, वा - अथवा, यः - जनः, न विप्रलब्धः - न विप्रतारितः। नियतं - निश्चितम्, इयम् - लक्ष्मीः, आलेख्यगतापि - चित्रलिखितापि, चलति - गृहान्तरं व्रजति, पुस्तमय्यपि - मृद्वस्त्रादिरचितपुत्तलिकारूपापि, इन्द्रजालम् - कुहकम्, आचरति - प्रदर्शयति, अकस्मात् तस्या विलुप्तत्वात् इति भावः। उत्कीर्णापि - प्रस्तरे आलिखितापि, विप्रलभते - विप्रतारणां करोति। श्रुतापि - आकर्णितापि, अभिसंधत्ते - संशयं करोति। चिन्तितापि - ध्यातापि वञ्चयति - प्रतारयति।

प्राप्याशया ध्याता अपि छलति

विग्रहः - आलेख्यगता - आलेख्यं गता।

**सारः -** अज्ञातया अपि अनया सुदृढम् अनाश्लिष्टो अवञ्चितो वा न कश्चन दृश्यते। चित्ररूपेण अलिखिता अपि वञ्चयति। श्रुतान्विता अपि संशयम् उत्पादयति। प्राप्त्याशया ध्याता अपि छलति।

### पाठभागः

**एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथाहि, अभिषेकसमय एव चैषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्यधूमेनेव मलिनीक्रियते' हृदयम्, पुरोहितकुशाग्रसम्मार्जनीभि-रिवापनीयते क्षान्तिः, उष्णीषपट्टबन्धेनेवावच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापवार्यते परलोकदर्शनम्, चामरपवनैरिवापह्रियते सत्यवादिता, वेत्रदण्डैरिवोत्सार्यन्ते गुणाः, जयशब्दकलकलैरिव तिरस्क्रियन्ते साधुवादाः, ध्वजपटपल्लवैरिव परामृश्यते यशः।**

**व्याख्या** - एवंविधयापि पूर्वोक्तलक्षणयुक्तयापि, दुराचारया दुष्टाचरणया, अनया - लक्ष्म्या, कथमपि - केनापि प्रकारेण, दैववशेन - भाग्यवशेन, परिगृहीताः - स्वीकृताः, राजानः - भूपतयः, विक्लवाः - समाकुलाः, भवन्ति - जायन्ते, सर्वाविनयाधिष्ठानताञ्च - सर्वेषां सकलानम् अविनयानां दुराचाराणाम् अधिष्ठानताम् अधिकरणतां च, गच्छन्ति - प्राप्नुवन्ति। तथाहि - तदेव दर्शयति, अभिषेककसमय एव - राज्याभिषेककाल एव, एषां - राज्ञां, मङ्गलकलशजलैः - कल्याणघटपानीयैः, दाक्षिण्यम् - औदार्यम्, प्रक्षाल्यत इव - धाव्यत इव। अग्निकार्यधूमेन - अग्निकार्यं होमादि तस्य धूमेन, हृदयं - चित्तं, मलिनीक्रियत इव- कश्मलतां नीयत इव। पुरोहितकुशाग्रसम्मार्जनीभिरिव - पुरोहितः पुरोधाः तस्य कुशाग्राणि दर्भाग्रणि एव सम्मार्जन्यः ताभिः, क्षान्तिः - क्षमा, अपह्रियत इव-अपसार्यत इव। उष्णीषपट्टबन्धेन उष्णीषः शिरोवेष्टनम् स एव पट्टवन्धः क्षौमवस्त्रबन्धनं तेन, जरागमनस्मरणं - जरायाः वृद्धावस्थायाः आगमनम् तस्य स्मरणा स्मृतिः, अवच्छाद्यत इव - आद्रियत इव। आत-

प्राप्तायामपि लक्ष्म्यां राजानः विह्वलाः भवन्ति

पत्रमण्डलेन - आतपत्रमण्डलं - मण्डलीकृतच्छत्रं तेन, परलोकदर्शनं जन्मान्तरावलोकनम्, अपवार्यत इव - निवार्यत इव। चामरपवनैः - चामरं बालव्यजनं तस्य पवनैः वायुभिः सत्यवादिता - सत्यवक्तृता, अपह्रियत इव - अपनीयत इव। वेत्रदण्डैः - वेतसयष्टिभिः, गुणाः - दयादाक्षिण्यादयः, उत्सार्यन्त इव - दूरीक्रियन्त इव। जयशब्दकलकलैः - जयशब्दस्य कोलाहलैः, साधुवादाः - सुवचनानि वा धन्यवादाः, तिरस्क्रियन्त इव - न्यक्क्रियन्त इव। ध्वजपटपल्लवैः - ध्वजाः पताकाः तेषां पटानि वस्त्राणि तेषां पल्लवैः प्रान्तैः, यश - कीर्तिः, परामृश्यत इव - प्रोञ्छ्यत इव।

विग्रहः - सर्वाविनयाधिष्ठानाम् - सर्वाविनयनस्याधिष्ठानस्य भावः सर्वाविनयधिष्ठानता, तां सर्वाविनयाधिष्ठानताम्।

**सारः -** यथा कथञ्चित् प्राप्तायामपि लक्ष्म्यां राजानः विह्वलाः भवन्ति तथा च सर्वविधदुराचारादीनां आस्पदतां च गच्छन्ति। अभिषेककाले एव मङ्गलघटानां जलानि राज्ञाम् अनुकूलतां प्रक्षालयन्ति इव। अभिषेकाङ्गभूतहवनधूमः तेषां अन्तःकरणं कलुषीकरोति। पुरोहितदर्भ-सम्मार्जन्यः भूभृतां क्षमागुणं अपसारयन्ति इव। क्षौमं शिरोवेष्टनं राज्ञां वृद्धावस्थागमनस्मृतिम् आवृणोति इव। छत्रमण्डलेन लोकान्तदृष्टिः निवार्यते इव। व्यजनवायुभिः यथार्थतां दूरीकरोति इव। वेत्रयष्ट्या शूरतादयो गुणाः अपसार्यन्ते इव। जयशब्दकोलाहलैः हितप्रदवचनानि तिरोभूयन्ते इव। पताकावस्त्रोपान्तैः यशः प्रोञ्छ्यते इव।

### पाठभागः

**केचित् श्रम-वश-शिथिल-शकुनि-गल-पुटचपलाभिः खद्योतोन्मेष-मुहूर्त-मनोहराभिर्मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमानाः, धन-लव-लाभावलेप-विस्मृत-जन्मानोऽनेक- दोषोपचितेन दुष्टासृजेव रागावेशेन बाध्यमानाः, विविध-विषय-ग्रासलालसैः पञ्चभिरप्यनेकसहस्रसंख्यैरिवे-न्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेण एकेनापि सहस्रतामिवो-पगतेन मनसा आकुलीमाणा विह्वलतामुपयान्ति।**

**व्याख्या** - केचित् - नृपतयः, श्रमवशशिथिलशकुनिगलपुटचपलाभिः - श्रमवशेन प्रवासाधिक्येन शिथिलं यत् शकुनेः मयूरादिपक्षिणः गलपुटं कण्ठदेशः तद्वत् चपलाभिः चञ्चलाभिः खद्योतोन्मेष - मुहूर्तमनोहराभिः- खद्योतः ज्योतिरिङ्गणः तस्य उन्मेषवत् प्रकाशवत् मुहूर्तं क्षणं मनोहराभिः चित्तहारिणीभिः, मनस्विजनहिताभिः मनस्विजनैः धीमद्भिः गर्हिताभिः निन्दिताभिः, सम्पद्भिः - समृद्धिभिः प्रलोभ्यमानाः - लोभनीयमानाः, धनलवलाभावलेपविस्मृतजन्मानः - धनस्य द्रव्यस्य यो लवो लेशः तस्य लाभः प्राप्तिः तस्मात् यः अवलेपः अहंकारः तेन विस्मृतं विस्मरणं प्राप्तं जन्म येषां ते तथाविधाः, अनेकदोषोपचितेन- अनेकैः नानाविधैः दोषैः दूषणैः उपचितेन - व्याप्तेन, दुष्टासृजा इव - दुष्टेन दूषितेन असृजा रक्तेन इव, रागावेशेन - विषयासक्तिरूपाभिनिवेशेन, वाच्यमानाः - पीड्यमानाः, विविधविषयग्रासलालसैः - विविधाः अनेके ये विषयाः गोचराः स एव ग्रासाः कवलाः तत्र लालसैः, लोलुपैः, पञ्चभिः अपि - पञ्चसंख्यकैः अपि, अनेकसहस्रसंख्यैः इव, इन्द्रियैः - करणैः आयास्यमानाः - परिक्लिश्यमानाः, प्रकृतिचञ्चलतया - प्रकृत्या स्वभावेन चञ्चलतया चपलतया, लब्धप्रसरेण - प्राप्तावकाशेन एकेनापि, सहस्रताम् - सहस्रसंख्यकत्वम्, उपगतेन - प्राप्तेन इव, मनसा - चित्तेन, आकुलीक्रियमाणाः - व्यग्रिक्रियाणाः, विह्वलताम् - अस्थिरताम्, उपयान्ति - गच्छन्ति।

लक्ष्म्याः लाभेनापि राजानः व्याकुलीभूताः भवन्ति

विग्रहः - धनलवलाभावलेपः - धनस्य लवः धनलवः, तस्य लाभः धनलवलाभः, तेन अवलेपः धनलवलाभावलेपः।

**सारः** - परिश्रान्तखगग्रीवप्रदेशवत् चेत् चञ्चलाभिः खद्योताभासवत् क्षणं मनोहराभिः विद्वद्भिः निन्दिताभिः सम्पद्भिः विमुह्यमानः स्वल्पैः ऐश्वर्योपलब्धिगर्वेण विस्मृतजन्मवृत्तान्ताः कफादिवृद्धिदूषितरुधिरेण इव, कामादिदोषैः प्रवृद्धवनितादिविषयानुरागैः पीड्यमानाः पञ्चभिः अपि शब्दादिबहुविधरसलोलुपत्वात् अनेकसहस्रसंख्याकैः इन्द्रियैः निरन्तरं

व्याप्रियमाणा चापल्येन कारणेन लब्धावसरेण एकेनापि चित्तेन सहस्रतां प्राप्तेन इव व्याकुलीभूताः सन्तः केचित् राजानः विह्वलाः भवन्ति।

**पाठभागः**

**ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते। मदनशरैर्मर्माहता इव मुखभङ्गसहस्राणि कुर्वते, धनोष्मणा पच्यमाना इव विचेष्टन्ते, गाढप्रहाराहता इव अङ्गानि न धारयन्ति, कुलीरा इव तिर्यक् परिभ्रमन्ति। अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्यन्ते, मृषावाद-विष-विपाक-सञ्जात मुखरोगा इवातिकृच्छ्रेण जल्पन्ति। सप्तच्छदतरव इव कुसुमरजोविकारै रासन्नवर्त्तिनां शिरःशूलमुत्पादयन्ति, आसन्नमृत्यव इव बन्धुजनम् अपि नाभिजानन्ति। उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते, कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषाभरणानीव सोष्माणं न सहन्ते। दुष्टवारणा इव महामानस्तम्भनिश्चलीकृताः न गृह्णन्त्युपदेशम्, तृष्णाविष-मूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति। इषव इव पानवर्द्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति। दूरस्थितान्यपि फलानीव दण्डवि क्षेपैर्महाकुलानि शातयन्ति। अकालकुसुमप्रसवा इव मनोहराकृतयोऽपि लोकविनाशहेतवः, श्मशानाग्नय इवातिरौद्रभूतयः। तैमिरिका ईवादूरदर्शिनः। उपसृष्टा इद क्षुद्राधिष्ठितभवनाः, श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति, चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति। अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्तयो भवन्ति, तदवस्थाश्च व्यसनशतशरव्यतामुपगताः, वल्मीकतृणाग्रावस्थिताः जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।**

एते राजानः सूर्यादिग्रहैः गृहीता इव भवन्ति

**व्याख्या** - ग्रहैः - राह्वादिभिः, गृह्यन्ते इव - ध्रियन्ते इव, मूर्तैः देवयोनिविशेषैः, अभिभूयन्त इव - आक्रम्यन्त इव, मन्त्रैः - अभिचारमन्त्रैः आवेश्यन्त इव - आवेशं नीयन्त इव, सत्वैः - हिंस्रजन्तुभिः, अवष्टभ्यन्त इव - हठेन गृह्यन्त इव, वायुना - पवनेन, विडम्ब्यन्त इव - इतस्ततो विक्षिप्यन्त इव, पिशाचैः - राक्षसैः ग्रस्यन्त इव - कवलीक्रियत इव, मदनशरैः - कन्दार्पबाणैः मर्माहताः - मर्मस्थले ताडिताः, इव तद्वत्,

मुखभङ्ग सहस्राणि - आननविकृतिसहस्राणि, कुर्वते - विदधते, धनोष्मणा - धनस्य द्रव्यस्य ऊष्मणा - तापेन, पच्यमाना इव - पाकविषयीक्रियमाणा इव, विचेष्टते - विविधां चेष्टां कुर्वन्ति, गाढप्रहाराहता इव - गाढप्रहारेण तीव्राघातेन - आहता इव, अङ्गानि अवयवान्, न धारयन्ति - स्वयं न वहन्ति, कुलीरा इव - कर्कटका इव, तिर्यक् - कुटिलं, परिभ्रमन्ति - परिभ्रमणं कुर्वन्ति, अधर्मभग्नगतयः - अधर्मेण असदाचारेण भग्ना विनष्टाः गतिः सत्कर्मणि वृत्तिः पक्षे गमनं येषां ते तथाभूताः, पङ्गव इव खञ्जरा इव परेण - सचिवादिना पक्षे बन्धुवर्गेण, संचार्यन्ते सत्कर्माणि प्रवर्त्यन्ते पक्षे करग्रहणादिना गमनं कार्यन्ते, मृषावादविषविपाकसञ्जातमुखरोगा इव मृषावादः असत्यभाषणं तस्य विपाकः परिणामः तेन सञ्जातः - समुत्पन्नः, मुखरोगः आननव्याधिः येषाम् ते तादृशा इव, अतिकृच्छ्रेण - महता कष्टेन, जल्पन्ति - ब्रुवन्ति, सप्तच्छदतरव इव - सप्तपर्णवृक्षा इव, कुतुमरजोविकारैः - कुसुमानि नेत्ररोगाः तिरस्कारसूचकनयनभङ्गीविशेषा इति यावत् त एव रजोविकारः रजोगुणपरिणामाः तैः पक्षे कुसुमरजसां पुष्पपरागाणां विकारैः विकृतिभिः आसन्नवर्तिनां - समीपस्थितानां (जनानां) शिरः शूलम् - शिरोवेदनाम्, उत्पादयन्ति - जनयन्ति, आसनमृत्यव इव - आसन्नः प्राप्तः समीपवर्तीति यावत् मृत्युः मरणं येषां ते तथाविधा इव, बन्धुजनमपि - स्वजनमपि, नाभिजानन्ति - न परिचिन्वन्ति, उत्कुपितलोचना इव- उत्कुपिते रुग्णे लोचने नेत्रे येषां ते तथोक्ता इव, तेजस्विनः - प्रतापिनः जनान् पक्षे सूर्यादिकान्, नेक्षन्ते - नावलोकयन्ति, कालदष्टा इव - कालेन महाविषधरेण दष्टा विक्षता इव, महामन्त्रैरपि - षाड्गुण्यादिभिरपि पक्षे गारुडमन्त्रैरपि, न प्रतिबुध्यन्ते - न प्रबोधं प्राप्नुवन्ति, जातुषाभरणानि इव - लाक्षानिष्पन्नभूषणानि इव, सोष्माणं - तेजस्विनं पुरुषं पक्षे अग्निम् न सहन्ते - न मुष्यन्ति, दुष्टवारणा इव - दुष्टगजा इव, महामानस्तम्भनिश्चलीकृताः - महान् अत्युत्कृष्टो यो

राज्ञामवस्थन्तराणि वर्णयति

मानः अभिमानः तल्लक्षणो यः स्तम्भः स्थूणा तेन निश्चलीकृताः स्तब्धतां प्रापिताः पक्षे महत् दीर्घेमानं प्रमाणं यस्य एवंविधो यः स्तम्भः आलानस्तम्भः तेन निश्चलीकृताः - स्थिरीकृताः (सन्तः), उपदेशं शिक्षां पक्षे हस्तिपकवाक्यं, न गृह्णन्ति - न आददते अवगणयन्तीत्यर्थः, तृष्णाविषमूर्च्छिताः - तृष्णैव विषं गरलं तेन मूच्छिता मोहं प्राप्ताः, सर्व पदार्थ, कनकमयमिव सुवर्णमयमिव, पश्यन्ति - अवलोकयन्ति, इषव इव - बाण इव, पानवर्द्धिततैक्ष्ण्याः पानेन मधुपानेन वर्द्धितं तैक्ष्ण्यम् उग्रता येषाम् एवंविधाः, परप्रेरिताः- परेण अन्येन प्रेरिताः उत्साहं प्रापिताः पक्षे परेण धनुषा प्रेरिताः नोदिताः, विनाशयन्ति- विनाशं जनयन्ति। दण्डविक्षेपैः सामदानदण्डभेद इति तृतीयोपायप्रयोगैः, पक्षे यष्टिनिक्षेपैः दूरस्थितान्यपि दविष्ठदेशवर्तिन्यपि, फलानि इव- आम्रादीनि इव, महाकुलानि उत्तमवंशान् कुलीनान् इत्यर्थः, शातयन्ति पीडयन्ति पक्षे पातयन्ति। अकालकुसुम-प्रसवा इव-अकाले असमये कुसुमप्रसवाः पुष्पोद्गमा इव, मनोहराकृत्तयोऽपि मनोहराः मनोज्ञाः आकृतयः आकाराः येषाम् एवंविधा अपि, लोकविनाशहेतवः - लोकक्षयकारणानि पक्षे लोकविनाशसूचककारणानि (भवन्ति), श्मशानाग्नय इव - श्मशानं प्रेतवनं तस्य अग्नयो वह्नय इव, अतिरौद्रभूतयः- अतिरौद्रा अतिभयंकरा भूतिः सम्पत् पक्षे भस्म येषां ते तादृशाः, तैमिरिका इव - तिमिरं नेत्ररोगः सः संजातो येषां त इव, अदूरदर्शिनः - दूरं परलोकं भाविनं दोषं वा न पश्यन्ति पक्षे दूरस्थितं वस्तु न विलोकयन्ति, उपसृष्टा इव वेश्या इव, क्षुद्राधिष्ठित-भवनाः - क्षुद्रैः : नीचपुरुषैः अधिष्ठितम् आश्रितं भवनं गृहं येषां ते तादृशाः पक्षे क्षुद्रैः विटैः अधिष्ठितं भवनं यासां ताः तादृश्यः, श्रूयमाणा अपि - अकर्ण्यमाना अपि, प्रेतपटहा इव - मृतकसमीपे वाद्यमाना आनका इव उद्वेजयन्ति - विक्षोभयन्ति, चिन्त्यमाना अपि चेतसि स्मर्यमाणा अपि, महापातकाध्यवसाया इव - महापातकानां ब्रह्महत्यादीनाम् अध्यवसाया

उद्योगा इव, उपद्रवम्- आशान्तिम्, उपजनयन्ति - निष्पादयन्ति अनु-दिवसम् - प्रतिदिवसम्, पापेन - पातकेन, आपूर्यमाणा इव - भ्रियमाणा इव, आध्मातमूर्तयः - स्थूलदेहाः, भवन्ति - जायन्ते, च - पुनः, तदवस्थाः - ताः पूर्वोक्ताः अवस्था येषां ते तादृशाः, व्यसनशतशरव्यताम् - व्यसनानां द्यूतादीनां शतं तस्य शरव्यं लक्ष्यं तस्य भावः तत्त्वम् आश्रयत्वम्, उपगताः प्राप्ताः (सन्तः), वल्मीकतूणाग्रावस्थिताः- वल्मीकं वामलूरः कीटविशेषेण निस्सारितमृत्तिकाराशिः इत्यर्थः। तत्र उत्पन्नानि तृणानि नडादीनि तेषाम् अग्राणि प्रान्तानि तेषु अवस्थिताः विद्यमानाः, जलबिन्दव इव - जलकणा इव, पतितम् अपि स्वधर्मात् च्युतम् अपि पक्षे पृथिव्यां परिभ्रष्टम् अपि, आत्मनं - स्वं, नावगच्छन्ति - न जानन्ति।

विग्रहः - महामानस्तम्भनिश्चलीकृताः - महान् चासौ मानः च महामानः, तेन स्तम्भवत् निश्चलीकृताः महामानस्तम्भनिश्चलीकृताः।

**सारः -** एते हि राजानः सूर्यादिग्रहैः गृहीता इव, प्रेतैः आक्रान्ता इव, तान्त्रिकमन्त्रैः आविष्टभूता इव, हिंस्रकजन्तुभिः आकृष्य बाध्यमाना इव, पावनेन इतस्ततः विक्षिप्यमाणा इव पिशाचैः गृह्यमाणा इव लक्ष्यन्ते। कामशराहतहृदया ते राजानः मुखविकृतिसहस्राणि दर्शयन्ति इव। सम्पदुष्मणा पच्यमानाः विविधचेष्टां कुर्वन्ति इव । तीव्रघातेक्षताः. सन्तः स्वहस्तादीनि अङ्गानि स्वयमेव न वोढुं शक्नुवन्ति इव। राजानः वक्रयति-शीलकर्कटा इव सर्वैः सह कुटिलतां आचरन्ति। पापप्रणष्टगमनापङ्गव इव राजानः अपि अन्यसाहय्येन गमनं कुर्वन्ति अर्थात् राज्यकार्यं सम्पादयन्ति। विषविकारजनितमुखरोगयुक्तभाषणवत् तेऽपि मिथ्यादिदोषेण अतिकष्टेन वदन्ति। सप्तवर्णवृक्षा यथा स्वपुष्पपरागैः शीर्षवेदनामुत्पाद्य जनान् व्यथयन्ति तथैव राजानोऽपि स्वदुर्गुणैः क्लेशयन्ति लोकान्। सद्यः सम्भावितमृत्यवः यथा स्वपरिवारजनान् न परिचिन्वन्ति तथा तेऽपि अहङ्कारवशात् स्वजनान् न अपेक्षन्ते। यथा नेत्ररोगिणः तेजस्विपदार्थान् न

द्रष्टुं शक्नुवन्ति तथैव राजानः ईर्ष्यया प्रतापिनो जनान् न पश्यन्ति। भुजङ्गदष्टा यथा मन्त्रैरपि न चेतनाम् आप्नुवन्ति तथैव तेऽपि सन्मन्त्राणाभिरपि बुद्धिवैपरीत्यात् कर्तव्यादिकं न अनुजानन्ति। यथा महमत्तगजाः दीर्घालानसम्बद्धः अपि हस्तिपकवचनं न गण्यन्ति तथा राजानोऽपि महदहङ्कारस्तब्धा शिक्षावचनं नाङ्गीकुर्वन्ति। धनलिप्सया मदोन्मत्ताः ते सर्वाणि वस्तुनि सुवर्णमयं इव पश्यन्ति। यथा धनुर्धारिभिः प्रक्षिप्ता प्रस्तरघर्षणतैक्ष्ण्याः बाणाः लक्ष्यभूतान् प्राणरहितान् कुर्वन्ति तथैव राजानोऽपि मद्यपानेन उन्मत्ताः धूर्तैः प्रेरिताः प्रजादीन् पीडयन्ति। यथा दूरस्तानि फलानि जना लगुडादिभिः पातयन्ति तथैव निजराज्यसीमा-बहिर्भूतानि अपि सम्भ्रान्तकुलानि करदानादिभिरुपायैः नाशयन्ति। यथा पुष्पाणाम् अकालप्रफुल्लानि (पुष्पाणि) सुन्दराणि अपि लोकनाश-सूचकानि भवन्ति, तथैव सुरूपा अपि राजानः लोकविनाशकाः भवन्ति। यथा परेतभूमिवह्नयः अन्येभ्यः भयोत्पादकभस्मवन्तः भवन्ति। यथा तिमिरनामकनेत्ररोगाक्रान्ता जनाः दूरस्थितवस्तुदर्शनेऽशक्ताः भवन्ति तथैव तेऽपि तमोगुणाभिरन्धीभूताः दोषदर्शनेऽशक्ताः भवन्ति। वेश्यागृहं इव राज्ञां भवनं नीचपुरुषैः आच्छादितं भवति। दिवङ्गतव्यक्तिपुरस्तात् वाद्यमानाः पटहाः यथा भयं उत्पादयन्ति तथैव राजानोऽपि उद्वेगं उत्पादयन्ति। स्मर्यमाणा अपि ब्रह्महत्यादि महापातकप्रयासा यथा खेदं उत्पादयन्ति तथैव राजानोऽपि स्मर्यमाणा अपि भयं उत्पादयन्ति। प्रतिदिनं पापेन पूरिता स्थूलशरीराः भवन्ति इव। एवंविधाश्च ते राजानः कामाद्युत्पन्नानां शताधिकदोषाणां लक्ष्मीभूता अपि वल्मीकोपरिस्थिततृणाग्रलग्नजलबिन्दव इव मोहात् आत्मानं पतितम् अपि न जानन्ति।

## Summarised Overview

मङ्गलाभिनिवेशिना जनेन लक्ष्म्याः स्वभाववैशिष्ट्यानि सम्यगवधेयानि भवन्ति । चञ्चलस्वभावा मदकारिणी चेयं लक्ष्मीः पुरुषस्य विषयेषु अत्यासङ्गं जनयति । नीचप्रकृतिरियं न कदापि एकत्र तिष्ठति। अत एव तस्याः परिपालने महान् यत्नः कार्यः । शीलेन वा गुणगणेन वा श्रुतेन वा तां स्वाधीनातां कर्तुं न शक्नोति। इयम् ऐश्वर्योपलब्धये मदान्धतायाः च कारणं भवति। इयम् इन्द्रियाणि विषयाभिमुखानि विधाय चित्तं कलुषीकरोति । लक्ष्म्याः संसर्गेण पुरुषाणां सदसद् विवेको विनश्यति। सर्वविधधर्माचरणानां च विनाशश्च भवति। कामादिविकाराणां प्राबल्येन पुरुषस्य सर्वे गुणाः नश्यन्ति । विविधनिन्दिताचरणजन्यलोकापवादाः जायन्ते च ।अपि च चञ्चलस्वभावा इयं नैकत्र स्थिरतया वासं करोति।

राजानः कामशरैः पीडिताः मुखभङ्गसहस्राणि कुर्वन्ति धनाहङ्कारेण गर्विताः विविधाः चेष्टाः कुर्वन्ति। अङ्गानि सम्यक् न धारयन्ति। सर्वे कौटिल्यम् एव आचरन्ति। अधर्ममार्गे नितरां सञ्चरन्ति। पृष्टे प्रयासेन किमपि जल्पन्ति। समीपवर्तिनां क्लेशमुत्पादयन्ति। स्वीयं बन्धुजनं न पश्यन्ति। तेजस्विनः पुरुषान् न ईक्षन्ते। मन्त्रिणामुपदेशं न आकर्णयन्ति। प्रतापिनं पुरुषं न सहन्ते। अहङ्कारयुक्ताः परेषां उपदेशं न श्रृण्वन्ति। सर्वं वस्तु कनकमयं इव पश्यन्ति। परप्रेरिताः सर्वान् प्रजादीन् विनाशयन्ति। दूरस्थितान्यपि कुलानि नाशयन्ति। ते अतिरौद्रभूतियुक्ताः भवन्ति। अदूरदर्शिनो भवन्ति। श्रवणमात्रेण अन्यान् उद्वेजयन्ति । चिन्तामात्रेण उपद्रवं उपजनयन्ति । नीचजनाधिष्ठिताः सर्वदा भवन्ति। ते लोकविनाशहेतवः भवन्ति। अनुदिनं पापमूर्तयो भवन्ति। ते आत्मानं पतितमपि न जानन्ति।

## Assignments

**व्याख्यात**

1. विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्त्तिम्।
2. अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोशमण्डलमपि मुञ्चति भूभुजम्।
3. गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला।

4. परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्।

5. ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुकविपाका। विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजन-प्रिया। रेणुमयीव स्वच्छमपि कलुषीकरोति।

**उत्तरयत**

6. सरस्वतीपरिगृहीतं लक्ष्मीः कुतो नालिङ्गति?

7. लक्ष्म्याः स्वभाववैशिष्ट्यान् शुकनासोक्तदिशा संगृह्य लिखत।

8. लक्ष्मीः क्षीरसागरात् कानि गृहीत्वा इव उद्गता?

9. लक्ष्मीवत् अनार्या काचन इह जगति न वर्तते। कुतः?

10. पारुष्यमभ्यसितुं लक्ष्मीः कुत्र निवसति?

11. किमर्थं लक्ष्मीः नारायणमूर्तिमाश्रयति?

12. कुतः लक्ष्मीं हिडिम्बया उपमीयते?

13. कान् लक्ष्मीः तिरस्करोति

14. परस्परविरुद्धस्वभावा भवति लक्ष्मीः। उदाहरणद्वयं सूचयतु।

15. लक्ष्म्या गृहीतानां राज्ञां स्वभावं स्पष्टयत।

## Suggested Readings

1. Kadambari of Banabhatta. translated by Mandoor Sukumaran, DC Books Kottayam 1999

2. The Kadambari of Banabhatta. With the commentaries of Banuchandra and Siddhachandra, Ed by Kashinath Pandurang parab, Nirnaya sagar press, Bombay 1916

# References


1. Kadambari of Banabhatta with , Dr Jayasankarlal Tripady' commentary, Chowkhamba Krishnadas academy, Varanasi 2013
2. Kadambari - Sukanasopadesha of Banabhatta, with Rampal Sastri's Commentary Chaukhamba Publishers Varanasi 2018
3. Ramnarayanlal arunkumar, Kadambari - Sukanasopadesha of Banabhatta, 2 Katra road, Allahabad 2002


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# ‘अपरे तु स्वार्थनिष्पादनपरैः’ इत्यारभ्य ‘भ्रातरः उच्छेद्याः’ पर्यन्तम्

## Learning Outcomes

- कादम्बर्याः वैशिष्ट्यम् अवगच्छति।
- शुकनासोपदेशस्य मूल्यानाम् अवबोधनम्।
- नूतनपदावलीम् अवगच्छति।

## Background

महाकवेः बाणभट्टस्य कादम्बरीकथायां मुख्येषु विविधविषयेषु शुकनासोपदेशस्यापि मुख्यं प्राधान्यमस्ति। महाभारते भगवद्गीता इव कादम्बर्यां शुकनासोपदोशः विद्यते। पूर्वस्मिन् एकके राज्ञां विपरीतजीवने मुख्यं कारणं राजलक्ष्मीः इति अधीतम्। अस्मिन् पाठभागे लक्ष्म्या चापल्येन राज्ञाम् अवस्थान्तराणि बाणभट्टेन मनोहारितया वर्णितम्। तत् पश्यामः.

## Keywords

SGOU

स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रः, द्यूतं, मृगया , स्वदारपरित्यागः, अविशेषज्ञता, आत्मविडम्ब-नाञ्च, विगतान्यकर्तव्यः, सहजप्रेमार्द्रहृदयानुरक्ता।

## Discussion

**पाठभागः**

**अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रः आस्थाननलिनीबकौः द्यूतं विनोद इति, परदाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्यमिति, स्वदारपरित्यागः अव्यसनितेति, गुरुवचना-वधीरणम् अपरप्रणेयत्वमिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्य-गीत-वाद्य-वेश्याभिसक्तिः रसिकतेति, महापराधानाकर्णनं महानुभावतेति, परिभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति देवावमाननं महासत्त्वतेति, वन्धिजनख्यातिः यश इति, तरलता उत्साह इति, अविशेषज्ञता अपक्षपातित्वम् इति दोषानपि गुणपक्षमध्यारोपयद्भिः स्वयमपि विहसद्भिः प्रतारणकुशलैः धूर्तैः अमानुषोचिताभिः स्तुतिभिः प्रतार्य्यमाणाः वित्तमदमत्तचित्ता निश्चेतनतया तथैव इत्यन्यारोपितालीकाभिमाना-मर्त्यधर्मणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषम् आत्मानम् उत्प्रेक्षमाणा प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्य उपहास्यताम् उपयान्ति।**

स्वार्थतत्पराणां उपदेशाः

**व्याख्या** - अपरे तु - अन्ये तु (राजानः दोषानपि गुणपक्षमध्यारोपयद्भिः धूर्तानां स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यतामुपयान्ति इति अन्वयः) स्वार्थनिष्पादनपरैः - स्वस्य आत्मनः यः अर्थः प्रयोजनं तस्य निष्पादनं संसाधनं तस्मिन् परैः परायणैः, धनपिशितग्रासगृध्रैः - धनानि

द्रव्याणि एव पिशितानि मांसानि तेषां ग्रासे ग्रहणे गृध्रैः एतन्नामकैः प्रसिद्धैः पक्षिभिः इव, आस्थाननलिनीबकैः - आस्थानं नृपोपवेशनस्थलं तदेव नलिनी कमलिनी तस्यां बकैः बकपक्षिभिः इव, द्यूतं - द्यूतक्रीडा, विनोदः - मनोरञ्जनम् इति कथनेन (वस्तुतस्तु द्यूतं दुर्व्यसनत्वात् दोष एवेत्यभिप्रायः), परदाराभिगमनं - परस्त्रीसम्भोगः, वैदग्ध्यम् - चातुर्थम् इति कथनेन (परमार्थतस्तु परदाराभिगमनं पातोत्पादकमायुः क्षयकरञ्चेति भावः), मृगया - आखेटकम्, श्रमः - व्यायामः इति कथनेन (वस्तुतस्तु प्राणिहिंसा - करत्वात् आखेटो महान् दोष इत्याशयः), पानं - मद्यसेवनं, विलासः - भोगविशेषः इति कथनेन ( यथार्थतस्तु मद्यपानं महापातकम् इति भावः), प्रमत्तता - गर्विता, शौर्यम् - वीरता इति कथनेन ( वस्तुतस्तु प्रमत्तता आत्मविनाशकारिणी एवेति भावः), स्वदारपरित्यागः - निज-भार्यायाः त्यजनम्, अव्यसनिता - अनासक्तिः इति कथनेन (परमार्थतस्तु पत्नीत्यागः महापापदायक एवेति भावः), गुरुवचनावधीरणम् - गुरुवचनस्य गुरोर्वाक्यस्य अवधीरणम् अवहेलनम्, अपरप्रणेयत्वम् - अनन्यवश्यत्वम् इति कथनेन (परमार्थतस्तु गुरुवाक्यातिक्रमणम् अकल्याणकरमेवेति भावः), अजितभृत्यता - जिताः वशवर्तीकृताः भृत्याः सेवकाः येन स जितभृत्य तदितरः अजितभृत्यः तस्य भावः, सुखोपसेव्यत्वं सुखेन अनायासेन उपसेवितुं योग्यः सुखोपसेव्यः तस्य भावः इति कथनेन (वस्तुतस्तु सा क्षतिकारिका एव भृत्यानां स्वेच्छाचारित्वात् इति भावः), नृत्यगीतवाद्यवेश्याभिसक्तिः - नृत्यं नर्तनं गीतं गानं वाद्यम् आतोद्यम् वेश्या गणिका तासु अभिसक्तिः आसक्तिः, रसिकता - रसज्ञता इति कथनेन (वस्तुतस्तु नृत्यादिषु आसक्तता कामजदोष एवेति भावः), महापराधा-नाकर्णनं - महतो विशालस्य अनाकर्णनम् - अश्रवणं महानुभावता - उदारहृदयता इति कथनेन (वस्तुतस्तु इदं कर्तव्यस्खलनं दोष एव) परिभवसहत्वम् - अन्यकृततिरस्कारसहनशीलत्वम्, क्षमा - क्षान्तिः इति

कथनेन (वस्तुतस्तु इदं भीरुत्वमेवेति भावः) स्वच्छन्दता - स्वैरिता, प्रभुत्वम् -ऐश्वर्यम्  इति कथनेन (वस्तुतस्तु सा अनर्थोत्पादकतया महान् दोष एवेति भावः) देवावमाननं - देवानां देवतानाम् अवमाननं, महासत्वता - महापराक्रमशालिता इति कथनेन (परमार्थतस्तु देवापमानः अमाङ्गल्यकरत्वात् दोष एव) वन्दिजनख्यातिः - वन्दिजनाः मागधादयः तैः कृता ख्यातिः प्रशंसा, यशः - कीर्तिः इति कथनेन (यथार्थतस्तु सा वेतनदानजन्या मिथ्या स्तुतिः दोष एव), तरलता - चञ्चलता, उत्साहः इति कथनेन (वस्तुतस्तु चाञ्चल्यं पुरुषाणां दोष एव), अविशेषज्ञता - विशेषाविशेषानभिज्ञता, अपक्षपातित्वम् - पक्षपातशून्यत्वम् माध्यस्थ्यमिति यावत् इति कथनेन), (वस्तुतस्तु विशेषज्ञानाभावे साधुदुर्जनयोः अनभिज्ञानं दोष एवेति भावः), दोषानपि - दूषणान्यपि, गुणपक्षम् - गुणकोटिम्, अध्यारोपयद्भिः - आरोपयद्भिः, अन्तः - अन्तःकरणे, स्वयमपि - आत्मनापि, विहसद्भिः- हास्यं कुर्वद्भिः, प्रतारणकुशलैः - प्रतारणं वञ्चना तत्र कुशलैः निपुणैः, धूर्त्तैः - धूर्तपुरुषैः, अमानुषोचिताभिः - अमानुषः मनुष्यभिन्नः देव इत्यर्थः तस्य उचिताभिः योग्याभिः, स्तुतिभिः - प्रशंसाभिः, प्रतार्यमाणाः - वञ्चमानाः, वित्तमद - मत्तचित्ताः - वित्तस्य द्रव्यस्य मदः गर्वः तेन मत्तानि चित्तानि हृदयानि येषां ते तथाविधाः, निश्चेतनतया - निर्गता चेतना ज्ञानं यस्मात् तस्य भावः (तत्ता) तया, तथैव - 'यथा इमे कथयन्ति तथैवाहम्,' इति एवं प्रकारेण, आत्मनि स्वस्मिन्, आरोपितालीकाभिमानाः - आरोपितः अध्यासितः अलोकाभिमानः मिथ्यागर्वः यैः ते तादृशाः, मर्त्यधर्माणोऽपि - मर्त्यस्य मनुष्यस्य धर्माः जरामरणादयः येषां ते तादृशाः सन्तोऽपि, आत्मानं - स्वं, दिव्यांशावतीर्णमिव - दिव्या देवसम्बन्धिनो ये अंशा भागाः तैः अवतीर्णमिव समुत्पन्नमिव, सदैवतमिव - देवताधिष्ठितमिव, अतिमानुषं - मानवमतिक्रान्तम् उत्प्रेक्षमाणाः - मन्यमानाः, प्रारब्धदिव्योचितचेष्टानुभावाः - प्रारब्धा या दिव्यो-

चिताः स्वर्गीयजनयोग्याः चेष्टाः क्रियाः ताभिः अनुभावः माहात्म्यं येषां ते तादृशाः, सर्वजनस्य - सकललोकस्य, उपहास्यताम् - उपहासयोग्यताम्, उपयान्ति - गच्छन्ति ।

विग्रहः - गुरुवचनावधीरणम् - गुरूणां वचनानि गुरुवचनानि, तेषाम् अवधीरणं गुरुवचनावधीरणम् ।

**सारः** - अन्यान् नृपतीन् तु स्वकार्यसाधनतत्पराः धनरूपमांसदाने गृध्ररूपाः पद्मिनीवनसदृशस्य नृपनिवाससदनस्य बकरूपाः केचन धूर्ताः अग्रेतनरूपेण वर्जितमपि द्यूतादिकर्म विपरीततया इत्थं बोधयन्ति यत् - द्यूतक्रीडनं मनोरञ्जनं, (अतः तस्मिन् न कश्चिद्दोषः) । परस्त्रीसम्भोगचातुर्यं न व्यभिचारः, मृगया व्यायामम् इति अतः न पातकं जीविहिंसायां, मदिरापानम् उपभोगविशेषः, अनवधानता वीरकार्यं, स्वभार्यत्यागः अनासक्तिः, गुरुवचनातिक्रमणं स्वच्छन्दता इति । नृत्यगानवाद्यवारवनितादिषु आसक्तिः रसभिज्ञता । तिरस्कारसहनं क्षमाशीलता इति । स्वच्छन्दतया वर्तनं विभुत्वम् । देवादीनां तिरस्कारः महाशक्तिशालित्वम् इति । अस्थैर्यम् प्रगल्भता इति । विशेषाविशेषानभिज्ञत्वं मध्यस्थता इति एवमादिप्रकारेण दोषसमूहेषु गुणगणान् आरोप्य चेतसि स्वयं उपहसन्तः वञ्चनानिपुणाः धूर्ताः लोकातिरिक्तैः प्रशंसावचनैः वञ्चयन्ति । अनेन प्रकारेण धूर्तजनैः समुपस्थापितं गुरुरूपेण समारोपितदोषसमूहम् अवितथं मन्यमाना अपि मरणशीला ते राजानः स्वस्मिन् देवांशावतरणं आरोपयन्तः आत्मनि दिव्यभावं स्वीकुर्वन्ति, तथा च देवसदृशान् क्रियाकलापान् कृत्वा स्वमहत्वं प्रदर्शयन्तः लोकानां हास्यताम् उपगच्छन्ति ।

### पाठभागः

**आत्मविडम्बनाञ्च अनुजीविना जनेन क्रियमाणम् अभिनन्दन्ति । मनसा देवताध्यारोपणविप्रतारणासद्भूतसंभावनोपहताश्चान्तः प्रविष्टापरभुजद्वय-**

**मिव आत्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाट-माशङ्कते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति । दृष्टिपातमपि उपकारपक्षे स्थापयन्ति। सम्भाषणमपि संविभागमध्ये कुर्वन्ति। आज्ञामपि वरप्रदानं मन्यन्ते। स्पर्शमपि पावनमाकलयन्ति। मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्ति अभिवादनार्हान् नाभ्युत्तिष्ठन्ति गुरून्। अनर्थकायासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम्, जरा-वैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम्, आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवदिने।**

स्वार्थतत्पराणां धूर्तानां उपदेशान् श्रुत्वा राज्ञां प्रवृत्तिः

व्याख्या -च- किञ्च, अनुजीविना जनेन सेवकजनेन, क्रियमाणां - विधीयमानाम्, आत्मविडम्बनां - स्वस्मिन्नविद्यमानगुणारोपलक्षणां वञ्चनां, अभिनन्दन्ति - प्रशंसन्ति देवताध्यारोपणविप्रतारणासम्भूतसम्भावनो-पहताः - देवतायाः विष्ण्वादेः अध्यारोपणम् आरोपणम् तदेव प्रतारणा वञ्चना तया सम्भूता सञ्जाता या सम्भावना देवरूपत्वेन निश्चयः तया उपहता विनष्टबुद्धयः (सन्तः), मनसा - चेतसा, आत्मबाहुयुगलं - निजभुजद्वयम्, अन्तः प्रविष्टापरभुजद्वयमिव - अन्तः मध्ये प्रविष्टं गतम् अपरम् अन्यत् भुजद्वयं बाहुयुगं यस्मिन् एवंविधमिव, सम्भावयन्ति - मन्यन्ते। स्वललाटं - स्वकीयभालं, त्वगन्तरिततृतीयलोचनं - त्वचा चर्मणा अन्तरितं पिहितं तृतीयं विषमं लोचनं नयनं यस्मिन् एतादृशम्, आशङ्कते - शङ्काविषयी कुर्वते। दर्शनप्रदानमपि - (लोकानां ) नेत्रगोचरीभवनमपि, अनुग्रहं - प्रसादं, गणयन्ति - मन्यन्ते। दृष्टिपातमपि - ( नेत्राभ्याम् ) अवलोकनमपि, उपकारपक्षे - उपकृतिकोटौ, स्थापयन्ति - निदधति। सम्भाषणमपि - आलापमपि, संविभागमध्ये - संविभागः - दानम् तस्य मध्ये, कुर्वन्ति - गणयन्ति। आज्ञामपि - आदेशमपि, वरप्रदानं- अभिलषितदानं मन्यन्ते - जानन्ति। स्पर्शमपि - संश्लेषमपि, पावनम् - पवित्रताजनकम्, आकलयन्ति - विचारयन्ति । मिथ्यामाहात्म्यगर्वनिर्भराः - मिथ्या वृथा

माहात्म्यम् महनीयता तस्य गर्वः अभिमानः तेन निर्भराः परिपूर्णाः, देवताभ्यः - विष्ण्वादिभ्यः, न प्रणमन्ति - न नमस्कुर्वन्ति, द्विजातीन् - ब्राह्मणान्, न पूजयन्ति - न अर्चयन्ति, मान्यान्- माननीयान्, न मानयन्ति - न सत्कुर्वते, अर्चनीयान् - पूजनीयान्, न अर्चयन्ति - न पूजयन्ति। अभिवादनार्हान् उपसंग्रहणोचितान्, न अभिवादयन्ति - न पादग्रहणं कुर्वन्ति, गुरून् - आचार्यान्, न अभ्युत्तिष्ठन्ति - न अभ्युत्थानं कुर्वन्ति। अनर्थकायासान्तरितविषयोपभोगसुखम् - अनर्थकः निष्फलः या आयासः श्रौतस्मार्तकर्मानुष्ठाने प्रयासः तेन अन्तरितं व्यवहितं दूरीकृतमित्यर्थः विषयोपभोगसुखं रमणीसम्भोगसुखं येन तं तादृशम्, इति - अस्मादेव कारणान्, विद्वज्जनं - पण्डितजनम्, उपहसन्ति - उपहासं कुर्वन्ति। जरावैक्लव्यप्रलपितम् - जरा वार्धक्यं तया यत् वैक्लव्यं विकलतो तेन प्रलपितं जल्पितम्, इति कृत्वा, वृद्धजनोपदेशं - परिणतवयस्कजनशिक्षां, पश्यन्ति - अवलोकयन्ति असारं मन्यन्त इति भावः। आत्मप्रज्ञापरिभवः- आत्मनः स्वस्य या प्रज्ञा बुद्धिः तस्याः परिभवः तिरस्कारः, इति कृत्वा, सचिवोपदेशाय - सचिवस्य मन्त्रिणः उपदेशाय शिक्षायै, असूयन्ति - असूयां कुर्वन्ति। हितवादिने - कल्याणभाषिणे, कुप्यन्ति - क्रोधं कुर्वन्ति।

विग्रहः - दर्शनप्रदानं - दर्शनस्य प्रदानम्।

**सारः** - तथा परिजनवर्गैः क्रियमाणां स्वस्मिन् आवर्तमानगुणारोपणरूपाम् अनुकृतिं राजानः प्रशंसन्ति । अविद्यमानदेवत्वादिगुणारोपणवञ्चनतया असम्भवाभिरपि सम्भावनाभिः विकृतमतयो नृपतयः आत्मानं चतुर्भुजं इव जानन्ति। स्वललाटपटलं च चर्मान्तरिततृतीयनेत्रयुक्तं मन्यमाना आत्मनं शंकरं मन्वते। ते नृपतयः लोकेभ्यः स्वसाक्षात्कारम् अपि प्रसादं मन्यन्ते, जनोपरि दृष्टिपातमपि उपकारं स्वीकुर्वन्ति। जनैः सह वार्तालापं पुरस्कारम् इव मन्वते। स्वकीयादेशमपि तेभ्यः वरप्रदानं जानन्ति। स्पर्शमपि तेषां पवित्रकरणं मन्यन्ते। मिथ्यामहत्वगर्वान्विता राजानः देवान् न

नमस्कुर्वन्ति, ब्राह्मणान् दानादिभिः न सन्तोषयन्ति, मान्यनां सम्मानं न कुर्वन्ति, पूज्यजनान् न अर्चन्ति। गुरुन् अञ्जलिं बध्वा न प्रणमन्ति, उत्थाय गुरुपादानां स्वागतं न कुर्वन्ति। राजानः स्वबुद्धितिरस्कारं मत्वा मन्त्रिणां मन्त्राणां न स्वीकुर्वन्ति। हितोपदेशकान् तिरस्कुर्वन्ति च।

### पाठभागः

**सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्द्धयन्ति, तेन सह सुखम् अवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति, तस्य वचनं श्रृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्ततामापादयन्ति, योऽहर्निशम् अनवरतमुपरचिताञ्जलिः अधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति। किं वा तेषां साम्प्रतं, येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिणः उपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेष्वभियोगः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः।**

राजानः स्तुतिपाठकान् रुचन्ते

**व्याख्या** - तं - जनं, सर्वथा - सर्वप्रकारेण अभिनन्दन्ति- प्रशंसन्ति, तं - जनम्, आलपन्ति - सम्भाषन्ते, तं, पार्श्वे - निकटे, कुर्वन्ति - विदधति रक्षन्तीत्यर्थः, तं, संवर्धयन्ति- वृद्धिं प्रापयन्ति, तेन - जनेन, सह - साकं, सुखं - सुखपूर्वकम्, अवतिष्ठन्ते - प्रवत्थानं कुर्वन्ति, तस्मै — जनाय, ददति-यच्छन्ति, तं, मित्रतां - सख्यम्, उपनयन्ति - प्रापयन्ति, तस्य - जनस्य, वचनं वचः, श्रृण्वन्ति - आकर्णयन्ति, तत्र - तस्मिन् जने, वर्षन्ति - भूयो भूयः धनप्रदानं कुर्वन्ति, तं, बहु - अधिकं, मन्यन्ते - आद्रियन्ते, तम्, आप्तताम् - विश्वस्तताम्, आपादयन्ति - प्रापयन्ति, यः- जनः, विगतान्यकर्तव्यः - विगतं दूरीभूतम् अन्यकर्तव्यम् - अस्यविधेयं यस्य स तथोक्तः, अहर्निशम् - रात्रिन्दिवम्, अनवरतम् निरन्तरम्, उपरचिताञ्जलिः- वद्धकरपुटः अधिदैवतमिव - इष्टदेवतामिव, स्तौति - स्तुतिं कुर्वन्ति, वा -

अथवा, यः - जनः, माहात्म्यम् - महिमानम्, उद्भावयति - आविष्करोति। वा - अथवा, तेषां - राज्ञां, किं, साम्प्रतं - युक्तम्, येषां - राज्ञाम्, अतिनृशंसप्रायोपदेशनिर्घृणम् - अतिनृशंसप्रायेण अतिशयनिष्ठुरप्रायेण उपदेशेन शिक्षणेन निर्घृणं निर्दयम्, कौटिल्यशास्त्रं - चाणक्यरचितनीतिशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः - अभिचारक्रिययामारणोच्चाटनाद्यनुष्ठानेन क्रूरा नृशंसा एका मुख्याः प्रकृतयः स्वभावाः येषां ते तथोक्ताः, पुरोधसः - पुरोहिताः, गुरवः - आचार्याः, पराभिसन्धानपराः - परेषाम् अन्येषाम् अभिसन्धानं वञ्चनं तत्र पराः परायणाः, मन्त्रिणः - सचिवाः, उपदेष्टारः- शिक्षादायकाः, नरपतिसहस्रभुक्तोज्झितायां - नरपतीनां यत् सहस्रं तेन पूर्वं भुक्ता उपभोगविषयीकृता पश्चात् उज्झिता त्यक्ता एवंविधायां लक्ष्म्यां श्रियाम्, आसक्तिः - प्रेमाधिक्यम्, मारणात्मकेषु - मारणं वधः तदेव आत्मा स्वरूपं येषां तथाविधेषु, शास्त्रेषु - योगनीतितन्त्रादिषु, अभियोगः- अभिनिवेशः, सहजप्रेमार्द्रहृदयानुरक्ताः - सहजं स्वाभाविकं यत् प्रेम स्नेहः तेन आर्द्रं द्रवीभूतं हृदयं चेतः तेन अनुरक्ता अनुरागयुक्ताः भ्रातरः- सहोदराः,उच्छेद्याः- उन्मूलनीयाः।

विग्रहः - विगतान्यकर्तव्यः - विगतम् अन्यं कर्तव्यं यस्य सः विगतान्यकर्तव्यः।

**सारः -** व्यक्तेतरकार्यः यः अञ्जलिं बध्वा स्वेष्टदेवतायाम् इव नित्यं रात्रिन्दिवं नृपतीन् स्तौति अथवा महत्वं प्रकटयति तस्यैव ते सम्मानं कुर्वन्ति, तेन भाषणं कुर्वन्ति, तं समीपे उपवेशयन्ति, तस्य सहयोगं कुर्वन्ति, तेन सह सुखेन तिष्ठन्ति, तस्मै यच्छन्ति, तमेव मित्रं कुर्वन्ति, तमेव उपरि उत्थापयन्ति, तस्य वचनं श्रृण्वन्ति, तम् एव श्रेष्ठपुरुषं जानन्ति तेनैव सह शिष्टतां कुर्वन्ति। येषां क्रूरशिक्षनिर्दयं चाणक्यप्रणीतं नीतिशास्त्रम् आदर्शः, मारणादि क्रूरकर्मस्वभाववन्तः पुरोहिताः धर्मोपदेशकाः, अन्यजनचञ्चलाः सचिवाः परामर्शदातारः, सहस्राधिकनृपतिभुक्तोज्झितचपलायाम्

लक्ष्म्यामनुरागः प्राणान्तकृत्सु शस्त्रेषु आग्रहः, स्वभावतः स्नेहनुरागवन्तः सहोदरा एव विनाश्याः, न खलु तेषां कृते किञ्चिदपि समीचीनम्।

## Summarised Overview

अपरेषां लक्ष्मीमदमत्तानां राज्ञाम् अवस्थाः वर्णयति। ते राजानः दोषानपि गुणपक्षे आरोपयद्भिः धूर्तैः स्तुतिभिः प्रतार्यमाणा सन्तः सर्वजनस्य उपहास्यताम् उपयान्ति। स्वार्थनिष्पादने तत्परैः धनमांसग्रहणगृध्रैः पक्षिविशेषैः राज्ञामास्थानमेव नलिनी तत्र बकैः मत्स्यग्राहिभिः पक्षिविशेषैः ततः परं दोषान् गुणपक्षे समर्थयन्ते। द्यूतक्रीडादि विनोदः इति। पापकारणमपि परदारेषु अभिगमनं रमणं सामर्थ्यम् इति। हिंसारूपाधर्मकारणीभूता मृगया व्यायामः इव। मद्यपानं विलासः इति। स्वविनाशकारणम् अनवधानता शौर्यमिति। अधर्मोऽपि स्वदारपरित्यागः अनासक्तिरिति। गुरुवचनेषु धिक्कारः अनन्यवश्यत्वम् इति। सेवकेषु स्वाधीनता सुखोपसेव्यत्वम् इति। नृत्य-गीत-वाद्य-वेश्यासु आसक्तिः रसिकतेति। महापराधानाम् ब्रह्महत्यादीनाम् अनाकर्णनं महानुभावतेति। परिभवस्यान्य-तिरस्कारस्य सहनं क्षमेति। स्वच्छन्दचारित्वं प्रभुत्वमिति। देवेषु अवमाननं महाशक्तिशालितेति, वेतनग्रहमात्रतत्पराणां स्तुतिपाठकानां स्तुतिः कीर्तिरिति, समस्तकार्येषु चाञ्चल्यम् उत्साह इति, अविवेकिता अपक्षपातित्वम् इति। एवं तत्र तत्रोक्तान् दोषान् गुणपक्षे आरोपयद्भिः राज्ञां मौढ्यात् स्वयं विहसद्भिः वञ्चनकुशलैः धूर्तैः देवताद्युचिताभिः स्तुतिभिः प्रतार्यमाणाः आत्मानं देवं मन्यमानाः अत एव दिव्योचितचेष्टामाचरन्तः सर्वजनस्य उपहास्यतां प्राप्नुवन्ति। अपि च भृत्यजनेन क्रियमाणां वञ्चनाम् अभिनन्दन्ति। एते राजानः मनसा आत्मनि देवतात्वं मन्यन्ते। भृत्यजनेन क्रियमाणां वञ्चनाम् अभिनन्दन्ति। एते राजानः मनसा आत्मनि देवतात्वम् आरोपयन्ति। तथा हि आत्मनो बाहुयुगलम् अन्तः प्रविष्टापरभुजद्वयमिव मत्वा विष्णुरूपत्वं सम्भावयन्ति। स्वकीयं ललाटभाग-मन्तर्निविष्टतृतीयलोचनमिति परमशिवरूपत्वं मन्यन्ते। लोकानां कृते आत्मनः प्रकटनम् अनुग्रहमिति चिन्तयन्ति। प्रजासु विषये स्वदर्शनमपि उपकार इति चिन्तयन्ति। दातव्यद्रव्यदानजनितसन्तोषः सम्भाषणेनैवोत्पन्न इति मन्यन्ते। आज्ञामपि वरप्रदानं मन्यन्ते। स्पर्शमपि पावनमित्याकलयन्ति। अहङ्कारेण देवानपि न नमस्कुर्वन्ति। ब्राह्मणान् न पूजयन्ति। मान्यान् न बहुमानयन्ति। अर्चयितुं

योग्यान् नार्चयन्ति। अभिवादनीयान् न अभिवादयन्ति। गुरुजनानभ्युत्थाय न स्वीकुर्वन्ति। विद्वज्जनं परिहसन्ति। वृद्धानां परिपक्वं उपदेशं जरावैक्लब्यप्रलपितमिति मन्यन्ते। मन्त्रिणाम् उपदेशः आत्मनः प्रज्ञापरिभव इति मत्वा तस्मै असूयन्ति। हितोपदेशिने कुप्यन्ति। यस्तु जनः अहोरात्रम् उपरचिताञ्जलिः अधिदैवतमिव विगतान्यकर्तव्यः स्तौति। अपि च यः तेषां माहात्म्यं वदन्ति सर्वथा ते राजानः तमभिनन्दन्ति, तेन सह संभाषणं कुर्वन्ति। तं सहायकरूपेण सत्कुर्वन्ति। तं परिपोषयन्ति। तेन सह सुखं जीवन्ति। तस्मै सर्वं ददति। तं सौहार्देन पश्यन्ति। तस्य वचनं शृण्वन्ति। तस्मिन् सर्वं धनादिकं वितरन्ति। तं बहुमन्यन्ते। किमु वक्तव्यमेतेषां निष्करुणं चाणक्यस्यार्थशास्त्रं प्रमाणम्। आभिचारक्रियातत्पराः पुरोहिताः गुरवः, परवञ्चनातत्पराः मन्त्रिण उपदेष्टारः। अन्यराजभिः पूर्वमुपभुज्य पश्चात् त्यक्तायां लक्ष्म्याम् अभिनिवेशः। मारणात्मकेषु शास्त्रेषु तात्पर्यम्। सहजप्रेम्णा जीवन्तो भ्रातरः हन्तव्याः वर्तन्ते।

## Assignments

**आशयं विशदयत-**

1. किं वा तेषां साम्प्रतं, येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम् -व्याख्यात।
2. दर्शनप्रदानमपि अनुग्रहं गणयन्ति । दृष्टिपातमपि उपकारपक्षे स्थापयन्ति। सम्भाषणमपि संविभागमध्ये कुर्वन्ति। आज्ञामपि वरप्रदानं मन्यन्ते। स्पर्शमपि पावनमाकलयन्ति। मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्,,नाभिवादयन्ति अभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

**उत्तरयत**

1. स्वार्थनिष्पादने तत्पराः धूर्ताः राज्ञः कथं वञ्चयन्ति?
2. कीदृशाः राजानः सर्वजनोपहास्यतां प्राप्नुवन्ति?
3. स्तुतिपाठकैः वञ्चिताः राजानः आत्मानं कथं मन्यन्ते?

4. धूर्तानामुपदेशवाक्ये पतितानां राज्ञामवस्था कीदृशी भवति?
5. विवेकरहितानां राज्ञां स्वाभावान् वर्णयत।
6. शुकनासस्यकृतं लक्ष्मीविगर्हणं विशदयत।

## Suggested Readings

1. Kadambari of Banabhatta. translated by Mandoor Sukumaran, DC Books Kottayam 1999.
2. The Kadambari of Banabhatta. With the commentaries of Banuchandra and Siddhachandra, Ed by Kashinath Pandurang parab, Nirnaya sagar press, Bombay 1916.

## References

1. Kadambari of Banabhatta with , Dr Jayasankarlal Tripady' commentary, Chowkhamba Krishnadas academy, Varanasi 2013
2. Kadambari - Sukanasopadesha of Banabhatta, with Rampal Sastri's Commentary Chaukhamba Publishers Varanasi 2018
3. Ramnarayanlal arunkumar, Kadambari - Sukanasopadesha of Banabhatta, 2 Katra road, Allahabad 2002

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that

1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# भोजस्य रामायणचम्पू बालकाण्डे ताटकावधान्तो भागः। (1- 52 श्लोकाः)

## BLOCK - 3

SGOU

# UNIT 1

# आदितः रावणवृत्तान्तपर्यन्ता कथा

## Learning Outcomes

- चम्पूकाव्यानां स्वरूपं ज्ञातुं शक्यते।
- नूतनपदावलीपरिचयः जायते, पद-पदार्थबन्धं स्थापयति।
- चम्पूरामायणे बालकाण्डे आदितः रावणवृत्तान्तपर्यन्ता कथासारस्यावगगनम्।

## Background

चम्पूरामायणं हि चम्पूग्रन्थेषु सर्वोत्कृष्टकाव्यम्। अस्य कर्ता अस्ति भोजराजः। सः मालवदेशस्य महाराजःआसीत्? एकादशशतकं तस्य प्रशासनकालमिति ऐतिहासिकाः अभिप्रयन्ति। धारानगरीशः परमारवंशीयः सिन्धुराजपुत्रोऽपि भोजशब्देन व्यपदिश्यते। भारतीया परम्परा तु धारानगरीशभोजमेव ग्रन्थस्यास्य प्रणेतृत्वेन गृह्णाति। अपरश्च, भोजप्रबन्धादावपि स एव विद्वन्मूर्धन्यत्वेन गृहीतोऽस्ति। केनापि लिपिकारेण भोज हि वैदर्भं मत्वा तथाविधं पुष्पिकावाक्यं पश्चात्संयोजितं स्यात्। ग्रन्थगौरवदृष्ट्या त्वयं ग्रन्थो धारानरेशस्यैव भवितुमर्हति। भोजेन ८४ कृतयः विरचिता इति व्याख्याकाराः वदन्ति। भोजस्य प्रमुखाः कृतयः- श्रृङ्गारप्रकाशः (अलङ्कारशास्त्रग्रन्थः), सरस्वतीकण्ठाङरणम् (व्याकरणशास्त्रग्रन्थः), चम्पूरामायणम् (काव्यम्), राजमार्तण्डः (पातञ्जलयोगसूत्रभाष्यम्), राजमृगाङ्करणम् (रसायनशास्त्रग्रन्थः), नाममालिका (कोशः),

शालिहोत्रम् (अश्वशास्त्रग्रन्थः), श्रृङ्गारमञ्जरीकथा (गद्यकाव्यम्), तत्त्वप्रकाशः (शैवसिद्धान्तग्रन्थ), व्यवहारमञ्जरी (धर्मशास्त्रग्रन्थः)।

ग्रन्थेऽस्मिन् वैदर्भीरीतिः सर्वातिशयित्वेन विलसति। वर्णनेऽत्र प्रयुक्ता कल्पना नितान्तोच्चकोटिका। अत्र हि अनुप्रासस्योपमायाश्च वैचित्र्यं कुमारदासं स्मारयति। अस्योत्प्रेक्षाऽपि निभालनीया।

अस्मिन् खण्डे अस्माकं अध्येतृविषयकं रामायणाधारितं चम्पूकाव्यम्। यथा रामायणे तथा अत्रापि काण्डशः विभागः अस्ति। बाल-अयोध्या-आरण्य-किष्किन्धा-सुन्दरकाण्डानि भोजप्रणीतानि उपलभ्यन्ते। अयम् अपूर्णः ग्रन्थः। षष्ठं युद्धकाण्डं लक्ष्मणसूरिविरचितम् उपलभ्यते। जनप्रियं काव्यं भवति चम्पूरामायणं, तस्मिन् काव्ये विशिष्य बालकाण्डं सुन्दरकाण्डं च प्रसिद्धम्। बालकाण्डे ११७ श्लोकाः गद्यभागश्च अन्तर्भवन्ति। अद्य बालकाण्डस्य आदितः रावणवृत्तान्तपर्यन्ता कथा अध्ययनं करिष्यामहे।

## Keywords

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः, वाल्मीकिगीतरघुपुंगवकीर्तिलेशैः, अम्भोजभूः, लवकुशौ, अयोध्या, दशरथः, सङ्क्रन्दनेन, शान्ताकुटुम्बिनम्, अश्वमेधाध्वरम्, कालमेघं, दंष्ट्रारोचिर्विशदभुवने रंहसा, दम्भोलिकेलिः, रजनीचरराजधानी, सालाभिरामभुजनिर्जितयक्षराजः, सङ्कुचितभानुः, मृगाङ्कः, पवमानाः, हुतवाहः।

## Discussion

मङ्गलश्लोकमवतरति कल्याणानां निधानमिति। यत्किमपि मङ्गलकार्याचरणसमये भारतीयाः मङ्गलाचरणं कुर्वन्ति। किमर्थम्? निर्विघ्नपरिसमाप्त्यर्थम्। पुस्तकरचनावसरे बहुविधाः विघ्नाः कदाचित् सम्भवेयुः। तादृशानां विघ्नानां निवारणाय पूर्वसूरयः मङ्गलमाचरन्ति स्म। इष्टदेवतानमस्कारपूर्वकं मङ्गलाचरणेन निर्विघ्नपरिसमाप्तिः जायते इति विश्वासः। अत्र भोजमहाभागेन स्वग्रन्थस्य चम्पूरामायणस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलश्लोकद्वयं आचरति। मङ्गलाचरणेन न केवलं ग्रन्थकर्तुः किन्तु पठितॄणामपि मङ्गलं भूयात् इति विश्वासः। इदानीं ग्रन्थस्य आरम्भं कुर्मः।

### प्रथमः मङ्गलश्लोकः

**लक्ष्मीं तनोतु नितरामितरानपेक्षमङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।**
**हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं विघ्नाद्रिभेदशतधारधुरन्धरं नः॥१॥**

**अन्वयः** - निगमशाखिशिखाप्रवालं अम्बुरुहडम्बरचौर्यनिघ्नं विघ्नाद्रिभेदशतधारधुरन्धरं अङ्घ्रिद्वयं नः लक्ष्मीं नितराम् इतरानपेक्षं तनोतु।

श्रीगणेशनमस्कारं

**अन्वयार्थः** - निगमशाखिशिखाप्रवालं - वेदान्तवेद्यं, वेदाः एव वृक्षाः, तेषां शिखा उपनिषदः, तासां नवपल्लवम्, (वेदोपनिषद्रवृक्ष- शाखपल्लवं) अम्बुरुहडम्बरचौर्यनिघ्नं - पद्मसौन्दर्यदर्पापहारकम्, विघ्नाद्रिभेदशतधार-धुरन्धरं - विघ्नाः एवाद्रयः पर्वतास्तेषां भेदे विदारणे एतधारमिन्द्रायुधं वज्रमिव धुरन्धरं सर्वथा समर्थमित्यर्थः सकल विघ्नविनाशकम्। हैरम्बम् - श्रीगणेशस्य इदम्,अङ्घ्रिद्वयं - चरणद्वयम्, नः - अस्माकम्, लक्ष्मीम्- सकलाभीप्सितार्थसम्पत्तिम्ः, नितराम् - अतिशयेन, इतरानपेक्षम् - सहायकान्तरनिरपेक्षं, तनोतु - विस्तारयतु, संपादयत्वित्यर्थः।

**सारः** - इतरैः अनपेक्षं वेदोपनिषद्रूपपल्लवं पद्मसौन्दर्यातिशयकं पर्वतच्छेदकं वज्रायुधं गणेशस्य पादयुगलं अस्माकं अतिशयेन अभिलषितार्थसम्पत्तिं सम्पादयतु।

शब्दालङ्कारः - अनुप्रासः।

वृत्तम्- वसन्ततिलकम्।

### द्वितीयः मङ्गलश्लोकः

**उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।**
**तेषां प्रकाशनदशा च महीसुरैश्चेत्तानन्तरेण निपतेत् क्व नु मत्प्रणामः॥२॥**

विप्रनमस्कारं

**अन्वयः** - जगति उच्चैः गतिः धर्मतः सिद्ध्यति चेत्,तस्य प्रमा च कृतकेतरैः वचनैः चेत्, तेषां प्रकाशनदशा च महीसुरैः चेत्, तान् अन्तरेण मत्प्रणामः क्व नु निपतेत्?

**अन्वयार्थः** - जगति - लोके, उच्चैः गतिः - स्वर्गाद्युत्तमफलप्राप्तिः, धर्मतः - धर्मात्, सिद्ध्यति - सम्पद्यते, चेत् - यदि, तस्य प्रमा च - तस्य धर्मस्य यथार्थज्ञानं च, कृतकेतरैः - अकृत्रिमैः, वचनैः - कथनैः, (सिद्ध्यति) चेत् - यदि, तेषां प्रकाशनदशा च - तेषां वेदवाक्यानां स्फुटीकरणं च (पाठतोऽर्थश्चेति ), महीसुरैः - ब्राह्मणैः (द्विजैः), सिद्ध्यति चेद्, (तर्हि), तानन्तरेण - तान् ब्रह्मणान् विना, मत्प्रणामः - मत्कृतनमस्कारः, क्वनु - कुत्र वा, निपतेत् - गच्छेत् ?

**सारः** - लोके स्वर्गाद्युत्तमफलप्राप्तिः वेदशास्त्रोक्तस्य यज्ञादिधर्मस्य आचरणेन सिध्यति, धर्मस्य तत्त्वज्ञानं वेदमूलकम्, वेदानां ज्ञानं ब्राह्मणेभ्यः प्राप्यते, अतः ब्राह्मणान् विना अन्येषां नमस्कारः कथं क्रियेत?

वृत्तम् - वसन्ततिलका।

**पद्यम्**

**गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हृद्या हि वाद्यकलया कलितेव गीतिः।**
**तस्माद्दधातु कविमार्गजुषां सुखाय चम्पूप्रबन्धरचनां रसना मदीया ॥३ ॥**

**अन्वयः -** गद्यानुबन्धरसमिश्रितपद्यसूक्तिः वाद्यकलया कलिता गीतिः इव हृद्या हि। तस्मात् कविमार्गजुषां सुखाय मदीया रसना चम्पूप्रबन्ध- रचनां दधातु।

चम्पूकाव्यस्वरूपम्

**अन्वयार्थः -** गद्यानुबन्धरसमिश्रितपद्यसूक्तिः - गद्यं छन्दोविरहितः पदसङ्घातस्तस्यानुबन्धः सन्निवेशस्तेन, यो रस - आनन्दस्तेन, मिश्रिता - मिलिता, या पद्यसूक्तिः - पद्यमयीरचना, गद्यरसेन निश्चिता पद्यरचना वाद्यकलया - वीणादिवादनशिल्पेन, कलिता - मिश्रिता अनुगतेत्यर्थः, गीतिः- गानमिव, हृद्या - हृदयानन्दजननी (भवति) तस्मात् गद्यपद्य-मिश्रित प्रबन्धस्य मनोज्ञत्वाद्धेतोः, कविमार्गजुषाम् - कवीनां मार्गं जुषन्ते तेषां सुखाय - आनन्दाय, मदीया - ममेयं, रसना- जिह्वा चम्पूप्रबन्धरचनाम् दधातु - प्रवर्तयतु।

**सारः -** गद्यपद्ययोः मिश्रणरूपं चम्पूकाव्यं वाद्यमिश्रितं गानमिव सर्वानन्दकरं भवति। अतः काव्यरसास्वादिनां मनोरञ्जनाय मम जिह्वा चम्पूकाव्यस्य निर्माणं करोतु।

अलङ्कारः - उपमा।

वृत्तम् - वसन्ततिलकम्।

**पद्यम्**

**वाल्मीकिगीतरघुपुंगवकीर्तिलेशैस्तृप्तिं करोमि कथमप्यधुना बुधानाम्।**
**गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः किंतर्पणं न विदधाति नरः पितॄणाम् ॥४ ॥**

चम्पूरामायणप्रबन्धरचना

**अन्वयः -** वाल्मीकिगीतरघुपुंगवकीर्तिलेशैः अधुना कथमपि बुधानाम् तृप्तिं करोमि । भुवि भगीरथयत्नलब्धैः गङ्गाजलैः नरः पितॄणां तर्पणं न विदधाति किम्?

**अन्वयार्थः -** वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैः - वाल्मीकिना उपवर्णितानां रघूणां श्रेष्ठस्य यशसः लेशैः, वाल्मीकिना रचितानां श्रेष्ठानां कीर्तिकणिकाभिः अधुना - इदानीं, कथमपि- महता प्रयत्नेन, बुधानाम् - पण्डितानाम्, तृप्तिम् - सन्तुष्टिम् करोमि - आनन्दं समेधयामि। भुवि- भूलोके, भगीरथस्य यत्नेन लब्धैः, गङ्गाजलैः - भागीरथीसलिलैः, नरः - कश्चिन्मनुष्यः, पितृणाम् - स्वपूर्वजानाम्, तर्पणम् - निवापाञ्जलिदानेन, न विदधाति - निर्वर्तयति, किम् ?

**सारः -** यथा भगीरथप्रयत्नेन भूलोकं प्राप्तं गङ्गाजलं सर्वैः नरैः स्वपितृणां तपणार्थमुपयुज्यते तथा वाल्मीकिमहर्षेः प्रयत्नेन भुवि प्रस्थितस्य श्रीरामस्य चरितानुवर्णनेन सर्वे कवयः सहृदयानां तुष्टिं सम्पादयन्ति। (अतः अहमपि रामस्य कथां आश्रित्य रचयामि ।)।

अलङ्कारः - दृष्टान्तः।

वृत्तम् - वसन्ततिलका।

**वाचं निशम्य भगवान् स तु नारदस्य प्राचेतसः प्रवचसां प्रथमः कवीनाम्।**
**माध्यन्दिनाय नियमाय महर्षिसेव्यां पुण्यामवाप तमसां निहन्त्रीम् ॥५॥**

वाल्मीकिः तमसानदीं प्राप

**अन्वयः -** प्रवचसां कवीनां प्रथमः सः भगवान् प्राचेतसः तु नारदस्य वाचं निशम्य माध्यन्दिनाय नियमाय महर्षिसेव्यां तमसां निहन्त्रीं पुण्यां तमसाम् अवाप।

**अन्वयार्थः -** प्रवचसाम् - निपुणकविजनानां (व्यासादिकानां), कवीनां - काव्यकर्मसम्पादकानाम्, प्रथमः - आद्यः , सः भगवान् - पूज्यः, प्राचेतसः - वाल्मीकिः, तु नारदस्य - त्रिलोकसञ्चारिणः देवर्षिप्रवरस्य - वाचं - वाणीं,

निशम्य - श्रुत्वा, माध्यन्दिनाय नियमाय - माध्याह्निकक्रियां कर्तुम्, महर्षि-सेव्यां महर्षिभिः - ऋषिप्रवरैः, सेव्याम् - स्नानसन्ध्यावन्दनाद्यानुष्ठानार्थमा-श्रयितुं योग्याम्, तमसां - अज्ञानानाम्, निहन्तीं - विनाशकारिणीम्, पुण्यां-पावनीम्, तमसां - तमसानदीं, अवाप - आजगाम।

**सारः** - आदिकविः पूज्यः वाल्मीकिः नारदमुखात् रामकथां श्रुत्वा माध्या-ह्निकनक्रियां कर्तुम् ऋषिप्रवराश्रितां पावनीम् अज्ञानविनाशिनीं तमसानदीं गतः।

अत्र वृत्यनुप्रासनामकः शब्दालङ्कारः , वसन्ततिलकावृत्तञ्च।

विग्रहः - प्रवचसाम् - प्रगल्भानि वचांसि येषान्ते, तेषाम्।

महर्षिसेव्यां - महर्षिभिः सेव्या, ताम्।

**गद्यम्**

**तत्र कञ्चन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं निध्यायतो बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निस्ससार सरस्वती।**

व्याधं प्रति वाल्मीकेः शापः

पुमांसम्, पञ्चशरविद्धं - मन्मन्थाहतं, व्याधेन - निषादेन, अनुविद्धं - पुनः प्रहृतम्, निध्यायतः - पश्यतः, बद्धानुकम्पस्य - उत्पन्नकरुणस्य, भगवतो वाल्मीकेः - महर्षेः प्राचेतसः, वदनारविन्दात् - मुखकमलात्, छन्दोमयी - अनुष्टुप् छन्दसि निबद्धा, काचित् - अपूर्वा, सरस्वती - वाक्, एवम् - वक्ष्यमाणरीत्या, निस्ससार - अनायासेन निर्जगाम।

**सारः** - तमसातीरे परस्परं आनन्देन रममाणयोः द्वयोः क्रौञ्चयोः मध्ये एकं पक्षिणं व्याधेन प्रहृतं दृष्ट्वा उत्पन्नकरुणस्य वाल्मीकिमहर्षेः मुखात् छन्दोबद्धा अपूर्वा वाणी निर्गता।

विग्रहः - क्रौञ्चमिथुनात् - क्रौञ्चयोः मिथुनम्, तस्मात्।

पञ्चशरविद्धं - पञ्चशराः (अरविन्दमशोकं चूतं नवमालिका नीलोत्पलम् एते पञ्चशराः) यस्य सः, पञ्चशरेण विद्धम्।

बद्धानुकम्पस्य - बद्धा अनुकम्पा यस्य सः, तस्य।

वदनारविन्दात्- वदनम् अरविन्दम् इव तस्मात्।

**पद्यम्**

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।६।।**

आदिमः श्लोकः

**अन्वयः -** हे निषाद! यत् काममोहितं क्रौञ्चमिथुनात् एकम् अवधीः, त्वं शाश्वतीः समाः प्रतिष्ठां मा अगमः।

**अन्वयार्थः -** हे निषाद- हे व्याध!, यत् - यस्मात् कारणात्, काममोहितं - स्मरविवशं, क्रौञ्चमिथुनात् - चक्रवाकद्वन्द्वात्, एकम् - अनन्यं सहचरम्, अवधीः - हतवानसि। तस्मात् त्वं - भवान् , शाश्वतीः समाः - अनन्तसंवत्सरान् , प्रतिष्ठां- स्थितिम्, मा अगमः - नहि प्राप्नुहि।

**सारः -** हे व्याध! निर्दयः त्वं प्रियया सह क्रीडारतं क्रौञ्चपक्षिणं हतवान्। अतः अनन्तसंवत्सरकालं प्रतिष्ठां मा प्राप्नुहि। बहुधा व्याख्यातः श्लोकः।
अनुष्टुप् वृत्तम्।
विग्रहः - काममोहितम् - कामेन मोहितम्।

**गद्यम्**

**तदनु समयोचितकृत्यं निर्वर्त्य स्वाश्रमं प्रति गतवति भगवति वाल्मीकौ**

वाल्मीकिः स्वाश्रमं गतवान्

**व्याख्या -** तदनु - ततः 'मा निषाद ' इत्यादि छन्दोबद्धवाणीनिःसरणानन्तरं, समयोचितकृत्यं - माध्याह्निकस्नान- सन्ध्या- वन्दनादिक्रियां, निर्वर्त्य - समाप्य, स्वाश्रमं प्रति - 'निजपर्णशालाम् , गतवति- याते सति, भगवति वाल्मीकौ - पूज्ये वाल्मीकिमहर्षौ।

**सारः -** ततः मध्याह्नकालोचितं कार्यं कृत्वा पूज्ये वाल्मीकिमहर्षौ स्वस्य आश्रमं प्राप ।

**पद्यम्**

**वाणीविलासमपरत्र कृतोपलम्भम् अम्भोजभूरसहमान इवाविरासीत् ।**
**आभाति यत्कृतिरनेकविधप्रपञ्चव्याजेन्द्रजालविधिसाधकपिञ्छि-**
**केव ॥ ७ ॥**

**अन्वयः -** अपरत्र कृतोपलम्भं वाणीविलासम् असहमानः इव अम्भोजभूः आविरासीत्, यत्कृतिः अनेकविधप्रपञ्चव्याजेन्द्रजालविधि-साधकपिञ्छिका इव आभाति ।

**अन्वयार्थः -** अपरत्र - अन्यस्मिन्, कृतोपलम्भं - विहितानुषङ्गं (उपलभ्यमानमित्यर्थः), वाणीविलासम् - सरस्वत्याः लीलाम्, असहमानः इव - अमृष्यमाणः इव, अम्भोजभूः - चतुर्मुखब्रह्मा, आविरासीत् - प्रादुर्भूतः, यत्कृतिः - यस्य ब्रह्मणः कृतिः क्रियाशक्तिः, अनेकविधप्रपञ्च-व्याजेन्द्रजालविधिसाधकपिञ्छिका - बहुप्रकारकस्य मिथ्यारूपस्य जगतः सृष्टिरूपस्य इन्द्रजालस्य साधकपिञ्छिका, इव - एव, आभाति - प्रकाशते ।

वाल्मीकेः पुरतः ब्रह्मा आविर्भूतवान्

**सारः -** सृष्टिकर्ता ब्रह्मा स्वस्य क्रियाशक्त्या बहुप्रकारकस्य प्रपञ्चस्य सृष्टिरूपम् इन्द्रजालं प्रदर्शयति । तादृशः सः पत्न्याः सरस्वत्याः विलासम् अन्यस्मिन् (वाल्मीकौ) उपलब्धम् असूयया सोढुम् अशक्तः इव (वाल्मीकेः पुरतः) प्रादुर्भूतः ।

विग्रहः - वाण्या विलासः, तम् ।

कृतोपलम्भम् - कृतः उपलम्भः येन सः, तम् ।

अम्भोजभूः - अम्भसि जायते इत्यम्भोजम्, तत्र भवः ।

असहमानः - न सहमानः।

यत्कृतिः - यस्य कृतिः।

पूर्वार्द्धे उत्प्रेक्षा उत्तरार्द्धे उपमालङ्कारश्च। वसन्ततिलका वृत्तम्।

**गद्यम्**

रामायणं रचयितुं ब्रह्मणः आज्ञा

**ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यलोकेऽपि स्ववृत्तं प्रकाशयितुं किल भवन्तमेवो'पतिष्ठमानयानया भारत्या रामचरितं यथा श्रुतं व्याक्रियतामिति व्याहृत्यान्तरधात्।**

**व्याख्या** - ततः - अनन्तरं, परमहर्षेण - अत्यन्तं आनन्देन, महर्षिणा - वाल्मीकिना, विधिवत्- यथाशास्त्रम्, अभ्यर्चितः - अर्घ्यपाद्यासनादिभिः पूजितः, परमेष्ठी - ब्रह्मा, मध्यलोकेऽपि - भूलोके अपि, स्ववृत्तं - स्वमहिमानं, प्रकाशयितुं - प्रदर्शयितुं, किल - खलु, भवन्तमेक - त्वामेव, उपतिष्ठमानया - अनुवर्तमानया, अनया - भवतः मुखात् निर्गतया, भारत्या - वाण्या, रामचरितं - श्रीरामस्य चरित्रम्, यथाश्रुतं - नारदमुखेन श्रुतं क्रममेव अनुसृत्य, व्याक्रियताम् - व्याख्यायताम्, इति व्याहृत्य - एवम् उक्त्वा, अन्तरधात् - अदृश्योऽभूत्।

**सारः** - तदनन्तरं सृष्टिकर्तुः ब्रह्मणः आगमनेन अत्यन्तं सन्तुष्टः वाल्मीकिः यथाविधि तम् अर्घ्यादिभिः अर्चयामास। आत्मनः छन्दोबद्धं रूपं भूलोके प्रकाशयितुमेव इयं वाणी भवतः मुखात् निर्गता।तादृशैः एव छन्दोबद्धैः वचनैः नारदात् श्रुतं रामचरितं वर्णय इति वाल्मीकिम् आदिश्य ब्रह्मा अदृश्योऽभूत्।

विग्रहः - परमहर्षेण - परमः हर्षः यस्य सः, तेन।

महर्षिणा - महान् ऋषिः, तेन।

यथाश्रुतं - श्रुतंम् अनतिक्रम्य।

**पद्यम्**

**अथ सरसिजयोनेराज्ञया रामवृत्तं करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या।**
**शुभमतनुत काव्यं स्वादुरामायणाख्यं मधुमयफणितीनां मार्गदर्शी -**
**महर्षिः॥८॥**

**अन्वयः** - अथ सरसिजयोनेः आज्ञया मधुमयफणीतीनां मार्गदर्शी महर्षिः प्रतीच्या दृष्ट्या करबदरसमानं रामवृत्तं प्रेक्ष्य शुभं स्वादु रामायणाख्यं काव्यमतनुत।

वाल्मीकिः रामायणं अरचयत्

**अन्वयार्थः** - अथ - ब्रह्मणः निरोधनानन्तरं, सरसिजयोनेः - कमलसम्भवस्य ब्रह्मणः, आज्ञया - आदेशेन, मधुमयफणीतानां - अमृततुल्यानां रसयुक्तानां वचनानां, मार्गदर्शी - मार्गसूचकः, महर्षिः - वाल्मीकिः, प्रतीच्या दृष्ट्या - योगदृष्ट्या, करबदरसमानं - करे स्थितेन बदरफलेन तुल्यं, निःशेषमित्यर्थः, रामवृत्तं - श्रीरामस्य चरितं, प्रेक्ष्य - दृष्ट्वा, शुभं - कल्याणकरं, स्वादु - मधुरम्, रामायणाख्यं - रामायणं इति विख्यातं, काव्यम् - प्रबन्धं, अतनुत - रचितवान्।

**सारः** - ब्रह्मणः आज्ञानुगुणं योगदृष्टिं प्राप्य वाल्मीकिः सर्वमपि हस्तस्थितं बदरफलमिव द्रष्टुं शक्तवान्। ततः सः रामायणनामकं कल्याप्रदं मधुरं काव्यं विरच्य स्वस्य मधुरैः वचनैः सर्वेषां कवीनां मार्गदर्शनं कृतवान्।

विग्रहः - सरसिजयोनेः - सरसिजं योनिः यस्य सः, तस्य।

करबदरसमानम् - करबदरेण समानम्।

रामायणाख्यम् - रामायणम् इति आख्या यस्य तत्।

मधुमयफणितीनाम् - मधुमय्यः फणितयः, तासाम्।

मार्गदर्शी - मार्गं दर्शयति इति।

वृत्तम् - मालिनी

**गद्यम्**

**एनं प्रबन्धं प्रयोक्तुं कः समर्थः इति चिन्तामुपगतवती सती भगवति वाल्मीकौ।**

**व्याख्या -** एनं प्रबन्धं - रामायणकाव्यं, प्रयोक्तुं - पठितुं, कः समर्थः - कः अधिकारी, इति - एवं रूपतया, चिन्ताम् - विचारणं, उपगतवती सती - प्राप्तवती सती, भगवति वाल्मीकौ - पूज्ये प्राचेतसे।

**सारः** - रामायणं विरच्य वाल्मीकिः तत् काव्यं सम्यगधीत्य अन्येभ्यः प्रसारयितुं कः शक्नुयात् इति चिन्तयति।

**पद्यम्**

**उपागतौ मिलितपरस्परोपमौ बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ।**
**विचक्षणौ विविधनरेन्द्रलक्षणौ कुशीलवौ कुशलवनामधारिणौ ॥९॥**

**अन्वयः** - मिलितपरस्परोपमौ बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ विचक्षणौ विविधनरेन्द्रलक्षणौ कुशलवनामधारिणौ कुशीलवौ उपागतौ।

कुशलवयोः वर्णना

**अन्वयार्थः** - मिलितपरस्परोपमौ - परस्परतुल्यरूपौ, बहुश्रुतौ - वेदवेदाङ्गनिष्णातौ, श्रुतिमधुरस्वरान्वितौ - श्रवणप्रियेण श्रुत्या सम्पन्नौ, विचक्षणौ - विद्वांसौ, विविधनरेन्द्रलक्षणौ - बहुप्रकारैः राजचिह्नैः युक्तौ, कुशलवनामधारिणौ - कुशलवनामानौ, कुशीलवौ- गायकौ, उपागतौ - समीपं प्राप्तौ।

**सारः** - यदा वाल्मीकिः चिन्तयन् आसीत्, तदैव अन्योन्यसदृशौ, सकलविद्याविशारदौ, श्राव्यकण्ठस्वरसम्पन्नौ, विद्वांसौ बहुप्रकारकराजचिह्नयुक्तौ कुश- लवनामकौ गायकौ तत्समीपं प्राप्तौ।

विग्रहः - मिलितपरस्परोपमौ - परस्परयोः उपमा, मिलिता परस्परोपमा ययोः तौ।

बहुश्रुतौ - बहु श्रुतं याभ्यां तौ।

श्रुतिमधुरस्वरान्वितौ - श्रुतेः मधुरः, श्रुतिमधुरः, श्रुतिमधुरेण स्वरेण अन्वितौ।

विविधनरेन्द्रलक्षणौ - नदेन्द्रस्य लक्षणम्, विविधानि नदेन्द्रलक्षणानि ययोः तौ।

वृत्तम् - रुचिरा।

**गद्यम्**

**एतौ मुनिः परिगृह्य स्वां कृतिमपाठयत्।**

**व्याख्या** - एतौ - कुशलवौ, मुनिः - वाल्मीकिः, परिगृह्य - शिष्यत्वेन अङ्गीकृत्य, स्वां - स्वकीयां, कृतिं - श्रीरामायणाख्यं काव्यम्, अपाठयत् - अध्यापयत्।

**सारः** - वाल्मीकिः मुनिः कुशलवौ शिष्यत्वेन स्वीकृत्य स्वकीयं रामायणकाव्यं अध्यापयत्।

**गद्यम्**

**तौ पुनरितस्ततौ गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवनमानीय भ्रातृभिः परिवृतो निजचरितं गातुमन्वयुङ्क्त।**

रामः स्वचरितं गातुं अपृच्छत्

**व्याख्या** - तौ - कुशलवौ, पुनः - भूयः, इतस्ततः - तत्र तत्र प्रदेशेषु, गायमानौ - गानरूपेण रामायणं पठन्तौ, दृष्ट्वा - वीक्ष्य, रामः प्रहृष्टमनाः - प्रसन्नहृदयः रामः, स्वभवनम् - निजमन्दिरं, आनीय - भृत्यैः प्रापय्य, भ्रातृभिः परिवृतो - लक्ष्मणादिभिः सहितः, निजचरितं - स्वचरित्रं, गातुमन्वयुङ्क्त - गातुम् अपृच्छत्।

**सारः** - तत्र तत्र प्रदेशेषु गानरूपेण गायन्तौ कुशलवौ वीक्ष्य, तयोः गानमाधुर्येण सन्तुष्टान्तःकरणः रामः निजमन्दिरं आनीय, भरतलक्ष्मणशत्रुघ्नैः सहोदरैः सहितः सन् स्वचरित्रं गातुम् अपृच्छत्।

**पद्यम्**

**छन्दोमयीनां निलयस्य वाचामन्ते वसन्तौ मुनिपुङ्गवस्य।**
**एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम्॥१०॥**

**अन्वयः -** छन्दोमयीनां वाचां निलयस्य मुनिपुङ्गवस्य अन्ते वसन्तौ एतौ कुमारौ यथाक्रमं रघुवीरवृत्तं गातुम् उपाक्रमेताम्।

**अन्वयार्थः** - छन्दोमयीनां - अनुष्टुबादिलौकिकेषु छन्दस्सु प्रायो निबद्धानाम्, वाचां - वाणीनाम्, निलयस्य - पदे पदे स्वादुकाव्य-निबन्धननिकेतनस्य, मुनिपुङ्गवस्य - मुनिश्रेष्ठस्य, अन्ते वसन्तौ - शिष्यौ, एतौ - इमौ मैथिलेयौ, कुमारौ - कुशलवाख्यौ बालकौ,यथाक्रमं - रामायणमहाकाव्ये वर्णितक्रमानुसारेण, रघुवीरवृत्तं - श्रीरामस्य वृत्तान्तं, गातुम् - गानं कर्तुं उपाक्रमेताम् - उपक्रान्तवन्तौ।

लव-कुशाभ्यां रामायणगानं आरभ्यते।

**सारः -** आदिकवेः वाल्मीकेः शिष्यौ लवकुशौ उपदिष्टेनैव क्रमेण रामायणं गातुम् आरब्धवन्तौ।

विग्रहः - मुनीनां पुङ्गवः, तस्य।

रघुवीरवृत्तं - रघुवीरस्य वृत्तम्।

यथाक्रमम् - क्रमम् अनतिक्रम्य।

वृत्तम् - उपजातिः।

**पद्यम्**

आयोध्यायाः वर्णनम्

**अस्ति प्रशस्ता जनलोचनानामानन्दसंदायिषु कोसलेषु।**
**आज्ञासमुत्सारितदानवानां राज्ञामयोध्येति पुरी रघूणाम्।।११।।**

**अन्वयः -** जनलोचनानाम् आनन्दसन्दायिषु कोसलेषु आज्ञा-समुत्सारितदानवानां रघूणां राज्ञां आयोध्या इति प्रशस्ता पुरी अस्ति।

**अन्वयार्थः** - जनलोचनानाम् - मानवनेत्राणाम्, आनन्दसन्दायिषु - स्वसमृद्ध्या सकलजननयनानन्दकरेषु, कोसलेषु - उत्तरकोसलेषु, आज्ञा - समुत्सारितदानवानां - आदेशेन दूरात् निरस्ताः असुराः येषां, तेषां, आज्ञया तिरस्कृता सुराणां रघूणां - रघुवंशोद्भवानां राज्ञां,राज्ञां - नृपाणां, आयोध्या - योद्धुमशक्त्या अन्वर्थनिधाना, इति प्रशस्ता - प्रख्याता, पुरी - नगरी, अस्ति - वर्तते।

**सारः** - सकलसम्पत्समृद्धे उत्तरकोसलजनपदे प्रचण्डशासनानां प्रजारञ्जकाणां रघुवंशस्य नृपाणाम् अयोध्या इत्यन्वर्थाभिधाना प्रसिद्धा नगरी वर्तते।

विग्रहः - जनलोचनानाम् - जनानां लोचनानि तेषाम्।

आनन्दसन्दायिषु - आनन्दं सन्ददति इति आनन्दसन्दायी तेषु।

अयोध्या - न योध्या।

वृत्तम् - इन्द्रवज्रा, अलङ्कारः - उदात्तम्।

**पद्यम्**

**तामावसद्दशरथः सुरवन्दितेन संक्रन्दनेन विहितासनसंविभागः।**
**वृन्दारकारिविजये सुरलोकलब्धमन्दारमाल्यमधुवासितवा**
**सभूमिः।।१२।।**

दशरथस्य वर्णनम्

**अन्वयः** - सुरवन्दितेन संक्रन्दनेन विहितासनसंविभागः वृन्दारकारि-विजये सुरलोकलब्धमन्दारमाल्यमधुवासितवासभूमिः दशरथः ताम् आवसत्।

**अन्वयार्थः** - सुरवन्दितेन - देवाधिपेन, संक्रन्दनेन - इन्द्रेण, विहितासनसंविभागः - दत्तार्धासनः, वृन्दारकारिविजये - वृन्दारकाणां सुराणां योऽरयः शत्रवो दानवाः, तेषां विजये, दानवेषु विजितेषु

सत्स्वित्यर्थः। सुरलोक-लब्ध-मन्दार-माल्य-मधु-वासित- वासभूमिः - स्वर्लोकाल्लब्धस्य मन्दारमालायाः सुगन्धनिर्भरभूमिः, दशरथः - रघुवंशनृपः, ताम् - अयोध्यानगरीम्, आवसत् - अधिवसति स्म।

**सारः -** दशरथो नाम नृपश्रेष्ठः अयोध्यानगरीम् अधिवसति स्म। सः दशरथः देवराजस्य इन्द्रस्यापि माननीयः, इन्द्रेण स्वस्य सिंहासने अर्धभागः तस्मै प्रदत्तः आसीत्। किञ्च दानवानां विजयोत्तरं स्वर्गलोकात् लब्धानां पारिजातमालानां सुगन्धेन तस्य निवासः सुरभिलो बभूव।

विग्रहः - सुरवन्दितेन - सुरैः वन्दितः, तेन।

विहितासनसंविभागः - आसनस्य संविभागः, विहितः आसनसंविभागः यस्य सः।

वृन्दारकारिविजये - वृन्दारकाणाम् अरयः वृन्दारकारयः तेषां, वृन्दारकारिणां विजयः तस्मिन्।

वृत्तम् - वसन्ततिलका।

**गद्यम्**

**अथास्मिन्ननपत्यतया दूयमानमानसे पुत्रार्थं क्रतुमश्वमेधं विधातुं मन्त्रिभिः समं मन्त्रयमाणे दशरथे सुमन्त्रः प्रहृष्टमना महर्षेरङ्गदेश-सङ्गतावग्रहनिग्रहशौण्डस्य विभाण्डकसूनोरवश्यमृष्यश्रृंगस्य प्रसादात्प्रभवो भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास।**

पुत्रप्राप्त्यर्थं सुमन्त्रेण सूचितः उपायः

**व्याख्या -** अथ - अनन्तरं, अस्मिन् दशरथे - कोसलनृपे, अनपत्यतया - पुत्राहित्येन, दूयमानमानसे - परितप्यमानं मानसं हृदयं यस्य तस्मिन् दुःखिते, पुत्रार्थं - पुतलाभार्थं, अश्वमेधं क्रतुम् - अश्वमेधं नाम यज्ञं, विधातुं - कर्तुं, मन्त्रिभिः - स्वामात्यैः, समं - सह, मन्त्रयमाणे - विचारयति सति, दशरथे, सुमन्त्रः - दशरथस्य अमात्येषु अन्यतमः, प्रहृष्टमना - प्रसन्नहृदयः,

अस्मै दशरथाय - दशरथाय, सनत्कुमारोदीरितं - सनत्कुमारमहर्षिणा ब्रह्ममानसपुत्रेण कथितम्, पुरावृत्तं - पूर्ववृत्तान्तं, कथयामास - निवेदयामास, महर्षेः - ऋषिवर्यस्य ऋष्यशृंगस्य अङ्गदेशे - अङ्गनामदेशे, सङ्गतः - प्राप्तः, अवग्रहे - वर्षप्रतिबन्धे, निग्रहे - दूरीकरणे, शौण्डस्य - कुशलस्य, विभाण्डकसूनोः - विभाण्डकाख्य- मुनिपुत्रस्य, प्रसादात् - अनुग्रहात्, अवश्यं - निश्चितं, कुमाराणां प्रभवो - पुत्राणाम् उत्पत्तिः, भविता इति- भविष्यति इति।

**सारः -** पुत्राहित्येन दुःखितः दशरथः पुत्रप्राप्त्यर्थं अश्वमेधयागं कर्तुं स्वस्य अमात्यैः सह चर्चां करोति स्म। तदा तस्य अमात्येषु अन्यतमः सुमन्त्रः कदाचित् ब्रह्मणः मानसपुत्रेण सनत्कुमारेण कथितं पूर्ववृत्तान्तमेकं स्मृत्वा दशरथाय उक्तवान्- 'अङ्गदेशे सञ्जातस्य अवग्रहस्य निवारणाय, विभाण्डकपुत्रस्य ऋष्यशृङ्गस्य अनुग्रहेण दशरथस्य पुत्राः जनिष्यन्ति' इति।

विग्रहः - अनपत्यतया - न अपत्यं अनपत्यं, अनपत्यस्य भावः अनपत्यता, तया अनपत्यतया।

**गद्यम्**

**सोऽपि सुमन्त्रवचनाच्छान्ताधिः शान्ताकुटुम्बिनं सम्बन्धिनं मुनिमानीय वसिष्ठादिष्टमश्वमेधाध्वरं सरयूरोधसि विधाय तत्र पुत्रीयामिष्टि विधिवत्कर्तुमारभत।**

दशरथः अश्वमेधयज्ञं आचरितवान्

**व्याख्या-** सोऽपि - दशरथः अपि, सुमन्त्रवचनात् - सुमन्त्रस्य कथितात्, शान्ताधिः - शमिततमनोव्यथाः, शान्ताकुटुम्बिनं - शान्तायाः पतिं (ऋष्यशृङ्गः) सम्बन्धिनं - शान्तसम्बन्धेन जामातरम्, मुनिं - ऋष्यशृङ्गं, आनीय - आनाय्य, वसिष्ठादिष्टम् - कुलगुरुणा वसिष्ठेन उपदिष्ट- प्रकारकं,

अश्वमेधाध्वरं - अश्वमेधाख्यं यज्ञं, सरयूरोधसि - सरयूनदीतीरे, विधाय - कृत्वा, तत्र - सरयूतीरे, पुत्रीयाम् इष्टिम् - पुत्रोत्पादनहेतुं यागं, विधिवत् - यथाशास्त्रं, कर्तुम् - विधातुम्, आरभत - प्रारब्धवान्।

**सारः -** सुमन्त्रस्य वचनं श्रुत्वा समाहितः दशरथः स्वयं गत्वा शान्तापतिम् ऋष्यश‍ृङ्गम् अयोध्यां प्रति आनीय तस्य याजकत्वे सरयूतीरे अश्वमेधयज्ञं कृत्वा ततः पुत्रकामेष्टिं कर्तुम् आरब्धवान्।

विग्रहः - शन्ताधिः - शान्तः आधिः यस्य सः।

शान्ताकुटुम्बिनम् - कुटुम्बः अस्य अस्तीति कुटुम्बी। शान्तायाः कुटुम्बी शान्ताकुटुम्बी, तम्।

सम्बन्धिनम् - सम्बन्धः अस्य अस्ति इति संबन्धी, तम्।

वसिष्ठादिष्टम् - वसिष्ठेन आदिष्टः, तम्।

अश्वमेधाध्वरम् - अश्वमेधः इति अध्वरः, तम्।

पुत्रीयाम् - पुत्राणाम् इयम्।

**गद्यम्**

**तदनु हविराहरणाय धरणौ कृतावतरणाः सर्वे गीर्वाणगणाः शतमखप्रमुखाश्चतुर्मुखाय दशमुखप्रतापग्रीष्मोष्मसंप्लोषणमावेद्य तेन सह शरणमिति शार्ङ्गधन्वानं मन्वाना नानाविधप्रस्तुतस्तुतयः। क्षीराम्बुराशिमासेदुः।**

देवाः ब्रह्मणं पुरस्कृत्य वैकुण्ठं अगच्छत्

**व्याख्या-** तदनु - यज्ञप्रारम्भानन्तरं, हविराहरणाय - हविर्भागग्रहणाय, धरणौ - भूमौ, कृतावतरणाः - समागताः, सर्वे - निखिलाः, गीर्वाण- गणाः - सुरसमूहाः, शतमखप्रमुखाः - इन्द्राद्याः, चतुर्मुखाय - ब्रह्मणे, दशमुखप्रतापग्रीष्मोष्मसंप्लोषणमावेद्य - रावणस्य प्रतापतेजसः निदाघ-सन्तापेन यत् दाहं विज्ञाप्य, तेन सह - ब्रह्मणा सह, शार्ङ्गधन्वानं - विष्णुं,

शरणमिति - रक्षिता इति, मन्वानाः - अबुध्यमानाः, नानाविधप्रस्तुतस्तुतयः - बहुप्रकारैः उपक्रान्ताः प्रार्थनाभिः युक्ताः तथोक्ताः। क्षीराम्बुराशिं - क्षीरसागरतीरं, आसेदुः - प्रापुः।

**सारः** - दशरथस्य हविर्भागं स्वीकर्तुम् आगताः इन्द्राद्याः देवाः चतुर्मुखब्रह्मणे रावणपराक्रमेण दह्यमानं विश्वं विज्ञाप्य, तमेव पुरस्कृत्य रक्षणार्थं महाविष्णुं प्रार्थयितुं क्षीरसमुन्द्रं प्राप्य विविधैः स्तुतिभिः नारायणं प्रार्थयामासुः।

**पद्यम्**

**सन्तापघ्नं सकलजगतां शार्ङ्गचापाभिरामं**
**लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम्।**
**वैकुण्ठाख्यं मुनिजनमनश्चातकानां शरण्यं**
**कारुण्यापं त्रिदशपरिषत्कालमेघं ददर्श॥ १३॥**

महाविष्णोः वर्णनम्

**अन्वयः** - त्रिदशपरिषत् सकलजगतां सन्तापघ्नं, शार्ङ्गचापाभिरामं, लक्ष्मीविद्युल्लसितम्, अतसीगुच्छसच्छायकायं, मुनिजनमनश्चातकानां शरण्यं, कारुण्यापं, वैकुण्ठाख्यं कालमेघं ददर्श।

**अन्वयार्थः** - त्रिदशपरिषत् - ब्रह्मेन्द्रादिदेवसमूहः, सकलजगतां - समस्तलोकानां, सन्तापघ्नं - दुःखनाशकम्, शार्ङ्गचापाभिरामं - शार्ङ्गनामकेन धनुषा मनोज्ञम्, लक्ष्मीविद्युल्लसितम् - लक्ष्मीरेव विद्युत् तया मनोज्ञं, अतसीगुच्छसच्छायकायं - असतीपुष्पविशेषस्तबकस्य समाना छाया कान्तिर्यस्य तादृशः कायः शरीरं यस्य तथोक्तं, अतसीपुष्पसमानशरीरं मुनिजनमनश्चातकानां - मुनिजनानां मनांसि एव चातकसदृशानाम् शरण्यम् - रक्षकम्, कारुण्यापं- दया एव जलम् यस्य

तादृशं कारुण्यजलं, वैकुण्ठाख्यं - वैकुण्ठनामकम्, कालमेघं - नीलाम्बुदम्, ददर्श - अपश्यत्।

**सारः** - ब्रह्मेन्द्रादिदेवसमूहः वैकुण्ठं प्राप्य नारायणं ददर्श। सः नारायणः सर्वलोकानां दुःखनाशकः,शार्ङ्गनामकेन धनुषा मनोज्ञः, लक्ष्मीरूपविद्युता-युक्तः, अतसीपुष्पसमानकान्तिः, मुनिजनमनोरूप- चातकानां शरण्यः, दयारसपूर्णः कालमेघसदृशः आसीत्।

विग्रहः - सन्तापघ्नम् - सन्तापं हन्ति इति सन्तापघ्नः, तम्।
शार्ङ्गचापाभिरामम् - शार्ङ्गचापेन अभिरामः, तम्।
लक्ष्मीविद्युल्लसितम् - लक्ष्मीः एव विद्युत्, तया लक्ष्मीविद्युता लसितः, तम्।
अतसीगुच्छसच्छायकायम् - अतसीगुच्छसच्छायः कायः यस्य सः, तम्।
मुनिजनमनश्चातकानाम् - मुनिजनमनांसि एव चातकाः, तेषाम्।
कारुण्यापम् - कारुण्यम् आपः यस्य सः। तम्।

अलङ्कारः - रूपकालङ्कारः। उपमा।

वृत्तम् - मन्दाक्रान्ता वृत्तम्।

**पद्यम्**

**क्षीराम्भोधेर्जठरमभितो देहभासां प्ररोहैः**
**कालोन्मीलत्कुवलयदलाद्वैतमापादयन्तम्।**
**आतन्वानं भुजगशयने कामपि क्षौमगौरे**
**निद्रामुद्रां निखिलजगतीरक्षणे जागरूकाम्॥ १४॥**

**अन्वयः -** देहभासां प्ररोहैः क्षीराम्भोधेः जठरम् अभितः कालोन्मीलत्कुवल-यदलाद्वैतम् आपादयन्तम्, क्षौमगौरे भुजगशयने निखिलजगतीरक्षणे जागरूकां कामपि निद्रामुद्राम् आतन्वानं (विष्णुं त्रिदशपरिषत् ददर्श)।

**अन्वयार्थः -** देहभासां - स्वशरीरकान्तिनाम्, प्ररोहैः - अङ्कुरैः, क्षीराम्भोधेः - क्षीरसमुद्रस्य, जठरम् - मध्यभागम्, अभितः - सर्वतः, कालोन्मीलत् - चन्द्रोदयसमये विकसितः, कुवलयदलस्य - नीलोत्पलपत्रस्य, अद्वैतम् - साद्दश्यम्, आपादयन्तम् - सम्पादयन्तम्, क्षौमगौरे - दुकूलवत् शुभ्रे, भुजगशयने - शेषशय्यायां, निखिलजगती - समस्तलोका, रक्षणे - पालने, जागरूकां - जाग्रतीम्, कामपि - अनिर्वाच्याम्, निद्रामुद्राम् - योगनिद्रावस्थाम्, आतन्वानं - प्रदर्शयन्तम्।

**सारः** - देवानां समूहः क्षीरसमुद्रस्य मध्यभागे दुकूलवत् शुभ्रशरीरस्य आदिशेषस्योपरि शयानं महाविष्णुम् अद्राक्षीत्। विष्णोः इन्द्रनीलसन्निभस्य देहस्य कान्त्या क्षीरसमुद्रस्य मध्यभागे कुवलयदलानि विकसितानि इव नीलत्वम् आसीत्। किञ्च, विष्णुः योगनिद्रायां निरतः सन्नेव सर्वेषां लोकानां पालनं करोति स्म।

अलङ्कारः - गुणालङ्कारः।

वृत्तम् - मन्दाक्रान्ता।

**पद्यम्**

नृसिंहावतारस्य वर्णनम्

**प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं**
**स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम्।**
**बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे**
**दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे॥ १५॥**

**अन्वयः** - दंष्ट्रारोचिर्विशदभुवने विश्वदृष्टे, पुरुषवपुषा मिश्रिते सिंहवेषे प्रह्लादस्य अमितं व्यसनम्, दैत्यवर्गस्य दम्भम्, स्तम्भम्, रिपोः वक्षःस्थलम् अपि यौगपद्येन भेत्तुं रंहसा बद्धश्रद्धं (त्रिदशपरिषत् ददर्श)

**अन्वयार्थः** - दंष्ट्रारोचिर्विशदभुवने - नृसिंहस्य दन्तकान्त्या सर्वे लोकाः प्रकाशिता, विश्वदृष्टे - समस्तजनावलोकिते, पुरुषवपुषा- नरशरीरेण, मिश्रिते - मिलिते, सिंहवेषे - सिंहाकारे, प्रह्लादस्य - हिरण्यकशिपुसुतस्य, अमितं - अपारम्, व्यसनम् - विपदम्, दैत्यवर्गस्य - असुरसमूहस्य, दम्भम् - कपटम्, स्तम्भम् - लौहमयस्तम्भविशेषं, रिपोः - शत्रोः हिरण्यकशिपोः वक्षःस्थलम् - उरःस्थलम्, अपि - एव, यौगपद्येन - समकाले, भेत्तुं - विदारयितुम्, रंहसा - वेगेन, बद्धश्रद्धं - कृतसङ्कल्पम् (त्रिदशपरिषत् ददर्श)

**सारः** - यः विष्णुः दन्तकान्त्या लोकं प्रकाशयन्तं सर्वजनदर्शनीयं नरसिंहवेषं झटिति स्वीकृत्य स्वभक्तस्य प्रह्लादस्य विपदम्, असुराणां कपटम्, अयःस्तम्भम्, शत्रोः वक्षःस्थलं च समकाले विदारितवान्, तादृशं विष्णुं देवाः अपश्यन्।

**पद्यम्**

भगवन्तं नारायणं स्तौति

**नारायणाय नलिनायतलोचनाय नामावशेषितमहाबलिवैभवाय।**
**नानाचराचरविधायकजन्मदेशनाभीपुटाय पुरुषाय नमः परस्मै॥ १६॥**

**अन्वयः** - नारायणाय नलिनायतलोचनाय नामावशेषितमहाबलि वैभवाय नानाचराचरविधायकजन्म देशनाभीपुटाय परस्मै पुरुषाय नमः।

**अन्वयार्थः** - नारायणाय - विष्णवे, नलिने - कमले इव, आयते - विशाले लोचनाय - नयने यस्य, विशालनेत्राय, नाम - आख्यामात्रेण, अवशेषितं - शेषीकृतम्, महा - भूयिष्ठम्, बलिदैत्यचक्रवर्तिनः, वैभवाय - सम्पदे नाना-चराचरं - बहुप्रकारकं स्थावरजङ्गमात्मकं जगत्, विधायकस्य - सृष्टिकर्तुः ब्रह्मणः, जन्मदेशभूताय - उत्पत्तिस्थानभूताय, नाभीपुटाय - नाभिपद्म-कोशाय, परस्मै पुरुषाय - परमात्मने, नमः - अभिवादनम्।

**सारः** - नारायणाय, पुण्डरीकविशालनेत्राय, असुरचक्रवर्तिनः बलेः भूयिष्ठां सम्पदं नाममात्रशिष्टां कृतवते, सृष्टिकर्तुः ब्रह्मणः उत्पत्तिस्थानभूतं नाभिकमलं दधते परमात्मने नमः।

**गद्यम्**

**इति प्रणम्योत्थितानेतान् स्तुतिरवमुखरितहरितान्मुखान् हरिहयप्रमुखा-नखिलानमरानरुणारुणतामरसविलासचोरैर्लोचनमरीचिसन्तानैरानन्द-यन्नरविन्दलोचनः स्फुटमभाषत।**

**व्याख्या** - इति - एवं प्रकारेण, प्रणम्य - साष्टाङ्ग प्रणिपत्य, उत्थितान् - उत्थानं प्राप्तवतः, एतान् - इमान्, स्तुतिरवमुखरितहरितान्मुखान् - देवानां स्तोत्रस्य उच्चध्वनिना सर्वाः दिशः पूरितान्, हरिहयप्रमुखान् - इन्द्रादीन्, अखिलान् - सर्वान्, अमरान् - देवान्, अरुणारुणैः तामरसविलासचोरैः - अत्यन्तलोहितपद्मतुल्यैः, लोचनमरीचिसन्तानैः - दृष्टिप्रभापरम्पराभिः, आनन्दयन् - प्रसन्नान् कुर्वन्, अरविन्दलोचनः - कमलनेत्रो, स्फुटम् - व्यक्तं, अभाषत - अब्रवीत्।

**सारः** - इन्द्रादीनां देवानां स्तुतिध्वनिभिः दिशः परिपूर्णाः। ततः एतान् देवान् कमलवत्सुन्दरैः नेत्रप्रभाभिः तोषयन् कमलनेत्रः विष्णुः व्यक्तम् अवोचत्।

**पद्यम्**

नारायणकृतः कुशलप्रश्नः

**अपि कुशलममर्त्याः स्वागतं साम्प्रतं वः**
**शमितदनुजदम्भा किं नु दम्भोलिकेलिः।**
**अपि धिषणमनीषानिर्मिता नीतिमार्गाः**
**त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते॥ १७॥**

**अन्वयः** - अमर्त्याः! अपि कुशलम्? वः साम्प्रतं स्वागतम्। दम्भोलिकेलिः शमितदनुजदम्भा किम्? धिषणमनीषानिर्मिताः नीतिमार्गाः त्रिदशनगर-योगक्षेमकृत्ये क्षमन्ते अपि?

**अन्वयार्थः** - अमर्त्याः ! - हे देवाः, अपि कुशलम्? - क्षेमं वा ? वः - युष्माकम्, साम्प्रतं - इदानीम्, स्वागतम् - सुखागमनम्। दम्भोलिकेलिः -वज्रायुधस्य विलासः, शमितदनुजदम्भा किम्? - दानवाः विध्वस्ताः किम् इति,धिषण- मनीषानिर्मिताः - बृहस्पतेः बुद्ध्या रचिताः, नीतिमार्गाः - राजनीतिपद्धतयः, त्रिदशनगरयोगक्षेमकृत्ये - देवानाम् पुरसंरक्षणकर्मणि, क्षमन्ते - समर्थाः भवन्ति अपि? - किम्?

**सारः** - हे देवाः! क्षेमं किम्? भवताम् इदानीं स्वागतम्। वज्रायुधः दानवानां कपटनाशनं करोति किल ? देवगुरोः बृहस्पतेः नयोपायाः अमरावत्याः संरक्षणे समर्थाः सन्ति ननु ?

वृत्तम् - मालिनी।

**गद्यम्**

**एवं भगवतः कुशलानुयोगपुरः सरीममृतासारसरसां सरस्वतीमाकर्ण्य सम्पूर्णमनोरथानां सुमनसां संसत् पुंसे परस्मै विज्ञापयामास।**

**व्याख्या** - एवम् - उक्तप्रकारेण, भगवतः - विष्णोः, कुशलानुयोगपुरःसरीम् कुशलप्रश्नपूर्विकाम्, अमृतासारसरसां - सुधाधारावत् रुचिराम्, सरस्वतीम् - वाचं, आकर्ण्य - श्रुत्वा, सम्पूर्णमनोरथानां - कृतार्थानां, सुमनसां - देवानाम्, संसत् -समितिः, परस्मै पुंसे - परमपुरुषाय,विज्ञापयामास - न्यवेदयत्।

**सारः** - नारायणस्य ईदृशां कुशलप्रश्नपूर्विकाम् सुधाधारावत् रुचिरां वाणीं श्रुत्वा कृतार्थानां देवानां समितिः परमपुरुषाय विष्णवे न्यवेदयत्।

**गद्यम्**

**देव! कथमकुशलमाविर्भवेद्भवता कृतावलम्बानामस्माकम्? किन्तु।**

**व्याख्या** - देव - स्वामिन्, कथम् - केन प्रकारेण, अकुशलम् - अशुभम्, आविर्भवेत् - उत्पद्येत, भवता - त्वया, कृतावलम्बानाम् - दत्ताश्रयाणाम्, अस्माकम् - नः, किन्तु - तथापि (किञ्चिद् विज्ञापनीयमस्ति)

**सारः** - महात्मना त्वया दत्ताश्रयाणाम् अस्माकं केन प्रकारेण अशुभम् आविर्भवति। (निश्चयेन अशुभं न आविर्भवति इति काकुः)। तथापि (किञ्चिद् विज्ञापनीयमस्ति)

**पद्यम्**

**अस्ति प्रशस्तविभवैर्विबुधैरलङ्घ्या**
**लङ्केति नाम रजनीचरराजधानी।**
**माणिक्यमन्दिरभुवां महसां प्ररोहैः**
**तेजस्त्रयाय दिनदीपदशां दिशन्ती॥ १८॥**

लङ्कायाः वर्णनम्

**अन्वयः** - प्रशस्तविभवैः विबुधैः अलङ्घ्या, माणिक्यमन्दिरभुवां महसां प्ररोहैः तेजस्त्रयाय दिनदीपदशां दिशन्ती लङ्का इति नाम रजनीचर-राजधानी अस्ति।

**अन्वयार्थः** - प्रशस्तविभवैः - प्रख्यातवस्तुसंपद्भिः, विबुधैः - देवैः, अलङ्घ्या - अतिशयितुम् अशक्या, माणिक्यमन्दिरभुवां - मणिमयगृहोत्थानाम्, महसां - भासां, प्ररोहैः - अङ्कुरैः, तेजस्त्रयाय - सूर्यचन्द्रकृशानुरूप-

त्रिविधतेजसे, दिनदीपदशां - निस्तेजस्त्वं, दिशन्ती - कल्पयन्ती, लङ्का इति नाम - लङ्का नाम्ना प्रसिद्धा, रजनीचरराजधानी राक्षसानाम् प्रधाननगरी, अस्ति - विद्यते।

**सारः** - लङ्कानाम्नी राक्षसानां प्रधाननगरी विद्यते, या प्रख्यातसम्पद्भिः देवैः अपि अतिशयितुम् अशक्या। तस्याः मणिमयभवनानां तेजसा सूर्य -चन्द्र-अग्नयः अपि दिनदीपाः इव निस्तेजसः दृश्यन्ते।

विग्रहः - प्रशस्तविभवैः - प्रशस्तः विभवः येषां ते प्रशस्तविभवाः तैः।

**पद्यम्**

**एनां पुराणनगरीं नगरीतिसालां**
**सालाभिरामभुजनिर्जितयक्षराजः**
**हेलाभिभूतजगतां रजनीचराणां**
**राजा चिरादवति रावणनामधेयः॥ १९॥**

**अन्वयः** - एनां नगरीतिसालां पुराणनगरीं रावणनामधेयः,सालाभिराम-भुजनिर्जितयक्षराजः, हेलाभिभूतजगतां रजनीचराणां राजा चिरात् अवति।

रावणस्य वर्णनम्

**अन्वयार्थः** - एनां - पूर्वोक्तां लङ्काम्, नगरीतिसालां - पर्वतस्येव आकृतिः यस्य तादृशः प्रकारो यस्याः ताम् पर्वताकृतितुल्यां, पुराणनगरीं - पुरातनपुरीम्, रावणनामधेयः - रावणनामकः, सालाभिरामभुजनिर्जि-तयक्षराजः - सर्जवृक्षाः इव मनोज्ञैः विंशतिसंख्याकैः बाहुभिः पराजितः कुबेरं पराजितवान् हेलाभिभूतजगतां - लीलया तिरस्कृतानि लोकाः यैः तेषाम्, क्रीडया लोकमपि पराजयितुं शक्तः रजनीचराणां - राक्षसानाम्, राजा - नृपः, चिरात् - चिरकालादारभ्य, अवति - पालयति।

**सारः -** गिरिदुर्गैः आवृताम् इमां लङ्कानगरीं रावणो नाम राजा पालयति। सः रावणः स्वस्य सालवृक्षसदृशैः भुजैः यक्षराजं कुबेरं पराजितवान्। तस्य नेतृत्वे राक्षसाः सर्वान् लोकान् लीलया जितवन्तः।

**पद्यम्**

**यद्बाहुराहुरसनायितशस्त्रधाराः**
**दिक्पालकीर्तिमयचन्द्रमसं ग्रसन्ति।**
**यद्वैरिणां रणमुखे शरणप्रदायी**
**नैवास्ति कश्चिदमुमन्तकमन्तरेण॥ २०॥**

**अन्वयः** - यद्बाहुराहुरसनायितशस्त्रधाराः दिक्पालकीर्तिमयचन्द्रमसंग्रसन्ति।।रणमुखे यद्वैरिणां शरणप्रदायी अमुम् अन्तकमन्तरेण कश्चित् नैवास्ति।

**अन्वयार्थः -** यद्बाहुराहुरसनायितशस्त्रधाराः - रावणस्य भुजाः एव राहुरूपाः तैः गृहीताः जिह्वारूपाः आयुधश्रेणयः दिक्पालकीर्तिमयचन्द्रमसंग्रसन्ति, कीर्तिमयानाम् इन्द्रादीनां यशांसि नाशयन्ति। रणमुखे - युद्धे, यद्वैरिणां - यद् शत्रूणां, शरणदायी - रक्षकः, अमुम् - इहैव, अन्तकमन्तरेण यमं विना कश्चित् नैव अस्ति।

**सारः** - रावणस्य भुजाः एव राहुरूपाः, तैः गृहीतानि अस्त्राणि एव जिह्वारूपाणि, तैः इन्द्रादीनां दिक्पालकानां कीर्तिरूपः चन्द्रः कवलीक्रियते। रणाङ्गणे रावणस्य अरीन् त्रातुं कोऽपि न शक्नोति। सर्वेऽपि ते निश्चयेन यमलोकं प्राप्नुवन्ति।

विग्रहः - शरणप्रदायी - शरणं प्रदातुं शीलं यस्य सः।

दिक्पालकीर्तिमयचन्द्रमसम् - दिक्पालकीर्तिमयः चन्द्रमाः, तम्।

अलङ्कारः - रूपकालङ्कारः

**पद्यम्**

**अम्भोजसम्भवममुं बहुभिस्तपोभिः**
**आराधयन् वरमवाप परैर्दुरापम्।**
**तस्मादशेषभुवनं निजशासनस्य**
**लक्ष्यीकरोति रजनीचरचक्रवर्ती॥ २१॥**

ब्रह्मणः वरेण उन्मत्तः बभूव

**अन्वयः** - रजनीचरचक्रवर्ती अमुम् अम्भोजसम्भवं बहुभिः तपोभिः आराधयन् परैः दुरापं वरम् अवाप। तस्माद् अशेषभुवनं निजशासनस्य लक्ष्यीकरोति।

**अन्वयार्थः** - रजनीचरचक्रवर्ती - निशाचराधिनाथः (रावणः), अमुम् - भवतः (पुरोवर्तिनम्) अम्भोजसम्भवं - कमलयोनिं ब्रह्मणं, बहुभिः - अनेकैः तपोभिः - उग्रतपश्चर्याभिः, आराधयन् - पूजयन्, परैः - अन्यैः, दुरापं - दुर्लभम्, वरम् - नरवानरौ अन्तरेण अन्यैः अवध्यत्वरूपं वरम्, अवाप -प्राप्तवान्। तस्माद् - तेन कारणेन, अशेषभुवनं - निखिलं प्रपञ्चम्, निजशासनस्य -निजाज्ञायाः लक्ष्यीकरोति - विषयीकरोति।

**सारः** -राक्षससार्वभौमो रावणः उग्रतपसा ब्रह्माणं प्रसाद्य अन्यैः प्राप्तुं दुःखकरम् अवध्यत्वरूपं वरं प्राप्तवान्। तेन वरेण दृप्तः सर्वान् लोकान् स्वाधीनान् करोति।

विग्रहः - अम्भोजसम्भवम् - अम्भोजे सम्भवः यस्य सः, तम्।

**गद्यम्**

**तेन वयं पराधीना इव भवामः।**

**व्याख्या** - तेन - रावणेन, वयं - देवाः, पराधीनाः इव - परतन्त्राः इव, भवामः।

**सारः** - रावणस्य पराक्रमेण भीताः वयं तदाज्ञावर्तिनः, तदधीना इव स्मः। वस्तुतस्तु भवत्परतन्त्रा एव वयमिति ध्वनिः।

**गद्यम्**

**तथाहि सोऽयं कदाचित् क्रीडाधराधरमारुह्य सावरोधवधूजनश्चरणाभ्यां सञ्चरेत चेदागमिष्यत्याग इत्यनाविष्कृतातपो भयेन भगवान् सहस्रभानुरपि सङ्कुचितभानुरेव तत्सानूनि नूनं संश्रयते।**

सूर्यस्य अवस्थां वर्णयति।

**व्याख्या** - सोऽयं - रावणः, सावरोधवधूजनः - अन्तपुरोवर्तिस्त्रीजनेन, चरणाभ्याम् - पादाभ्याम्, कदाचित् - कस्मिंश्चित् समये, क्रीडाधराधरम् - क्रीडापर्वतम्, आरुह्य - अधिष्ठाय, सञ्चरेत चेत् - विहरेत् यदि, भगवान् - पूज्यः, सहस्रभानुः अपि - सूर्यः अपि, आगः - अपराधः, आगमिष्यति - सम्भविष्यति इति - इति मत्वा, भयेन - भीत्या, अनाविष्कृतातपः - अप्रकटितप्रकाशः, सङ्कुचितभानुः एव - उपसंहृत किरण एव, तत्सानूनि - क्रीडापर्वतस्य शिखरप्रदेशान्, नूनं -निश्चयेन, संश्रयते - अवलम्बते।

**सारः** - यदा रावणः अन्तःपुरस्त्रीभिः सह क्रीडापर्वतम् आरुह्य पद्भ्यां विहरति, तदा तस्य कोपभयेन सूर्यः स्वस्य आतपं संहृत्य सङ्कुचितकिरणः पर्वतस्य अधोभागम् आश्रयति।

विग्रहः - सहस्रभानुः - सहस्रं भानवः यस्य सः।

सङ्कुचितभानुः सङ्कुचिताः भानवः यस्य सः।

अलङ्कारः - अनुप्रासः, अतिशयोक्तिः।

**गद्यम्**

**एष मृगाङ्कोऽपि मृगयायासपरिश्रान्तिविश्रान्त्यै ससम्भ्रमं नमज्जनपरिवृते मज्जनगृहाभिमुखे दशमुखे तत्रत्यविचित्रतरशातकुम्भस्तम्भाग्रप्रत्यग्रप्रत्यु-**

**प्रस्फटिकशिलाशालभञ्जिकापुञ्जकरतलकलितनिजोपलमयकलशमुखाद च्छाच्छामविच्छिन्नधारामम्बुधारां निजकराभिमर्शादापादयंस्तस्य प्रसाद-पिशुनानां सुनासीरचिरकाङ्क्षितानां विंशतिविधवीक्षणानां क्षणमात्रं पात्रं भवति।**

चन्द्रस्य प्रयत्नः

**व्याख्या** - एषः अयम्, मृगाङ्कः अपि - चन्द्रः अपि, मृगया - आयास, परिश्रान्ति - विश्रान्त्यै - मृगया - आखेटः तत्र यः आयासः तदनुकूल-विधिव्यापारः तस्मात् आद्या परिश्रान्तिः श्रमस्तया विश्रान्त्यै अपनो-दनार्थम्, नमज्जनपरिवृते - नमद्भिः - नमस्कारजनैः - भृत्यादिभिः, परिवृते - परिवेष्टिते, दशमुखे - रावणे, मज्जनगृहाभिमुखे स्नानमण्डपोन्मुखे (सति), अच्छाच्छाम् - अत्यन्तनिर्मलाम्, अविच्छिन्नधाराम् - अखण्डप्रवाहाम्, अम्बुधारां - जलधाराम्, ससम्भ्रमं - सत्वरम्, तत्रत्याः - स्नानगृहस्थाः, विचित्रतराः - अत्यन्त-आश्चर्यकराः, शातकुम्भस्तम्भाग्रे - हिरण्मयस्तम्भानाम् उपरिभागे, प्रत्यग्रप्रत्युप्तः - नूतनतया प्रतिष्ठापितः, स्फटिकशिलाशालभञ्जिकापुञ्जे - स्फटिकमणि - निर्मितानां सुन्दरस्त्री-विग्रहाणां समूहे, करतलकलिताः - हस्तेषु गृहीताः, निजोपलमयकलशानां - चन्द्रकान्तशिलानिर्मिताघटानां, मुखाद् - मुखरूपविवरात्,आपादयन् - उत्पादयन्, सुनासीरचिरकाङ्क्षितानां - इन्द्रेण बहोः कालात् अभिलषितानाम्, प्रसादपिशुनानां - अनुग्रहसूचकानाम्, तस्य - रावणस्य, विंशतिविधवीक्षणानां - विंशतिसंख्याकानां कटाक्षाणाम्, क्षणमात्रं - अल्पकालम्, पात्रं भवति - योग्यः भवति।

**सारः** - रावणः मृगयां समाप्य श्रान्तः सन् निवृत्य स्नानगृहं प्रतिगच्छति। तस्य स्नानगृहे स्वर्णस्तम्भाः सन्ति। तेषु नूतनतया प्रतिष्ठापिताः स्फटिकनिर्मिताः सुन्दरस्त्रीविग्रहाः विद्यन्ते। तासां स्त्रीणां हस्तेषु चन्द्रकान्तशिलानिर्मिताः घटाः सन्ति। रावणस्य स्नानार्थं चन्द्रः स्वस्य

किरणैः तेभ्यः घटेभ्यः निर्मलजलस्य सततप्रवाहं कल्पयति। तदा प्रसन्नः रावणः क्षणमात्रं स्वस्य विंशतिभिः नेत्रैः चन्द्रं वीक्षते चेत् तु चन्द्रस्य कृतकृत्य भावना उत्पद्यते।

विग्रहः - मृगाङ्कः - मृगः अङ्के यस्य सः।

**गद्यम्**

वायोः दुःस्थितिः

**तेन पुलस्त्यनन्दनेन सङ्क्रन्दननन्दनात्स्वमन्दिरोद्यानमानीतस्य मन्दार-प्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दीवरद्वन्द्वाच्च करारविन्दकलितकनककलशाच्च मन्दोष्णं स्यन्दमानैरम्बुभिर्जम्बालि-तालबालस्य पचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति।**

**व्याख्या** - तेन - पूर्वर्णितेन देवेष्वत्याचारकारिणा, पुलस्त्यनन्दनेन-रावणेन, सङ्क्रन्दनस्य - इन्द्रस्य, नन्दनात् नन्दनवनात्, स्वस्य - आत्मनः, मन्दिरस्य - गृहस्य, उद्याने - आरामे, आनीतस्य - प्रापितस्य, मन्दारः - एतन्नामको वृक्षः, प्रमुखः - प्रधानः, यस्य तस्य, पारिजाता- दिकस्येत्यर्थः, वृन्दारकानाम् - देवानाम्, तरूणाम् - वृक्षाणाम्, वृन्दस्य - समूहस्य, बन्दीकृताः - निगडिताः, ये सुराः - देवाः, तेषां याः - सुन्दर्यः, तासां सुरसुन्दरीणाम् - देवस्त्रीणाम्, नयनानि - नेत्राणि, एवं इन्दीवराणि - नीलकमलानि, तेषाम्, द्वन्द्वाच्च - युगलाच्च, करारविन्देषु - हस्तकमलेषु, कलिताः - गृहीताः,, ये कनककलशाः - सुवर्णघटाः, तस्माच्च मन्दोष्णम् - ईषदुष्णम्, यया स्यात् तथा, स्यन्दमानैः - प्रवहमानैः,, अम्बुभिः - अश्रुजलैः, कलशोदकैश्च, जम्बालवत् कृतानि जम्बालितानि - पङ्कीकृतानि, तान्यालवालानि - जलाधारमूलवलयानि, यस्य तस्य वृन्दारकतरुवृन्दस्य, पचेलिमानामपि - पतनोन्मुखानामपि, कुसुमानाम् - पुष्पाणां, पतनस्य - अधःपतनस्य, भयमाशङ्कमानाः - उत्प्रेक्षणं कुर्वाणः, कुसुमपाते सञ्जाते

रावणो मां निग्रहिष्यतीति भीतिगताः, पवमानाः - वायवः, परिस्पन्दितुम् - चलितुमपि, किमुत ययेच्छविहर्तुम्, प्रभवः - समर्थः, न - नहि, भवन्ति - जायन्ते।

**सारः** - रावणः इन्द्रं पराजित्य तस्य नन्दनवनात् मन्दारादीन् देववृक्षान् अपहृत्य स्वस्य गृहोद्याने स्थापितवान्। किञ्च सुरसुन्दरीश्च बन्दीकृत्य तेषां वृक्षाणां जलसेचनकार्ये नियोजितवान्। जलसेचनकाले शीतेन कलशोदकेन सह तासां बाष्पोदकस्य मिश्रणेन कदुष्णं जलं वृक्षाणाम् मूले पतति, येन तेषाम् आलवालानि पङ्कीकृतानि। तद् वृक्षाणां सुपक्वानामपि पुष्पाणां पतनं रावणस्य क्रोधमुत्पादयेत् इति भीताः मरुतः चलितुमपि असमर्थाः,किमुत यथेच्छं विहर्तुम्?

**गद्यम्**

**एतेऽपि पावका रूढिशङ्कावहां हुतवहाख्यां वहन्तस्तद्गृहे गार्हपत्यपुरोगाः पौरोगवधुरं दधते।**

अग्नेः अवस्थां वर्णयति

**व्याख्या** - एते अपि इमे अपि, गार्हपत्यपुरोगाः - गार्हपत्यप्रभृतयः पावकाः अग्नयः रूढिशङ्कावहां यौगिकार्थं विना यादृच्छिकी संज्ञा इति भावनाम् उत्पादयन्तीम्, हुतवहाख्यां - "हुतवहः" इति अभिधानम्, वहन्तः दधतः, तद्गृहे रावणस्य निवासे, पौरोगवस्य - पाकशालाध्यक्षस्य, धुरं - भारम्, दधते - धरन्ति।

**सारः** - गार्हपत्यादयः अग्नयः यज्ञादिषु कर्मसु उपयुक्ताः हविषः प्रापकत्वेन "हुतवहाः" इत्येव प्रसिद्धाः। किन्तु रावणेन सर्वेषां यज्ञानां विध्वंसितत्वात् अधुना एते अग्नयः पाककार्यार्थमेव उपयुज्यन्ते, न तु यागादिषु।

**गद्यम्**

**किंबहुना। स एष मानुषादवमाननमागमिष्यतीत्यमन्वानः तदितरैरवध्यत्वं चतुराननवराल्लब्ध्वा समुद्धतः सम्प्रति सम्प्रहारसमाक्रान्तदिगन्तदन्तावलदन्तकुन्तव्रणकिणस्थपुटितवक्षःस्थलः स्थलकमलिनींवनवारण इव रावणः त्रिलोकीमभिभवन् भवदीयानित्यस्मान्न जातुकिञ्चिदपि जानातीति।**

देवानां अन्तिमप्रार्थना

**व्याख्या -** किं बहुना - बहुभिः कालयापनवाक्यैः अलम्। स एषः - उपरि समुपवर्णितो रावणः, मानुषात् - मनुष्येभ्यः, जातावेकवचनम्, अवमाननम् - अवज्ञा, परिभवः, आगमिष्यति - समापतिष्यतिती, इति - इत्येतद्, अमन्वानः - अनवगच्छन्, तदितरैः - मानवव्यतिरिक्तैः सुरासुरादिभिः, अवध्यत्वम् - अहिंस्यत्वम्, चतुराननस्य - ब्रह्मणः, वरात् - वरदानात्, लब्ध्वा - सम्प्राप्य, समुद्धतः - दर्पोद्रिक्तः सन्, सम्प्रति - साम्प्रतम्, सम्प्रह्रियतेऽनेनेति, सम्प्रहारः युद्धम्, तत्र सामाक्रान्ताः - समवरुद्धाः, ये दिगन्तदन्तायाः दिग्गजानां दन्ताः - रदनाः, एव कुन्ताः - भल्लाः, तैर्यानि व्रणानि - क्षतानि, तैर्जाताः ये किणाः - शुष्कग्रन्थयः, तैः स्थपुटितम् -निम्नोन्नतम्, वक्षःस्थलम् - उरःस्थलम्, यस्य तथोक्तः सन् अत एव वनवारणः - वनगजः, स्थलकमलिनीम् - स्थलप्ररूढपद्मिनीमिव, त्रयाणां लोकानां समाहारस्त्रिलोकी, ताम् - जगत्त्रयीम्, अभिभवन् - अभिक्रमन्, पीडयन्निति यावत्, अस्मान् भवदीयान् तावकीनान्, जातु - कदाचिदपि,, किञ्चिद् - ईषदपि न जानाति सकललोककण्टकेन दर्पान्धेन रावणेन त्वन्महिमैव न ज्ञायते, अस्माकं तु का कथेति भावः।

**सारः -** रावणः अत्यन्तं पराक्रमी युद्धे दिग्गजानां दन्तकृतानां व्रणानां किणैः तस्य वक्षःस्थलं निम्नोन्नतमस्ति (दिग्गजैः प्रहृतस्यापि व्रणमात्रं तस्मिन् उत्पन्नम्, न तु महती कापि हानिः इति ध्वनिः)। तादृशः सः मनुष्यैः

पराभवः कदाचिदपि भवितुं नार्हतीति तद्भिन्नैः सर्वैरपि अवध्यत्वं चतुर्मुखब्रह्मणः प्रसादात्प्राप्तवान्। तेन च वरेण दर्पोद्रिक्तः जगत्त्रयीमपि बाधते। भवतः महिमानं अजानन् सः भवदीयान् अस्मान् बहु पीडयति। विग्रहः - त्रिलोकीम् - त्रयाणां लोकानां समाहारः त्रिलोकी ताम्।

## Summarised Overview

चम्पूरामायणस्य कर्ता भोजः ग्रन्थस्यादौ मङ्गलश्लोकद्वयं स्रष्टम्। आदौ गणेशस्य नमस्कारः क्रियते। ततः विप्रनमस्कारं विदधाति। भोजः अथ चम्पूप्रबन्धस्य सौन्दर्यं वर्णयति। कविना रामायणप्रबन्धरचनायाः समर्थनं क्रियते। नारदात् रामकथां श्रुत्वा वाल्मीकिः माध्याह्निकं कर्तुं तमसानदीं गच्छति। तत्र व्याधः क्रौञ्चमिथुनादेकं मारयति। तेन करुणवेदित्वात् तं व्याधं शपति। सः एव आदिमः संस्कृतं श्लोकः। ततः वाल्मीकौ समयोचितकृत्यं निवृत्य स्वाश्रमं प्रति गतवान्। यदा वाल्मीकिः एतत् आह्लादिकं समाप्य आश्रमं गच्छति तदा तत्र ब्रह्मा आविर्भवति। पत्न्याः सरस्वत्याः विलासं अन्यत्र वाल्मीकेः समीपे विलसति इत्येतत् असहमानः इव ब्रह्मा वाल्मीकेः आश्रमे आविर्भवति। ब्रह्मा वाल्मीकिं वदति - 'सरस्वत्याः छन्दोबद्धं इदं रूपं भूलोके प्रकाशयितुं भवानेव समर्थः, अतः एवं छन्दोबद्धैः वाक्यैः एव नारदमुखात् श्रुतां रामकथां, भवान् रामायणाख्यं प्रबन्धं करोतु' इति उक्त्वा ब्रह्मा अप्रत्यक्षो भवति।

वाल्मीकौ एनं प्रबन्धं प्रयोक्तुं कः समर्थः इति चिन्तयति सति तस्य समीपं कुशलवौ प्राप्तौ। वाल्मीकिः लवकुशौ रामायणम् अध्ययनं करोति। लवकुशाभ्यां रामायणगानं श्रुत्वा रामः लवकुशौ स्वभवनं आनयति। लवकुशौ रामायणं गातुं अरभते।

आयोध्यायाः दशरथस्य च वर्णनमासीत्। तदनन्तरं पुत्रशोकात् खिन्नः सः दशरथः अश्वमेधयज्ञं कर्तुं अमात्यैः सह चर्चां कुर्वन्नासीत्। तदा सुमन्त्रस्य वचनानुगुणं अङ्गदेशात् ऋष्यश्रृङ्गम् आनीय सरयूनद्याः तीरे अश्वमेधयज्ञं कृत्वा पुत्रकामेष्ठिम् आरब्धवान्।

हविर्भागं स्वीकर्तुं भूमिं आगताः इन्द्रादयः देवाः ब्रह्मणे निवेदयन्ति यत् दशमुखस्य पराक्रमः ग्रीष्मकालस्य आतपः इव लोकान् दहति। नारायणः एव शरणं विज्ञाय, ब्रह्मणा साकं नारायणं द्रष्टुं क्षीरसागरं गच्छन्ति। तत्र नारायणं दृष्ट्वा तं स्तुतिं कुर्वन्ति। नारायणः कुशलप्रश्नं करोति। नारायणस्य वाक्यप्रदानेनैव तुष्टाः देवाः रावणः कथं त्रीन् लोकान् पीडयति इत्यस्मिन् विषये वक्तुं आरभते। प्रथमं लङ्कायाः वैभवस्य वर्णनं, पुनः रावणस्य पराक्रमवर्णनं च। रावणस्य पराक्रमेण सूर्यस्य, चन्द्रस्य, वायोः, अग्नेः च दुःस्थितिं वर्णयति। युद्धे रावणस्य पराक्रमः, मनुष्येतरैः अवध्यत्वरूपः वरः, लोकत्रयविनाशरूपं पराक्रमं च वर्णयति।

## Assignments

1. भोजरीत्या चम्पूकाव्यस्य स्वरूपं निष्पादयत।
2. चम्पूरामायणस्य बालकाण्डानुसारेण क्षीरसागरे देवैर्दृष्टस्य भगवतः विष्णोः वर्णनं कुरुत।
3. देवैः वर्णितं रावणस्यैश्वर्यमत्याचारं च वर्णयत।
4. रावणपराक्रमेण अग्नेरवस्थां विशदयत।
5. रावणं प्रसादयितुं चन्द्रस्य यत्नं - विवृणुत।
6. सहस्रभानुरपि सङ्कुचितभानुरेव तत्सानूनि नूनं संश्रयते। कथम्?
7. पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति - व्याख्यात।
8. उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।
   तेषां प्रकाशनदशा च महीसुरैश्चेत्तानन्तरेण निपतेत् क्व नु मत्प्रणामः॥ - व्याख्यात।

9. वाल्मीकिगीतरघुपुंगवकीर्तिलेशैस्तृप्तिं करोमि कथमप्यधुना बुधानाम्।

गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः किंतर्पणं न विदधाति नरः पितॄणाम्।। - ससन्दर्भं व्याख्यात।

10. मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। - ससन्दर्भं व्याख्यात।

## Suggested Readings

1. Ramayanacampu of Bhoja, with Ramacnadra's commentary, Nirnayasagar Press Mumbay.
2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnayasagar Press Mumbay. 1933

## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnaya Sagar Press, Bombay, 1898

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 2

# यागानुष्ठानेन रामादीनां जन्मवृत्तान्तः

## Learning Outcomes

- इतिहासावबोधः।
- भोजस्य रचनापाटवं आवगच्छति।
- रामादीनां जन्मवृत्तान्तावगमनम्।

## Background

भोजप्रणीतस्य चम्पूरामायणस्य बालकाण्डे ग्रन्थस्यादौ मङ्गलश्लोकद्वयं वर्तते। ततः चम्पूकाव्यस्य वैशिष्ट्यं, रामायणप्रबन्धरचनायाः समर्थनम्, आदिकाव्यस्योत्पत्तिः, लवकुशयोः रामायणाभ्यासः गानं, दशरथवर्णनम् इत्यादिकथासन्दर्भाः मनोहरतया वर्णिताः सन्ति। काव्येऽस्मिन् दशरथः पुत्रकामेष्टिं यज्ञं आरब्धवान् तत्र हविराहरणाय भूमिं सर्वे देवाः आगताः, ते देवाः ब्रह्माणं पुरस्कृत्य क्षीरसागरं गत्वा तत्र भगवन्तं नारायणं पश्यन्ति। तस्मै रावणस्य आक्रमणं तत्कृतां देवानां दुर्दशाञ्च निवेदितवन्तः इत्यादिकं वर्णयति कविः। देवानां निवेदनं श्रुत्वा नारायणः किं करोति इति अस्मिन् एकके पश्यामः।

## Keywords

गीर्वाणगणवाणीम्, इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः, सुत्राममित्रस्य, जाम्बवन्नामा, वैतानाद्वैश्वानरान्नरः, कौसल्यायै, केकयेन्द्रस्य पुत्र्यै, सुमित्राम्, हरिः, भरतः, लक्ष्मणशत्रुघ्नौ, विष्णुपदत्वात्, वटपत्रतुल्यम्।

## Discussion

**गद्यम्**

**अथ भगवानाकर्ण्य गीर्वाणगणवाणीम्।**

देवानां विज्ञापनं अश्रृणोत्

**व्याख्या** - अथ - देवानां विज्ञापनानन्तरम्, गीर्वाण-गण-वाणीम् - देवसमूहस्य वाचम्, आकर्ण्य - श्रुत्वा, भगवान् - नारायणः।

**सारः** - भगवान् नारायणः देवानां निवेदनं श्रुत्वा स्वयं वक्तुम् आरभते।

**इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः।**
**वाचमूचेसुधाधारां मधुरां मधुसूदनः॥ २२॥**

**अन्वयः** - इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः मधुसूदनः सुधाधारां मधुरां वाचम् ऊचे।

विष्णुः अभाषत

**अन्वयार्थः** - इन्द्रनील इव - इन्द्रनीलमणिसदृशः, अचलः - पर्वतः, इन्द्रनीलाचलः, तत्र उदञ्चत् - उल्लसन्ती, या चन्द्रिका - ज्योत्स्ना, तद्वत्

धवलम् - अवदातम्, स्मितम् - ईषद्हासं, यस्याऽसौ इन्द्रनीलाचलोदञ्च-च्चन्द्रिकाधवलस्मितः, इन्द्रनीलपर्वते विलसन्त्याः ज्योत्स्नासदृशमन्दहास-युक्तः मधुसूदनः - मधुनामकस्य दैत्यस्य निहन्ता भगवान् विष्णुः, सुधाधारां - अमृतस्यन्दिनीम्, अत एव मधुरां वाचम् - वाणीम्, ऊचे - उक्तवान्।

**सारः** - इन्द्रनीलशैले विलसन्त्या ज्योत्स्नया सदृशेन मन्दहासेन युक्तः मरकतमणिनिभशरीरः विष्णुः अमृतस्यन्दिनीं मधुरां वाणीम् उक्तवान्।

विग्रहः - इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः - इन्द्रनीलाचल उदञ्च-च्चन्द्रिका धवलं स्मितं यस्य सः।

मधुसूदनः - मधोः सूदनः। उपमालङ्कारः।

**गद्यम्**

**भवतामपराधविधायिनस्तस्य यातुधानस्य निधनमधुनैव विधातुं शक्यम्।**

रावणम् अधुनैव हन्तुं शक्यते

**व्याख्या** - भवताम् - युष्माकम्, अपराधविधायिनः - अन्याय्यम् आचरतः, तस्य, यातुधानस्य - राक्षसस्य, निधनम् - वधम्, अधुना एव - इदानीमेव, विधातुं शक्यम् - कर्तुम् शक्यम्।

**सारः** - युष्मान् अन्याय्येन पीडयन्तं तं राक्षसं शीघ्रं मारयितुं शक्यते।

विग्रहः - अपराधविधायिनः - अपराधं विधातुं शीलं यस्य सः। तस्य।

**गद्यम्**

**किन्तु सरसिजासनशासनमप्यमोघीकुर्वन्नुर्वीतले पुत्रीयतः सुत्राममित्रस्य दशरथस्य मनोरथमपि पूरयितुमादृतमानुषवेषः सन्नहमेव तं हनिष्यामीति व्याहृत्यान्तरधात्।**

मनुष्यरूपेण जातः सन् रावणं हनिष्यामि

**व्याख्या** - किन्तु सरसिजासनशासनमपि - सरसिजासनो ब्रह्मा, तस्य शासनं सुरासुरावध्यत्वरूपामाज्ञामपि, अमोघीकुर्वन् - सफलयन्, उर्वीतले

- भुविं पुत्रीयतः - आत्मनः पुत्रमिच्छतः, सुत्राममित्रस्य इन्द्रसुहृदः दशरथस्य तन्नाम्नो राज्ञः, मनोरथं वाञ्छितमपि पूरयितुं - पूर्णं कर्तुम्, आदृतमानुषवेषः - आदृतः - गृहीतः, मानुषस्य वेषः गृहीतमानवाकृतिः सन् अहमेव तं - रावणं हनिष्यामि - मारयिष्यमि इत्येवं प्रकारेण व्याहृत्य - उक्त्वा, अन्तरधात् - तिरोबभूव।

विग्रहः - सरसिजासनशासनम् - सरसिजासनस्य शासनम्।

पुत्रीयतः - पुत्रम् आत्मनः इच्छति, तस्य।

आदृतमानुषवेषः - आदृतः मानुषवेषः येन सः।

**सारः** - किन्तु ब्रह्मणः वरं सत्यमापयितुम्, तथैव भूलोके सुतार्थिनः इन्द्रसुहृदः दशरथस्य इच्छां पूरयितुं च अहमेव मानवाकारं गृहीत्वा तं रावणं हनिष्यामि" इत्युक्त्वा भगवान्नारायणः अदृश्योऽभूत्।

**गद्यम्**

देवाः क्षीरसागरात् निष्क्रान्ताः

**ततः सा परिषदनिमिषाणामुन्मिषितहर्षा हृषीकेशादेशात्प्रशमित- दुर्दशानि निर्दशाननानि चतुर्दशभुवनानि बुद्ध्वा दुग्धसागरान्निरगात्।**

**व्याख्या** - ततः - विष्णुतिरोधानानन्तरम्, सा - पूर्वोक्ता, अनिमिषाणां परिषद् - देवसंसत्, उन्मिषितहर्षा - समुत्पन्नानन्दा, हृषीकेशदेशात् - नारायणस्य आज्ञया, प्रशमितदुर्दशानि - निवारितदुरवस्थानि, निर्दशाननानि - रावणमुक्तानि, चतुर्दशभुवनानि - भूरादीन्चतुर्दशसङ्ख्य-कान्लोकान्, बुद्ध्वा - मत्वा, दुग्धसागरात् - क्षीरसागरात्, निरगात् - प्रातिष्ठत।

**सारः** - नारायणस्य वाचं श्रुत्वा सुरसमूहः अत्यन्तं सन्तुष्टः, अचिरादेव भगवतः आज्ञया सर्वे लोकाः निवारितदुरवस्थाः रावणमुक्ताः भविष्यन्ति

इति मत्वा क्षीरसमुद्रात् प्रातिष्ठत।

विग्रहः - अनिमिषाणाम् - न निमिषन्ति इति अनिमिषाः। तेषाम्।

उन्मिषितहर्षा - उन्मिषितः हर्षः यस्याः सा।

प्रशमितदुर्दशानि - प्रशमिता दुर्दशा येषां तानि।

निर्दशाननानि - निर्गतः दशाननः येभ्यः तानि।

**गद्यम्**

**ततः पितामहः तान् अमरान् प्राह स्म**

**व्याख्या** - ततः क्षीरसागरात् प्रस्थानानन्तरम्, पितामहः - ब्रह्मा, तान् अमरान् - देवान्, प्राह स्म - ब्रूते स्म।

**सारः** - वैकुण्ठात् निवर्त्य सृष्टिकर्ता ब्रह्मा तान् देवानुद्दिश्य उवाच।

**गद्यम्**

ब्रह्मणः आदेशः

**भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहाय्यार्थमप्सरः प्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति।**

**व्याख्या** - भवन्तः - यूयं देवाः, तावत् - इदानीम्, अवतरिष्यतः - दाशरथिरूपेण संभविष्यतो, लक्ष्मी-सहायस्य - श्रीपतेः, साहाय्यार्थम् - सहयोगं दातुम्, अप्सरःप्रभृतिषु युवतिषु - मेनकादिषु देवकन्यकासु, वानर-अच्छभल्ल-गोपुच्छ-नीलमुख-वेष-भृतः वानरान् अच्छभल्लाः - भल्लूकाः गोपुच्छाः, नीलमुखाः - कपिप्रभेदाः, तद्वेषभृतः - तत्तद्भूमिकाधारिणः, प्रथितः प्रभावाः - विख्यातपराक्रमान्, प्रजाः - पुत्रान्, प्रजनयेयुः - उत्पादयेयुः इति।

**सारः** - 'हेदेवाः ! भूलोके जनिष्यतः लक्ष्मीपतेः विष्णोः सहयोगार्थं यूयं सर्वे देवकन्यकासु स्व-स्व-अंशयुतान् पराक्रमिणः पुत्रान् मर्कट-भल्लूकादिषु रूपेषु उत्पादयत" इति पितामहः देवान् आदिष्टवान्।

विग्रहः - वानर-अच्छभल्ल-गोपुच्छ-नीलमुख-वेष-भृतः - वानर-अच्छभल्ल-गोपुच्छ-नीलमुख-वेषं बिभ्रति।

प्रथितप्रभावाः - प्रथितः प्रभावः यासां ताः।

**गद्यम्**

**पुरैव किल मम जृम्भारम्भे सम्भूतवाञ्जाम्बवानिति।**

जाम्भवान् सम्भूतवान्

**व्याख्या** - पुरा - पूर्वकाले, एव किल, मम - ब्रह्मणः, जृम्भारम्भे - जृम्भण-काले, जाम्बवान् - तन्नामा भल्लूकाधिपतिः, सम्भूतवान् - उत्पन्नः, इति।

**सारः** - पूर्वमेव मम जृम्भणसमये जाम्बवन्नामा भल्लूकाधिपतिः उत्पन्नः इति।

विग्रहः - जाम्बवान् – जम्बोः वर्णं जाम्बवम्, तदस्य अस्तीति जाम्बवान्।

**गद्यम्**

**ततस्ते गीर्वाणास्तथाकुर्वन्।**

**व्याख्या** - ततः -अनन्तरं, ते गीर्वाणाः - देवाः, तथा - ब्रह्मणः कथनानुसारं, अकुर्वन् - आचरितवन्तः।

**सारः** - ब्रह्मणः कथनानुसारं देवाः वानरादिवेषेषु पुत्रान् जनयामासुः।

**गद्यम्**

**अथ वैतानाद्वैश्वानरान्नरः प्राजापत्यः सहेमपात्रः कश्चिदुत्थाय पुत्रीयते दशरथाय पायसममृतप्रायं प्रायच्छत्।**

प्रजापत्येन पायसप्रदानम्

**व्याख्या** - अथ - अनन्तरम्, वैश्वानरात् - अग्नेः, वैतानात् - पुत्रेष्टितः (यज्ञीयात्), हेमपात्रः -स्वर्णमयपात्रपाणिः, प्राजापत्यः नरः - ब्रह्मणा प्रेषितः, कश्चित् नरः कश्चन पुरुषः, उत्थाय - निर्गत्य, पुत्रीयते - पुत्रान् आत्मना इच्छते, दशरथाय - दशरथस्य कृते, अमृतप्रायं - अमृतकल्पं, पायसं - परमान्नम्, प्रायच्छत् - प्रदत्तवान्।

**सारः** - ततः यज्ञाग्नेः प्रजापतिना प्रेषितः कश्चित् पुरुषः स्वर्णमयपात्रसहितः समुत्थाय अमृतकल्पं परमान्नं पुत्रार्थिने दशरथाय प्रदत्तवान्।

विग्रहः - वैतानात् - वितानस्य अयं वैतानः, तस्मात्।

प्राजापत्यः - प्रजापतेः अयम्।

सहेमपात्रः - हेम्नःपात्रम् हेमपात्रम्, हेमपात्रेणसहितः।

**पद्यम्**

पायसविभजनम्

**कौसल्यायै प्रथममदिशद् भूपतिः पायसार्धम्**
**प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै।**
**एते देव्यौ तरलमनसः पत्युरालोच्य भावम्**
**स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम्॥ २३॥**

**अन्वयः** - भूपतिः पायसार्धं प्रथमं कौसल्यायै प्रणयमधुरम् अदिशत्, प्रणयमधुरम् अर्धं कैकयेन्द्रस्य पुत्र्यै प्रादात्। एते देव्यौ तरलमनसः पत्युः भावम् आलोच्य स्वयं स्वार्धांशाभ्यां सुमित्रां पूर्णकामाम् अकुरुताम्।

**व्याख्या -** भूपतिः - राजा दशरथः, कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या, तस्यै कौसल्यायै - स्वाग्रमहिष्यै, प्रथमम् - सर्वप्रथमम्, पायसस्य - अग्निना यागान्ते दत्तं यत् पायसं दिव्यम्, तस्यार्धम्, अर्द्धम् - अवशिष्टं, पायसस्यार्द्धं भागम्, कैकयेन्द्रस्य - केकयदेशाधिपतेः, पुत्र्यै - कैकय्यै, प्रणयेन - स्नेहेन, मधुरं - मधुगुणयुक्तं, प्रादात् - दत्तवान्। राजा दशरथः कैकेय्याः - अतिशयप्रेमास्पदत्वात् तस्यै प्रणयमधुरं प्रादात्। तदनन्तरम् एते देव्यौ - कौसल्याकैकेय्यौ, तरलम् - चञ्चलम्, मनः - चित्तम्, यस्य असौ तथाभूतस्य, मया सर्वं पायसं तु आभ्यामेव प्रदत्तम्, मम मध्यमा पत्नी सुमित्रा केन प्रकारेण पायसं प्राप्नुयात् इति मनसि विचारयतः, पत्युः - राज्ञो दशरथस्य, भावं - अभिप्रायम्, आलोच्य - तस्य मुखाकृतिमेवालोक्य अनुमीय, स्वार्धांशाभ्याम् - स्वस्वार्द्धांशाभ्याम्, स्वयम् - राज्ञः कथमनपेक्ष्यैव, सुमित्राम् - राज्ञो दशरथस्य मध्यमपत्नीं, पूर्णकामाम् - परिपूर्णमनोरथाम्, अकुरुताम्। पत्युः प्रसादनस्यैव पत्न्याः परमधर्मत्वात्। अत एव ते स्व-स्वभागस्य अर्द्धम् अर्द्धं कृत्वा एकम् एकं भागं सुमित्रायै ददतुः।

विग्रहः - पूर्णकामाम् - पूर्णः कामः यस्याः सा, ताम्।

अत्र मन्दाक्रान्ता वृत्तम्।

**सारः** - प्राप्तपायसः दशरथः आदौ राजमहिष्यै कौसल्यायै पायसार्धं दत्त्वा, ततः प्रेमास्पदायै कैकेय्यै प्रीत्या अपरमर्धं दत्तवान्। ततः सुमित्रायै पायसं न शिष्टमिति चिन्तयित्वा तस्य मनोभावं विज्ञाय कौसल्या कैकेयी च स्वयम् स्वभागाभ्याम् अर्धमर्धं सुमित्रायै दत्त्वा तस्याः मनोरथं पूरितवत्यौ।

**पद्यम्**

**अवभृथेऽवसिते सरयूतटाद् अथ यथायथमुच्चलिते जने।**
**दशरथः परिपूर्णमनोरथः पुरमगात्पुरुहूतपुरोपमाम्॥ २४॥**

**अन्वयः** - अथ अवभृथे अवसिते, जने सरयूतटात् यथायथम् उच्चलिते (सति), परिपूर्णमनोरथः दशरथः पुरुहूतपुरोपमां पुरम् अगात्।

अयोध्यां प्रति दशरथस्य प्रत्यागमनम्

**अन्वयार्थः** - अथ - पायसस्वीकरणादनन्तरम्, अवभृथे - यज्ञान्त-स्नानादिकृत्ये, अवसिते - समाप्ते सति, जने - यज्ञसमवेतजनसमाजे, सरयूतटात् - यज्ञस्थानात्सरयूतीरात्, यथायथम् -यथास्वम् स्वगन्तव्य-देशं, उच्चलिते - प्रस्थिते (सति), परिपूर्णमनोरथः - सिद्धवाञ्छितः, दशरथः पुरुहूतपुरोपमां - इन्द्रपुरीतुल्यां, पुरम् - नगरीं (अयोध्यायां) अगात् - गतः।

**सारः** - पुत्रकामेष्टौ समाप्तायाम्, यज्ञार्थमागतेषु सर्वेषु जनेषु सरयूतीरात् स्व-स्व-गृहं प्रति प्रस्थितेषु, पायसलाभेन सिद्धकामः दशरथः इन्द्रपुरी तुल्यां स्वराजधानीम् अयोध्यां गतवान्।

**पद्यम्**

**अपाटवात्केवलमङ्गकानां मनोज्ञकान्तेर्महिषीजनस्य।**
**शनैःशनैःप्रोज्झितभूषणानि चकाशिरे दौहृदलक्षणानि॥ २५॥**

**अन्वयः** - महिषीजनस्य मनोज्ञकान्तेः, अङ्गकानां केवलम् अपाटवात् प्रोज्झितभूषणानि दौहृदलक्षणानि शनैः शनैः चकाशिरे।

राजपत्निषु दौहृदलक्षणानि दृष्टानि

**अन्वयार्थः** - महिषीजनस्य - राजपत्नीनां कौसल्या - सुमित्रा - कैकेयीनाम्, मनोज्ञकान्तेः - मनोहरलावण्यस्य, अङ्गकानां - हस्ताद्यवयवानाम्, केवलम् - अत्यन्तम्, अपाटवात् - पटुत्वाभावात्, प्रोज्झितभूषणानि - त्यक्ता-

भरणानि, दौहृदलक्षणानि - गर्भचिह्नानि, शनैः शनैः - दिनक्रमेण, चकाशिरे - अराजन्त।

**सारः** - राजपत्नीनां वर्धमानलावण्यात्, हस्ताद्यवयवानां श्रान्तत्वात् त्यक्ताभरणानि गर्भचिह्नानि दिनक्रमेण व्यक्तानि बभूवुः।

विग्रहः - अपाटवात् - न पाटवम्, तस्मात्।

अङ्गकानाम् -अल्पानि अङ्गानि, अङ्ककानि तेषाम्।

वृत्तम् - उपेन्द्रवज्रा।

**पद्यम्**

कौसल्याः गर्भाधारणवर्णनम्

**मन्दमन्दमपयद्वलित्रया गाधताविषयनाभिगह्वरा।**
**कोसलेन्द्रदुहितुः शनैरभूत्मध्ययष्टिरपि दृष्टिगोचरा॥ २६॥**

**अन्वयः** - कोसलेन्द्रदुहितुः वलित्रया मन्दमन्दम् अपयत्, गाधताविषय-नाभिगह्वरा मध्ययष्टिः अपि शनैः दृष्टिगोचरा अभूत्।

**अन्वयार्थः** - कोसलानाम् इन्द्रस्य - कोसलदेशाधिपतेः, दुहितुः - पुत्र्याः कौसल्यायाः, मन्दमन्दम् - मन्दप्रकारम् अपयत् - अपागच्छत्, वलीनां - मध्यरेखाणां, त्रयं यस्याः सा तथाभूता, किञ्च गाधतायाः - उत्तानत्वस्य, विषयम् - गोचरम्, नाभेः गह्वरम् - कुहरं, यस्याः सा तथाभूता, गाधताविषयनाभिगह्वरा - उत्तानत्वं लभमाननाभिकुहरवती, मध्ययष्टिरपि - मध्यमभागोऽपि, कटिप्रदेशोऽपीत्यर्थः, शनैः - मन्दगत्या, दृष्टिगोचरा - चक्षुविषयतां गताऽभूत् - अभवत्।

**सारः** - वर्धमानेन गर्भेण कौसल्यायाः उदरे विद्यमानं महाभाग्यसूचकं वलित्रयम् अपगतम्, तस्याः नाभिरूपं कुहरम् उत्तानत्वं प्राप्तम्, तस्याः तन्तुसदृशः मध्यभागः शनैः चक्षुर्विषयः अभूत्।

विग्रहः - कोसलेन्द्रदुहितुः - कोसलानाम् इन्द्रः कोसलेन्द्रः, तस्य दुहिता कोसलेन्द्रदुहिता, तस्याः कोसलेन्द्रदुहितुः।

मन्दमन्दमपयद्वलित्रया - मन्दमन्दम् अपयत् वलीनां त्रयं यस्याः सा मन्दमन्दमपयद्वलित्रया।

गाधताविषय नाभिगह्वरा - गाधतायाः विषयो नाभेः गह्वरं यस्याः सा गाधताविषयनाभिगह्वरा।

अत्र रथोद्धता वृत्तम्।

**पद्यम्**

**न्यग्रोधपत्रसमतां क्रमशः प्रयातामङ्गीचकार पुनरप्युदरं कृशाङ्ग्याः।**
**जीवातवे दशमुखोरगपीडितानां गर्भच्छलेन वसता प्रथमेन पुंसा॥ २७॥**

कौसल्यायाः उदरं वटपत्रसदृश्यमेव।

**अन्वयः** - दशमुखोरगपीडितानां जीवातवे गर्भच्छलेन वसता प्रथमेन पुंसा कृशाङ्ग्याः उदरं क्रमशः प्रयातां न्यग्रोधपत्रसमतां पुनरपि अङ्गीचकार।

**अन्वयार्थः** - दशमुखोरगपीडितानां - रावणरूपेण महासर्पेण पीडितानां, जीवातवे - जीवनौषधार्थम्, गर्भच्छलेन - गर्भरूपेण, वसता - वासं कुर्वता, प्रथमेन पुंसा - आदिपुरुषेण विष्णुना, कृशाङ्ग्याः - तन्वङ्ग्याः कौसल्यायाः, उदरं - कुक्षिः, क्रमशः प्रयातां - दिनक्रमेण शनैः अपगताम्, न्यग्रोधपत्रसमतां - वटपत्रसादृश्यम्, पुनरपि - भूयोऽपि, अङ्गीचकार - प्राप्नोत्।

**सारः** - पूर्वं कौसल्यायाः उदरं वटपत्रसदृशं कृशमासीत्। गर्भवृद्ध्या क्रमेण तत्तुल्यत्वम् अपगतम्। तथाऽपि रावणरूपमहोरगपीडितानां जीवनौषधाय गर्भरूपेण तिष्ठता आदिपुरुषेण विष्णुना तस्याः उदरं पुनरपि वटपत्रसादृश्य-मेव जातम्।

विग्रहः - दशमुखोरगपीडितानाम् - दशमुखः एव उरगः पीडिताः,तेषाम्।

कृशाङ्ग्याः - कृशानि अङ्गानि यस्याः सा कृशाङ्गी, तस्याः।

अलङ्कारः - उत्प्रेक्षा, रूपकम्, अत्र वसन्ततिलकावृत्तम्।

**पद्यम्**

**मध्यं तनुत्वादविभाव्यमानम् आकाशमासीदसितायताक्ष्याः।**
**गर्भोदये विष्णुपदापदेशात् कार्श्यं विहायापि विहाय एव॥ २८॥**

**अन्वयः-** असितायताक्ष्याः (पूर्वम् ) मध्यं तनुत्वात् अविभाव्यमानम् आकाशम् आसीत्, गर्भोदये (काले) विष्णुपदापदेशात् कार्श्यं विहाय अपि विहाय एव अभूत्।

कार्श्यभावेऽपि आकाशत्वम्।

**अन्वयार्थः** - असिते - कृष्णवर्णे, आयते - विस्तृते, अक्षिणी यस्याः सा तस्याः असितायताक्ष्याः - कौसल्यायाः, पूर्वं मध्यम् - मध्यमभागः, तनुत्वात् - अत्यन्तकृशत्वात्, अविभाव्यमानम् - अज्ञायमानम्, अदृश्यमानमिति यावत्, आकाशमासीत् - आकाशस्य दृष्टेरविषयत्वात्, तत्सदृशं - चक्षुषोरविषयभूतमासीदित्यर्थः। किन्तु गर्भोदये - गर्भोत्पत्तिः सञ्जाते सति, कार्श्यं - आकाशभावनिमित्तं सौक्ष्म्यम्, विहायापि - परित्यज्यापि, विष्णोः - सर्वव्यापकस्य परमात्मनः, गर्भरूपेण विद्यमानस्य, पदम् - स्थानं, तस्य अपदेशात् - व्याजात्, विहाय एव - आकाश एव अभूत्।

**सारः** - कौसल्यायाः मध्यमभागः पूर्वम् अत्यन्तं कृशः, तेन हेतुना अदृश्यप्रायः आकाशकल्पः आसीत्। गर्भोत्पत्तौ सत्यां तु कार्श्ये विगते अपि, विष्णोः निवासस्थानत्वात् 'विष्णुपदम्' इति विख्यातम्, नामसाम्येन आकाशतुल्यमेव आसीत्।

विग्रहः - कार्श्यम् - कृशस्य भावः।

विष्णुपदापदेशात् - विष्णुपदस्य अपदेशः विष्णुपदापदेशः, तस्मात्।

अत्र श्लोकस्य पूर्वोत्तरभागयोः अतिशयोक्तेर्विद्यमानत्वात् तयोः सङ्करः।

अत्र रथोद्धता वृत्तम्।

**पद्यम्**

**उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ**
**लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि।**
**निर्दग्धुं निखिलाः पलाशसमिधौ मेध्यादयोध्यारणेः**
**आविर्भूतमभूतपूर्वमपरं यत्किञ्चिदेकं महः॥ २९॥**

रामजननकालः

**अन्वयः** - ग्रहपञ्चके उच्चस्थे सेन्दौ सुरगुरौ नवम्यां तिथौ, पुनर्वसुयुते कर्कटके लग्ने, पूषणि मेषं गते, निखिलाः पलाशसमिधः निर्दग्धुं मेध्यात् अयोध्यारणेः अभूतपूर्वम् अपरं यत्किञ्चित् एकं महः आविर्भूतम्।

**अन्वयार्थः** - ग्रहाणां पञ्चके - सूर्य -भौम-बृहस्पति-शुक्र-शनिनामकानां पञ्चानां ग्रहाणां समूहे, उच्चस्थे मेषादिषु अतुङ्गस्थानस्थिते, सेन्दौ - चन्द्रमसा सहिते, सुरगुरौ - बृहस्पतौ, समानस्थानस्थिते सति, नवम्याम् - नवसंख्याके, तिथौ - दिने, पुनर्वसुयुते - पुनर्वसुनक्षत्रसहिते, कर्कटके - कर्कटनामके, लग्ने - राशीनामुदये काले, पूषणि - सूर्ये, मेषं गते - मेषमासं प्राप्ते, निखिलाः - सम्पूर्णाः, पलाशसमिधः - पलानि - मांसानि, अश्नन्ति ये ते पलाशाः - राक्षसाः, एव समिधः - काष्ठानि, निर्दग्धुम् - भस्मसात्कर्तुम्, मेध्यात् पवित्रात्, अयोध्या एव अरणिः - अग्निमन्थनदारुः, तस्मात्, अभूतपूर्वम् - पूर्वोत्पन्नसकलविलक्षणम्, अपरम् - अद्वितीयम्, यत्किञ्चित् - अनिर्वचनीयम्, एकं, महः - तेजः, आविर्भूतम् - प्रकटीबभूव।

**सारः** - सूर्यादिषु पञ्चसु ग्रहेषु स्वतुङ्गस्थानेषु सत्सु, बृहस्पतौ चन्द्रेण युक्ते, नवम्यां, कर्कटकलग्ने, पुनर्वसुनक्षत्रयुक्ते दिने, सूर्ये मेषराशिं गते सति, सर्वाणि राक्षसरूपाणि एधांसि भस्मीकर्तुं पवित्रात् अयोध्यारूपाद् अरणेः पूर्वमदृष्टम्, अद्वितीयम्, एकम् अनिर्वचनीयं तेजः स्वयम् प्रकटीबभूव।

विग्रहः - पलाशसमिधः - पलाशाःएव समिधः।

अयोध्यारणेः - अयोध्या एव अरणिः, तस्मात्।

अत्र रूपकालङ्कारः, शार्दूलविक्रीडितं वृत्तम्।

**पद्यम्**

**अथ रामाभिधानेन कवेः सुरभयन् गिरः।**
**अलञ्चकार कारुण्याद्रघूणामन्वयं हरिः ॥ ३० ॥**

**अन्वयः -** अथ हरिः कारुण्यात् रामाभिधानेन कवेः गिरः सुरभयन् रघूणामन्वयम् अलञ्चकार।

रामनाम्ना रघुवंशं भूषयामासा

**अन्वयार्थः -** अथ - अतीव मनोहारकालसमागमानन्तरम्, हरिः - भगवान् विष्णुः, कारुण्यात् - स्वाश्रितजनकारुण्यपरवशात्, रामस्य - श्रीरामचन्द्रस्य, अभिधानेन - नाम्ना, कवेः - श्रीमद्रामायणप्रणेतुः महर्षेः वाल्मीकेः, गिरः - वचांसि, सुरभयन् - मनोज्ञतां प्रापयन्, रघूणाम् - रघुवंशीयानां राज्ञाम्, अन्वयम् - वंशम्, अलञ्चकार - समलङ्कृतवान्, स्वावतारेणेति भावः।

**सारः** - स्वाश्रितजनकारुण्यपरवशः हरिः श्रीरामरूपेण रघुवंशे अवतीर्य वाल्मीकेः वचनानि स्वनानम्ना समलङ्कृतवान्।

विग्रहः - रामाभिधानेन - रामः इति अभिधानम्, तेन।

अत्रानुष्टुप्वृत्तम्।

**पद्यम्**

**तमेनमन्वजायन्त त्रयस्त्रेताग्नितेजसः।**
**अग्रजस्यानुकुर्वन्तस्तैस्तैर्लोकोत्तरैर्गुणैः॥ ३१॥**

**अन्वयः** - तमेनमनु तैः तैः लोकोत्तरैः गुणैः अग्रजस्य अनुकुर्वन्तः त्रेताग्निः तेजसः त्रयः अजायन्त।

रामानन्तरं त्रयः कुमाराः अजायन्त

**अन्वयार्थः** - तम् - तच्छब्द अत्र प्रख्यातार्थकः, एनम् भगवन्तं श्रीरामचन्द्रम्, अनु - पश्चात्, तैः, तैः - सौशील्यवात्सल्यादिकैः वर्णयितुमशक्यैः, लोकोत्तरैः - अलौकिकैः दिव्यैरिति यावत्, गुणैः - सर्वलोकोपकारकैः सौशील्य वात्सल्यादिकैः, अग्रजस्य - स्वज्येष्ठभ्रातुः श्रीरामचन्द्रस्य, अनुकुर्वन्तः - अनुकरणं कुर्वन्तः, त्रेताग्नितेजसः - आहवनीय-गार्हपत्य-दक्षिणनाम्नामग्नीनां समुदितं नाम त्रेताग्निरिति, तस्य तेज इव तेजो येषां ते त्रेताग्नितेजसः, त्रयः भरत लक्ष्मण-शत्रुघ्नाः, अजायन्त - उत्पन्ना - अभूवन्।

**सारः** - सद्गुणबाहुल्येन अग्रजसदृशाः अग्निवत् वर्चस्विनः त्रयः कुमाराः तस्य श्रीरामस्य पश्चात् जाताः।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**भरतस्तेषु कैकेय्यास्तनयो विनयोज्ज्वलः।**
**अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ॥ ३२॥**

कैकेयिपुत्रः भरतः सुमित्रापुत्रौ लक्ष्मणशत्रुघ्नौ जातौ

**अन्वयः** - तेषु विनयोज्ज्वलः भरतः कैकेय्याः तनयः, अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ।

**अन्वयार्थः** - तेषु - त्रिषु कुमारेषु, विनयोज्ज्वलः - विनयसम्पन्नः, भरतः - भरतनामा, कैकेय्याः - केकयाधिपतिकन्याया दशरथमध्यमपत्न्याः, तनयः - पुत्रः जायतेति, अन्यौ - भरतादपरौ, लक्ष्मणशत्रुघ्नौ, सुमित्रायां - दशरथकनिष्ठभार्यायां, कृतोदयौ - समुत्पन्नौ।

**सारः** - रामस्यानन्तरं जातेषु त्रिषु कुमारेषु कैकेय्याः पुत्रः भरतनाम्ना विनयसम्पन्नः आसीत्। सुमित्रायां लक्ष्मणः, शत्रुघ्नश्चेति नामनी यमलौ आस्ताम्।

विग्रहः - विनयोज्ज्वलः - विनयेन उज्ज्वलः।

लक्ष्मणशत्रुघ्नौ- लक्ष्मणश्च शत्रुघ्नश्च।

कृतोदयौ - कृतः उदयः याभ्यां तौ।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**एते ववृधिरे वीरा ब्रह्मक्षेमाय दीक्षिताः।**
**लोकानन्दमुकुन्दस्य चत्वार इव बाहवः॥ ३३॥**

**अन्वयः** - एते वीराः ब्रह्मक्षेमाय दीक्षिताः लोकानन्दमुकुन्दस्य चत्वारः बाहवः इव ववृधिरे।

चत्वारः कुमाराः लोकहितकराय प्रवृद्धाः

**अन्वयार्थः** - एते वीराः -पूर्वोक्तशूराः रामादयः चत्वारः, ब्रह्मक्षेमाय - ब्राह्मणानां परिपालनाय, दीक्षिताः - कृतसङ्कल्पाः, लोकानन्दमुकुन्दस्य - जगदानन्दकरस्य विष्णोः, चत्वारः बाहवः - चत्वारो भुजाः, इव, ववृधिरे - प्रवृद्धाः।

**सारः** - रामादयः चत्वारः शूराः कुमाराः बाल्यादेव वेदानां, ब्राह्मणानां, परिपालनाय कृतसङ्कल्पाः, जगदः आनन्ददायकस्य विष्णोः चत्वारः भुजाः

इव प्रवृद्धाः।

अत्रानुष्टुब्वृत्तम्, उपमालङ्कारः च।

## Summarised Overview

दशरथस्य पुत्रकामेष्ठौ हविराहरणाय धरण्यां कृतावतारणः देवाः वैकुण्ठं गत्वा तत्र भगवन्तं विष्णुं दृष्ट्वा तत्र रावणकृतां पीडां निवेदितवन्तः। तत् श्रुत्वा नारायणः दशरथस्य पुत्रीयतः मनोरथं पूरयितुं अहमेव आदृतमनुषवेषः सन् रावणं हनिष्यामि इति प्रतिश्रुतवान्। ततः प्रत्यागताः देवाः ब्रह्माश्च तान् वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः प्रजनयेयुः इति आदिष्टवान्। ततश्च दशरथस्य यज्ञे प्रजापतिना प्रेषितः कश्चित् नरः प्राप्य दशरथाय पायसं दत्तवान्। सः दशरथः पत्निषु पायसं विभक्तवान्। पुत्रकामेष्ठियागः समाप्तः। दीक्षितस्नानं कृत्वा सः स्वनगरीं अयोध्यां प्रत्यागच्छति। अनन्तरं दशरथपत्निषु तिसृषु मन्दं मन्दं गर्भचिह्नानि दृष्टानि।कौसल्यायाः उदरे वलित्रयं आसीत्। किञ्च तस्याः कटिभागः पूर्वं अदृष्टम्। गर्भोदयात् पूर्वं परञ्च कौसल्यायाः उदरं वटपत्रतुल्यमेव जातम्। गर्भोत्पत्तेः अनन्तरमपि विष्णुपदत्वात् मध्यभागस्य कार्श्यभावेऽपि आकाशत्वं आसीत्। नवम्यां, कर्कटलग्ने, पुनर्वसुतिथौ पूषणि मेषं गते श्रीरामः आविर्भूतः। रामनाम्ना रघुवंशं वाल्मीकिवचनानि च हरिः भूषयामास। श्रीरामस्य पश्चात् त्रयः त्रेताग्नितेजसः तेषां तेजः इव त्रयः राजकुमाराः जाताः। कैकेय्याः पुत्रः भरतः, सुमित्रायाः पुत्रौ लक्ष्मणशत्रुघ्नौ च। एते चत्वारः अपि राजकुमाराः वृद्धिं गताः, ते लोकहितकराः प्रवृद्धाः।

## Assignments

1. रामजन्मवृत्तान्तं विशदयत।
2. कौसल्यायाः गर्भाधारणं वर्णयत।

3. दशरथस्य पायसविभागं विवृणुत।
4. श्रीरामस्य जननकालं प्रतिपादयत।
5. इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः।
   वाचमूचे सुधाधारां मधुरां मधुसूदनः॥ - ससन्दर्भं व्याख्यात।
6. अथ रामाभिधानेन कवेः सुरभयन् गिरः।
   अलञ्चकार कारुण्याद्रघूणामन्वयं हरिः॥ - ससन्दर्भं व्याख्यात।
7. तमेनमन्वजायन्त त्रयस्त्रेताग्नितेजसः।
   अग्रजस्यानुकुर्वन्तस्तैस्तैर्लोकोत्तरैर्गुणैः॥ - ससन्दर्भं व्याख्यात।

## Suggested Readings


1. Ramayanacampu of Bhoja, with Ramacnadra's commentary, Nirnayasagar Press Mumbai.
2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnayasagar Press Mumbay. 1933


## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnayasagar Press, Bombay, 1898


SGOU

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# विश्वामित्रागमनं वनयात्रा च

## Learning Outcomes

- चम्पूकाव्यानां वैशिष्ट्यम् अवगच्छति।
- इतिहासकाव्यानां मूल्यानाम् अवबोधनम्।
- विश्वामित्रागमनं वनयात्रा इत्यादिविषयाणां ज्ञानसम्पादनम्।

## Background

भोजप्रणीतस्य चम्पूरामायणस्य बालकाण्डे ब्रह्माणं पुरस्कृत्य देवाः वैकुण्ठं गत्वा रावणपराक्रमम् अधिकृत्य भगवन्तं नारायणं निवेदितवन्तः। देवानां निवेदनं श्रुत्वा मधुसूदनः दशरथस्य मनोरथं पूरयितुं अहमेव आदृतमानुषवेषः सन् रावणं हनिष्यामि इति प्रतिश्रुतवान्। ब्रह्मणः आदेशानुगुणं देवाः विष्णोः साहाय्यार्थं वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः जनयन्ति। दशरथस्य यज्ञे प्रजापतिना प्रेषितः कश्चित् नरः प्राप्य तस्मै पायसं दत्तवान्। ततश्च दशरथः तिसृषु पत्निषु पायसं विभक्तवान्। दशरथः स्वनगरीं प्रत्यागच्छति। राजपत्निषु गर्भचिह्नानि दृष्टानि। गर्भिण्या कौसल्यायाः वर्णनं, रामजननं, रामनाम्ना रघुवंशं वाल्मीकिवचनानि च भूषयामास हरिः, रामानन्तरं भरतलक्ष्मणशत्रुघ्नाः इति त्रयाणां राजकुमाराणां जननम् इत्यादिविषयाः अतिमधुरतया भोजेन वर्णिताः। इदानीम्



SGOU

आयोध्यानगर्यां विश्वामित्रस्यागमनं, किमर्थं विश्वामित्रः अयोध्यानगरीं आगतवान्? तस्य वनयात्रायाः वर्णनम् इत्यादिकम् अस्मिन् एकके पश्यामः।

## Keywords

त्रिशङ्कुयाजिनम्, सत्रपरित्राणार्थम्, सशल्यान्तःकरणः, निर्यातुधानां, पुरोहितेन, कुशिकसुतमनोरथम्, कौशिकमन्वगात्, नयन्नयमवोचत, बलेत्यतिबलेति, काकुत्स्थ, अङ्गदेशः, मलदकरूषः।

## Discussion

गद्यम्।

विश्वामित्रस्यागमनम्

**अथ कदाचिदपरिमेयमायाभयानकयुद्धसमुद्धतदैत्यबलावस्कन्दकान्दिशीकवृन्दारकानीकपरिवार्यमाणरथः पङ्क्तिरथस्तपश्चर्याजातानामाश्चर्याणामायतनं त्रिशङ्कुयाजिनं भगवन्तं पद्यप्रबन्धमिव दर्शितसर्गभेदं प्राकृतव्याकरणमिव प्रकटितवर्णव्यत्यासं बुधमिव सोमसुतं कुशिकसुतमद्राक्षीत्।**

**व्याख्या** - अथ - अनन्तरम्, कदाचित् - कस्मिंश्चिदिवसे, अपरिमेयः - अपरिमिताः, याः मायाः शाम्बरीविद्याः, विचित्रकपटवृत्तयः, ताभिः भयानकानि - भयङ्कराणि, युद्धसमुद्धतानि - युद्धोद्धतानि, च यानि दैत्यबलानि - दैत्यानां सैन्यानि, तेषाम् अवस्कन्दात् - आक्रमणात्, कान्दिशीकैः - पलायितैः, वृन्दारकाणाम् - देवानाम्, अनीकैः - सैन्यैः, परिवार्यमाणः निरीक्ष्य परिवेष्ट्यमाणः, रथो यस्य तथोक्तः, देवानामपि

संरक्षक इत्यर्थः। मायया दानवगणान् युद्धे पराजयप्राप्त्यर्थं प्रेरितान् असुरान् निवारयितुं योग्याः। पङ्क्तिरथः - दशरथः, तपश्चर्याजातानाम् - वसिष्ठस्पर्धया ब्रह्मर्षित्वसम्पादनार्थं विरचितव्रतोपवासादितपोऽनुष्ठानाज्जनितानाम्, आश्चर्याणाम् - अद्भुतानाम्, आयतनम् - आस्पदम्, त्रिशङ्कोः - हरिश्चन्द्रपितुः, याजिनम् - सन्देहस्वर्गगमनार्थं यज्ञकर्तारम्, पद्यप्रबन्धमिव - श्लोकनिबद्धकाव्यमिव, दर्शितः - प्रकटितः, सर्गेभेदः - कथाविच्छेदरूपः सृष्ट्यन्तरं,च येन तथाविधस्तं प्राकृतव्याकरणमिव, प्रकटितः - प्रकाशितः, वर्णव्यत्यासः - अक्षरव्यत्ययः, क्षत्रियत्वपरित्यागेन - ब्राह्मणवर्णस्वीकार-रूपो व्यत्यासश्च येन तथाभूतं तम्, बुधमिव - सौम्यमिव, सोमसुतम् - चन्द्रपुत्रं सोमयाजिनं च, भगवन्तम् - महदैश्वर्यसम्पन्नम्, पूज्यं च, कुशिकसुतम् - विश्वामित्रम्, अद्राक्षीत् - अवलोकयामास।

विग्रहः - सोमसुतम् - सोमस्य सुतः।

त्रिशङ्कुयाजिनम् - त्रिशङ्कुं याजयति इति, तम्।

दर्शितसर्गभेदम् - सर्गस्य भेदः सर्गभेदः, दर्शितः सर्गभेदः येन सः।

प्रकटितवर्णव्यत्यासः - वर्णस्य व्यत्यासः वर्णव्यत्यासः, प्रकटितः वर्णव्यत्यासः येन सः।

अत्र श्लेषालङ्कारः।

**गद्यम्**

**तदनु यथाविधि कृतसपर्येण मर्यादातीतमहिम्ना महितेन गाधेतरहृदयेन गाधिनन्दनेन सत्रपरित्राणार्थमित्थमभ्यर्थितोऽभूत्।**

**व्याख्या** - तदनु विश्वामित्रदशरथयोः दर्शनानन्तरं, यथाविधि - विधिम् अनतिक्रम्य (शास्त्रोक्तविधिना) कृतसपर्येण - पूजितेन, मर्यादातीत-महिम्ना - अपरिमितमाहात्म्येन, महितेन - पूज्येन, गाधेतरहृदयेन -

गम्भीरचेतसा, गाधिनन्दनेन - विश्वामित्रेण, सत्रपरित्राणार्थम् - यज्ञरक्षणाय, इत्थम् - वक्ष्यमाणप्रकारेण, अभ्यर्थितः अभूत्।

**सारः -** राज्ञा दशरथेन शास्त्रोक्तविधिना विश्वामित्रस्य पाद्यार्घ्यादिभिः सत्कारः कृतः। अनन्तमाहात्म्यशाली सर्वंपूजितो विश्वामित्रः स्वयज्ञरक्षणार्थं राजानं दक्षरथं वक्ष्यमाणप्रकारेणाभ्यर्थितवान्।

विग्रहः - यथाविधि - विधिम् अनतिक्रम्य।

गाधेतरहृदयेन - गाधेतरं हृदयं यस्य सः गाधेतरहृदयः, तेन।

कृतसपर्येण - कृता सपर्या यस्य सः कृतसपर्यः, तेन।

सत्रपरित्राणार्थम् - सत्रस्य परित्राणम्, तस्मै।

**गद्यम्**

विश्वामित्रस्य प्रार्थना।

**राजन् भवतस्तनयेन विनयाभिरामेण रामेण शरासनमित्रेण सौमित्रिमात्रपरिजनेन क्रियमाणक्रतुरक्षो रक्षोदुरितमुत्तीर्य कृतावभृथो भवितुमभिलषामीति।**

**व्याख्या** - राजन् - हे नृप, विनयाभिरामेण - विनयशीलेन, शरासनमित्रेण - शरासनं धनुरेव मित्रं सुहृद् यस्य तेन, धनुर्मात्रसहायेन, सौमित्रिमात्रपरिजनेन - सौमित्रमात्रं लक्ष्मण एव परिजनो यस्य तेन, भवतः - दशरथस्य, तनयेन - पुत्रेण, रामेण, क्रियमाणः - विधीयमानः, क्रतुरक्षः - यज्ञरक्षणं, रक्षोदुरितं - सुबाहुमारीचादिराक्षसैः कृतं विघ्नं, उत्तीर्य - तीर्त्वा, कृतावभृथः - कृतयज्ञावसानस्नानः, भवितुम् अभिलषामि - इच्छामि इति।

**सारः -** हे राजन्, विनयशीलेन, चापधारिणा, लक्ष्मणसहायेन भवतः पुत्रेण रामेण संरक्ष्यमाणयज्ञः सन् अहं राक्षसरूपं विघ्नम् अतीत्य यज्ञावसानस्नानं कर्तुम् इच्छामि।

विग्रहः - विनयाभिरामेण - विनयेन अभिरामः, विनयाभिरामः, तेन।

क्रियमाणक्रतुरक्षः- क्रियमाणा क्रतुरक्षा यस्य सः।

**पद्यम्**

**एतदाकर्ण्य कर्णपरुषं महर्षिभाषितमतिमात्रपुत्रवात्सल्यात् कौसल्या-जानिः सशल्यान्तःकरणोऽभूत्।**

दशरथः खिन्नहृदयः अभूत्

**व्याख्या** - कर्णपरुषम् - कर्णोद्वेजकम्, एतत् - पूर्वोक्तं रामप्रेषणपरं, महर्षिभाषितम् - विश्वामित्रवधम्, आकर्ण्य - श्रुत्वा, अतिमात्रपुत्र-वात्सल्यात् - अतिशयितसुतस्नेहाद्धेतोः, कौसल्याजानिः- कौसल्या जाया यस्य स कौसल्याजानिः, दशरथः सशल्यान्तःकरणः - खिन्नहृदयः अभूत्। अन्तःस्थितेन शल्येनेव तद्वचसा दशरथहृदयं व्यथितमभूत्।

**सारः** - 'पुत्रं रामं राक्षसनाशाय प्रेषय' इत्येवं रूपं कर्णकठोरम् ऋषिवचनं श्रुत्वा अतिशयितपुत्रस्नेहेन दशरथः खिन्नहृदयः अभवत्।

विग्रहः - कौसल्याजानिः - कौसल्या जाया यस्य सः।

**गद्यम्**

**ततस्तस्मिन् बहुप्रकारैरवार्यनिश्चये भगवति विश्वामित्रे दशरथस्तपनकुलहितेन पुरोहितेनैवमभिहितोऽभूत्।। (३३)**

**अन्वयः** - ततः बहुप्रकारैः अवार्यनिश्चये अशक्यः भगवति तस्मिन् विश्वामित्रे दशरथः तपनकुलहितेन पुरोहितेन एवम् अभिहितः अभूत्।

**अन्वयार्थः** - ततः - तदनन्तरम्, बहुप्रकारैः - नानाविधैः, अवार्यनिश्चये - निवारयितुम् अशक्यः, भगवति - पूज्ये, तस्मिन् विश्वामित्रे दशरथः,

तपनकुलहितेन - सूर्यवंशस्य हितकारिणा, पुरोहितेन - वसिष्ठेन, एवम् - वक्ष्यमाणप्रकारेण, अभिहितः अभूत् - उक्तः अभूत्।

**सारः** - नानाविधैः समाधानान्तरैरपि विश्वामित्रे स्वनिर्धाराद् अविचाल्ये सति, राजा दशरथः सूर्यवंशस्य हितकारिणा कुलगुरुणा इत्थम् उक्तः।

विग्रहः - अवार्यनिश्चये - अवार्यः निश्चयः यस्य सः, तस्मिन्।

**पद्यम्**

**पर्याप्तभाग्याय भवानमुष्मै कुर्यात्सपर्यां कुशिकात्मजाय।**
**निर्यातुधानां वसुधां विधातुं निर्यातु रामः सह लक्ष्मणेन॥ ३४॥**

वसिष्ठस्य आश्वासवचनम्

**अन्वयः** - भवान् अमुष्मै पर्याप्तभाग्याय कुशिकात्मजाय सपर्यां कुर्यात्। वसुधां निर्यातुधानां विधातुं रामः लक्ष्मणेन सह निर्यातु।

**अन्वयार्थः** - भवान् - राजा दशरथः, अमुष्मै - अस्मै, पर्याप्तभाग्याय - पर्याप्तं प्रचुरं भाग्यं ब्रह्मवचसरूपं भागधेयं यस्य तस्मै, तादृशस्य महात्मनोऽनादरः न युक्तः इति भावः। कुशिकात्मजाय - विश्वामित्राय, सपर्यां - पूजाम्, कुर्यात् - विद्यात्। वसुधां - पृथ्वीम्, निर्यातुधानां - राक्षसशून्यां, विधातुं -कर्तुं, रामः लक्ष्मणेन सह, निर्यातु - निर्गच्छतु।

**सारः** - वसिष्ठः दशरथम् आह – ‘भो राजन्! परिपूर्णभागधेयाय पूज्याय विश्वामित्राय भवान् पूजां कुर्यात्। पृथ्वीं राक्षसशून्यां कर्तुं रामः लक्ष्मणेन सह निर्गच्छतु।’

विग्रहः - पर्याप्तभाग्याय - पर्याप्तं भाग्यं यस्य सः, तस्मै।

अत्र अनुप्रासालङ्कारः इन्द्रवज्रावृत्तं च।

**गद्यम्**

**एवं वसिष्ठेन प्रतिष्ठापितधृतिर्दशरथः सुतप्रदानेन कुशिकसुतमनोरथमेव पूरयामास।**

**व्याख्या** - एवं - प्रोक्तप्रकारेण, वसिष्ठेन - कुलगुरुणा, प्रतिष्ठापिता - संस्थापिता, धृतिः - धैर्यः, दशरथः , सुतप्रदानेन - सलक्ष्मणस्य रामस्य समर्पणेन, कुशिकसुतमनोरथम् -विश्वामित्रस्य अभीष्टं, एव पूरयामास - अपूरयत्।

विश्वामित्रस्य मनोरथं पूरयामास

**सारः** - कुलगुरुणा वसिष्ठेन आश्वासितः दशरथः श्रीरामप्रेषणेन विश्वामित्रस्य अभीष्टमेव अपूरयत्।

विग्रहः - प्रतिष्ठापितधृतिः - प्रतिष्ठापिता धृतिः यस्य सः।

सुतप्रदानेन - सुतस्य प्रदानं सुतप्रदानं, तेन।

**पद्यम्**

**योगेन लभ्यो यः पुंसां संसारापेतचेतसाम्।**
**नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात्॥ ३५॥**

**अन्वयः** - यः रामः संसारापेतचेतसां पुंसां योगेन लभ्यः सः अयं पितुः नियोगेन कौशिकम् अन्वगात्।

रामः विश्वामित्रं अनुगतवान्

**अन्वयार्थः** - यः रामः संसारापेतचेतसां - विरक्तां, पुंसां - पुरुषाणां, योगेन - चित्तवृत्तिनिरोधरूपेण, लभ्यः - गम्यः, सः अयं - रामः, पितुः - तातस्य, नियोगेन - आज्ञया, कौशिकम् - विश्वामित्रम्, अन्वगात् - अन्वगच्छत्।

**सारः** - यः विरक्तजनैः चित्तवृत्तिनिरोधेन, ध्यानेन, महता तपसा वा प्राप्तुं शक्यः, तादृशः रामः तातस्य आज्ञया (स्वयं) विश्वामित्रम् अनुगतवान्।

विग्रहः - संसारापेतचेतसाम् - संसारापेतं चेतः येषां ते, तेषाम्।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**तत्र सत्रं परित्रातुं विश्वामित्रो महामुनिः।**
**सौमित्रिसहितं रामं नयन्नयमवोचत॥ ३६॥**

**अन्वयः** - तत्र अयं महामुनिः विश्वामित्रः सत्रं परित्रातुं सौमित्रिसहितं रामं नयन् अवोचत।

**अन्वयार्थः** - तत्र - तस्मिन् समये, अयं महामुनिः विश्वामित्रः, सत्रं - यज्ञं परित्रातुं - रक्षितुं, सौमित्रिसहितं - सलक्ष्मणं रामम्, नयन् - गमयन्, अवोचत - उक्तवान्।

**सारः** - विश्वामित्रः यज्ञरक्षणार्थं रामलक्ष्मणौ गमयन् एवम् उक्तवान्।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**बलेन तपसां लब्धे बलेत्यतिबलेति च।**
**विद्येते मयि काकुत्स्थ विद्येते वितरामि ते॥ ३७॥**

**अन्वयः** - हे काकुत्स्थ, तपसां बलेन लब्धे बला इति अतिबला इति च विद्ये मयि विद्येते। ते वितरामि।

बल-अतिबला
विद्ये उपदिशति

**अन्वयार्थः** - हे काकुत्स्थ! - हे राम, तपसां बलेन - महिम्ना लब्धे - प्राप्ते, बला इति अतिबला इति च विद्ये - मन्त्रात्मिके, मयि - विश्वामित्रे, विद्येते - वर्तते। ते - तुभ्यं, ते - विद्ये, वितरामि - उपदिशामि।

**सारः** - हे राम! महिम्ना प्राप्तं बला-अतिबला-नामकं मन्त्रद्वयं मम सकाशे वर्तते। तौ मन्त्रौ तुभ्यम् उपदिशामि।

**विग्रहः** - काकुत्स्थ - ककुत्स्थस्य गोत्रापत्यं पुमान् काकुत्स्थः तत्संबोधने।

अत्रानुष्टुब्वृत्तम्।

**गद्यम्**

**ततो गृहीतविद्यस्य दाशरथेः प्रदेशमेकं प्रदर्श्य भगवानित्थमकथयत्।**

**व्याख्या** - ततः - तदनन्तरम्, गृहीतविद्यस्य-गृहीते - प्राप्ते, विद्ये - बलातिबलाख्ये येन तस्य दाशरथेः - रामस्य एकं प्रदेशं - भूविभागं, प्रदर्श्यं - अङ्गुल्या निर्दिश्य भगवान् - विश्वामित्रः इत्थं - वक्ष्यमाणप्रकारेण अकथयत् - कथितवान्।

**सारः** - रामाय मन्त्रोपदेशानन्तरं पूज्यः विश्वामित्रः मार्गे किञ्चित् स्थलं अङ्गुल्या निर्दिश्य एवम् कथितवान्।

विग्रहः - दाशरथेः - दशरथस्य अपत्यं पुमान् दाशरथिः , तस्य।

**पद्यम्**

**अस्मिन् पुरा पुरभिदः परमेश्वरस्य भालान्तरालनयनज्वलने मनोभूः।**
**सद्यः प्रपद्य शलभत्वममुञ्चदङ्गं तस्मादमुं जनपदं विदुरङ्गसंज्ञम्॥ ३८॥**

अङ्गदेशस्य वर्णनम्

**अन्वयः** - अस्मिन् पुरा पुरभिदः परमेश्वरस्य भालान्तरालनयनज्वलने मनोभूः सद्यः शलभत्वं प्रपद्य अङ्गम् अमुञ्चत्।तस्मात् अमुं जनपदम् अङ्गसंज्ञं विदुः।

**अन्वयार्थः** - अस्मिन् - अत्र प्रदेशे, पुरा - प्राचीनकाले, पुरभिदः - त्रिपुरान्तकारिणः, परमेश्वरस्य - शिवस्य, भालान्तरालनयनज्वलने भालस्य

- मस्तकस्य अन्तराले - मध्ये यत् नयनं - तृतीयं नेत्रं तस्य ज्वलनः - अग्निस्तस्मिन्, मनोभूः - कामदेवः, सद्यः - अविलम्बेन, शलभत्वं - पतङ्गत्वं, प्रपद्य - प्राप्य, अङ्गम् - शरीरं, अमुञ्चत् - त्यक्तवान्। तस्मात् - तेन कारणेन, अमुं जनपदम् - एतं देशं, अङ्गसंज्ञं - अङ्गदेशः, विदुः - जानन्ति।

**सारः** - अस्मिन् प्रदेशे प्राचीनकाले कामदेवः त्रिपुरान्तकस्य शिवस्य ललाटनेत्राग्नौ पतङ्गभावं प्राप्य झटिति अङ्गं (शरीरं) त्यक्तवान् । तेन कारणेन अयं देशः 'अङ्ग' नाम्ना प्रसिद्धः।

अत्र वसन्ततिलकावृत्तम्।

**गद्यम्**

**तदनु मानससरःप्रसृतां सरयूमतिक्रम्य वृत्रवधप्रवृद्धवृद्धश्रवः पङ्कक्षालन-लब्धमलयो र्मलद करूषनाम्नोर्जनपदयोः सीम्नि कृतपदयोर्दाशरथ्योः पुनर-प्येवमब्रवीत्।**

**व्याख्या** - तदनु - तदनन्तरं मानससरः प्रसृतां मानसाख्य सरोवरात् प्रसूतां, सरयूं - सरयूनदीम् , अतिक्रम्य - उत्तीर्य, वृत्रवधप्रवृद्धेत्यादिः वृत्रस्य - तन्नाम्नोऽसुरस्य वधेन - हत्यया प्रवृद्धो - वृद्धिगतः, वृद्धश्रवसः - इन्द्रस्य, पङ्कः - पापमेव पङ्कः कर्दम इति श्लिष्ट रूपकम्, तस्य क्षालनेन लब्धमलयोः संक्रान्तपापयोरित्यर्थः। मलदकरूषनाम्नोः , जनपदयोः - देशयोः, सीम्नि - पर्यन्तभुवि, दाशरथ्योः - रामलक्ष्मणयोः, कृतपदयोः - न्यस्तचरणयोः सतोः, पुनः - भूयः, अपि एवं - वक्ष्यमाणप्रकारेण अब्रवीत् - उक्तवान्।

विश्वामित्रः सीम्नीं प्रवेशः

**सारः** - अङ्गदेशं दृष्ट्वा रामलक्ष्मणौ विश्वामित्रेण सह मानससरोवरात् प्रसूतां सरयूनदीम् उत्तीर्य मलद-करूष-नामकयोः देशयोः सीमप्रदेशं प्राप्तवन्तौ। वृत्रासुरस्य वधेन ब्रह्महत्यादोषं प्राप्तस्य इन्द्रस्य अस्मिन् प्रदेशे पापनिवृत्तिः जाता। तस्य पापस्य सम्पर्कात् अनयोः देशयोः मलदः - करूषः इति नाम

अभूत्। तं प्रदेशं प्रविश्य विश्वामित्रः भूयोऽपि रामलक्ष्मणौ उद्दिश्य अकथयत्।

## Summarised Overview

विश्वामित्रः दशरथं द्रष्टुम् अयोध्यानगरीं आगतः।तत्र विश्वामित्रः सत्रपरित्राणार्थं दशरथम् इत्थं अभ्यर्थितोऽभूत्। ‘ पुत्रस्य लक्ष्मणसहितस्य रामस्य साहाय्येन यज्ञं पूरयितुमिच्छामि यज्ञसंरक्षणार्थं रामं प्रेषयताम्’ पृच्छति। विश्वामित्रस्य वचनं श्रुत्वा दशरथःभीतः बभूव। पुत्रस्नेहेन अत्यन्तं चिन्तितः दशरथः रामस्य प्रेषणं निराकरोति। किन्तु रामं प्रेषयितुं दशरथं प्रति वसिष्ठः उपदिशति। अथ दशरथः तत् अङ्गीचकार। विश्वामित्रं रामलक्ष्मणौ अनुगतौ। रामलक्ष्मणौ नयतः विश्वामित्रः बलातिबलामन्त्रयोः उपदेशः अदात्। विश्वामित्रः अङ्गदेशस्य इतिहासं कथयति। अनन्तरं विश्वामित्रः मलदकरूषदेशयोः सीम्निं प्रविश्य ताटकावृत्तान्तं वर्णितुं आरभते।

## Assignments

1. अयोध्यायां विश्वामित्रस्य आगमनं किमर्थमासीत्?
2. विश्वामित्रः रामलक्ष्मणौ किं उपदिशति?
3. अङ्गदेशसय अङ्ग इति नाम कथं अभूत्?
4. विश्वामित्रस्य अयोध्यागमनं वनयात्रां च वर्णयत।

## Suggested Readings

1. Ramayanacampu of Bhoja, with Ramacnadra’s commentary, Nirnaya Sagar Press Mumbai.
2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnaya Sagar Press Mumbay. 1933

## References

1. Ramayanacampu of Bhoja, with Ramanathatripady sastri’s commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra’s commentary, Javaji Dadaji’s Nirnaya Sagar Press, Bombay, 1898

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

SGOU

# UNIT 4

# ताटकावृत्तान्तः।

## Learning Outcomes

- भोजस्य रचनावैशिष्ट्यस्य अवगमनम्।
- नूतनपदानां अर्थज्ञानम्।
- चम्पूरामायणे ताटकावृत्तान्तस्य कथासारमवगच्छति।

## Background

विश्वामित्रः दशरथस्य आस्थानं आगच्छति। तत्र यज्ञरक्षणार्थं श्रीरामं प्रेषयितुं दशरथं प्रार्थयते। दशरथस्तु प्रथमं नाङ्गीकरोति। किन्तु वसिष्ठस्य आदेशानुगुणं दशरथः विश्वामित्रेण साकं रामं सलक्ष्मणं प्रेषयति। रामलक्ष्मणौ विश्वामित्रं अनुसरतः। तत्रादौ विश्वामित्रः बला अतिबला इति विद्याद्वयं ताभ्याम् उपदिशति। गमनमार्गे अङ्गदेशं प्रदर्श्य तस्य देशस्य नाम्नः इतिहासं वर्णयति विश्वामित्रः। अङ्गदेशमतीत्य सरयूनदीं तीर्त्वा मलदकरुषदेशयोः सीम्नि प्राप्य विश्वामित्रः ताटकायाः वृत्तान्तं कथयितुं आरभतेति गतैकके अधीतम्। अस्मिन् एकके ताटका का? सुबाहुमारीचौ कौ? विश्वामित्रः यज्ञपरिसमाप्तिं कृतः न वा इत्यादीन् उद्वेगकथासन्दर्भान् पश्यामः।

## Keywords

सुकेतुः, सुन्दः, ताटका, मारीचः, कौणपताम्, पुरुषादिनि, वैरोचनीम्, भार्गवजननीम्, जनार्दनकृतमर्दनाम्, शिञ्जारवच्छलात्, पिशिताशनाशपिशुना, रुधिरक्षोदारुण, दारुणा, वीरपाणमकल्पयत्, भृशाश्वोपज्ञानि, वामनः, अपहृतविबुधार्तेः, पलाशदण्डाहृतपाणिरासीत्, जलमानुषनिर्विशेषं, प्रेतनाथातिथिः।

## Discussion

**पद्यम्**

**यक्षः सुकेतुर्द्रुहिणप्रसादाल्लेभे सुतां कामपि ताटकाख्याम्।**
**सुन्दः किलैनां परिणीय तस्यां मारीचनीचं जनयाम्बभूव॥ ३९॥**

**अन्वयः** - सुकेतुः यक्षः द्रुहिणप्रसादात् ताटकाख्यां कामपि सुतां लेभे, सुन्दः किल एनां परिणीय तस्यां मारीचनीचं जनयाम्बभूव।

मारीचस्य जननम्

**व्याख्या** - सुकेतुः - एतत् नामकः, यक्षः - देवयोनिविशेषः, द्रुहिणः - ब्रह्मणः, प्रसादात् - कृपया, कामपि - अतीवबलशक्तित्वात् अवर्णनीयाम्, ताटकाख्याम् - ताटकानाम्नीम्, सुताम् - पुत्रीम्, लेभे - प्राप्तवान् सन्ततिरूपेण, एनाम् - सुकेतुपुत्रीं ताटकाम्, परिणीय - विवाहस्य विधिना परिगृह्य, किल - निश्चयेन, तस्याम् - ताटकायाम्, सुन्दः - एतन्नामको दैत्यविशेषः, मारीचनीचम् - मारीचनामकं नीचप्रकृतिकं यज्ञादिद्रोह-करत्वात्, जनयाम्बभूव - जनयामास।

**सारः** - सुकेतुनामा यक्षः ब्रह्मणः वरेण ताटकानाम्नीं पुत्रीं प्राप्तवान्। सुन्दाख्यः यक्षः ताम् ऊढ्वा तस्यां मारीचनामकं नीचप्रकृतिकं उत्पादितवान्।

विग्रहः - मारीचनीचम् - मारीचश्चासौ नीचश्च।

अत्रोपजातिवृत्तम्।

**गद्यम्**

**एकदा सुन्दे निहते मारीचः कुम्भसम्भवमभिभूय तस्य शापादवाप कौणपताम्। ताटकाप्यभूत्पुरुषादिनी।**

अगस्त्यशापः

**व्याख्या** - एकदा - एकस्मिन् समये, सुन्दे निहते (सति) - सुन्दनाम्नि ताटकापतौ मारीचपितरि च निहिते (अगस्त्येन) मारिते, मारीचः - सुन्दपुत्रः, कुम्भसम्भवम् - अगस्त्याम्, अभिभूय - आक्रम्य, तस्य - अगस्त्यस्य, शापात् कौणपताम् - राक्षसत्वं, अवाप - प्राप्तवान्। ताटका अपि - मारीचमाताऽपि, पुरुषादिनी - नरमांसभोजी राक्षसी, अभूत् - संजाता।

**सारः** - कदाचित् अगस्त्यमहर्षेः शापेन सुन्दः हतः। तदा कोपेन तत्पुत्रः मारीचः (ताटकया सह) अगस्त्यम् आक्रम्य तस्य शापात् राक्षसत्वं प्राप्तवान्। ताटकापि अगस्त्यशापेन नरमांसभोजी राक्षसी जाता।

**गद्यम्**

**सेयमब्जासनसिद्धसिन्धुरसहस्रप्राणात्मजेन सह जनपदविपदं विदधाना व्यापादनीया त्वयेति।**

ताटकावधादेशः

**व्याख्या** - अब्जासनसिद्धसिन्धुरसहस्रप्राणा- अब्जासनो ब्रह्मा तेन, तत्प्रदत्तवरेण सिद्धाः - निष्पन्नाः, सिन्धुरसहस्रस्य - सहस्रसंख्यकगजानां

प्राणाः बलं यस्याः सा तादृशी, ब्रह्मणः वरप्रसादेन सहस्रसंख्याकानां गणानां बलं प्राप्ता आत्मजेन - पुत्रेण मारीचेन सह, जनपदविपदम्-स्वावासदेशोपद्रवम्, विदधाना - कुर्वती सेयं - ताटका त्वया - रामेण, व्यापादनीया - मारणीया। इत्येवमब्रवीदिति पूर्वोक्तेन सम्बन्धः।

**सारः -** एषा ताटका ब्रह्मणः प्रसादेन सहस्रगजबलयुक्ता पुत्रेण मारीचेन सह देशे उपप्लवं जनयन्ती, रामेण मारणीया (इति विश्वामित्रः रामम् अब्रवीत्)।

**गद्यम्**

**रामस्तमाकर्ण्य स्त्रीवधशङ्कामकरोत्।**

रामस्य स्त्रीवधशङ्का

**व्याख्या** - रामः तम् - विश्वामित्रोक्तं ताटकवृत्तान्तं, आकर्ण्य - श्रुत्वा, स्त्रीवधशङ्काम् - स्त्रीवधस्य शास्त्रनिषिद्धत्वात् संशयम्, अकरोत् - कृतवान्।

**सारः** - रामः विश्वामित्रोक्तं ताटकावृत्तान्तं, श्रुत्वा शास्त्रनिषिद्धत्वात् स्त्रीवधं कथं कर्तव्यमिति संशयं उक्तवान्।

विग्रहः - स्त्रीवधशङ्काम् - स्त्रीवधस्य शङ्काम्।

**गद्यम्**

**किञ्च वैरोचनीं मन्थरां वसुन्धरापराधधुरन्धरां पुरन्दरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां सुन्दवधूवधविचिकित्सामुत्सारयामास।**

रामस्य स्त्रीवधशङ्का निवारणम्

**व्याख्या** - किं च, पुरन्दरेण - इन्द्रेण, निहतां - मारिताम्, वसुन्धरापराधधुरन्धरां - वसुन्धरायाः, अपराधे - उपद्रवाचरणे, धुरन्धरां -

अग्रगण्याम्, वैरोचनीं - विरोचननाम्नो राक्षसस्य पुत्रीं मन्थरेति प्रसिद्धाम्, मन्थरां च जनार्दनकृतमर्दनां - विष्णुना व्यापादिताम्, भार्गवजननीं च - परशुराममातरं रेणुकां, च प्रदर्श्य - दृष्टान्ततया विज्ञाप्य, दाशरथेः - रामस्य, अमन्दां - महतीं, सुन्दवधूवध- विचिकित्साम् - ताटकायाः वधे - मारणे या विचिकित्सा - शङ्का ताम् उत्सारयामास - निरास्यत्।

**सारः** - पुरा किलेन्द्रो वसुधापराधधुरन्धरां विरोचनपुत्रीं मन्थरां हतवान्। परशुरामोऽपि पितुराज्ञया स्वमातू रेणुकायाः शिरच्छेदं चकार। इत्थं विश्वामित्रो रामस्य शङ्कां निरसितवान्।

विग्रहः - वैरोचनीम् - विरोचनस्य अपत्यं स्त्री वैरोचनी, ताम्।

भार्गवजननीम् -भार्गवस्य जननी, ताम्।

सुन्दवधूवधविचिकित्साम् - सुन्दवधूवधस्य विचिकित्सा, ताम्।

**पद्यम्**

**आश्रुतः श्रुतवृत्तेन तेन सुन्दप्रियावधः।**
**तमेवान्ववदत्तस्य चापः शिञ्जारवच्छलात्॥ ४०॥**

रामस्य ताटकावध प्रतिज्ञा

**अन्वयः** - श्रुतवृत्तेन - आकर्णित विश्वामित्रोक्तं मन्थरादिवधवृत्तान्तेन, तेन - रामेण, सुन्दप्रियावधः - ताटकायाः वधम्, आश्रुतः - प्रतिज्ञातः। तस्य - रामस्य, चापः - धनुः, शिञ्जारवच्छलात् - मौर्वीध्वनीव्याजात्, तम् एव - ताटकावधमेव, अन्ववदत् - अनुसृत्योक्तवान्।

**सारः** - विश्वामित्रोक्तं पूर्ववृत्तान्तं श्रुत्वा रामः ताटकावधं प्रतिज्ञातवान्। तस्य धनुरपि मौर्वीध्वनीव्याजेन तमेव अनुसृत्य अवदत। (ताटकावधप्रतिज्ञासमनन्तरं रामः ज्याटङ्कारं चकार)।

**पद्यम्**

**तत्काले पिशिताशनाशपिशुना सन्ध्येव काचिन्मुने-**
**रध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा।**
**स्वाधीने हनने पुरीं विदधती मृत्योः स्वकृत्यात्यय-**
**क्रीडत्किङ्करसङ्घसङ्कटमहाशृङ्गाटकां ताटका॥ ४१॥**

**अन्वयः** - स्वाधीने हनने (सति) स्वकृत्यात्ययक्रीडत्किङ्करसङ्घसङ्कट-महाशृङ्गाटकां मृत्योः पुरीं विदधती, पिशिताशनाशपिशुना रुधिरक्षोदारुणा दारुणा काचित् सन्ध्या इव ताटका तत्काले मुनेः अध्वानं तरसा रुरोध।

ताटकायाः वर्णनम्

**अन्वयार्थः** - स्वाधीने - स्वायत्ते सति, हनने - जीवमारणे, स्वकृत्यात्ययक्रीडत्किङ्करसङ्घसङ्कटमहाशृङ्गाटकां - स्वकृत्यस्य - मारणस्य अत्ययेन - विपर्ययेण, क्रीडन्तः - यथेच्छं विहरन्तः किङ्कराः - यमदूताः तेषां संघैः - तेषां समूहैः, सङ्कटम् - सङ्कुलम्, महत् - विशालं, शृङ्गाटकम् - चतुष्पथम् यस्याः तादृशीं, मृत्योः पुरीं - यमपुरीम्, विदधती - कुर्वती, पिशिताशनाशपिशुना - राक्षसानां नाशस्य सूचिका (ताटकपक्षे), राक्षसानां भोजनकालस्य सूचिका (सन्ध्यायाः पक्षे) रुधिरक्षोदारुणा - रक्तस्य पङ्केन अरुणिता (ताटकपक्षे), कुङ्कुमपुष्पस्य रजः इव रक्तवर्णा (सन्ध्यायाः पक्षे) दारुणा - स्वस्याः रूपबलाभ्यां भयङ्करी (ताटकपक्षे), पिशाचादिसञ्चारात् भयङ्करी (सन्ध्यायाः पक्षे) काचित् - ताटका नाम राक्षसी, सन्ध्या इव - सायं सन्ध्येव, ताटका, तत्काले - शिञ्जारवसमये, मुनेः - विश्वामित्रस्य, अध्वानं - मार्गम्, तरसा - वेगेन, रुरोध - निरुध्य स्थिता।

**सारः** - तस्मिन् समये एव सन्ध्या इव ताटका महर्षेः विश्वामित्रस्य मार्गं निरुद्धवती। (सन्ध्या राक्षसानां भोजनकालसूचिका, कुङ्कुमपुष्पस्य रज इव रक्तवर्णा, पिशाचादीनां सञ्चारेण भयङ्करी, अनुष्ठानकालत्वात् मुनीनां

प्रयाणस्य अवरोधिका) च । ताटका तु राक्षसानां विनाशकालसूचिका, रक्तपङ्केन अरुणिता, रूप-बलाभ्यां भयङ्करी, स्वभावेनैव मुनीनां प्रयाणस्य अवरोधिका) किञ्च, इयं ताटका मारणकार्यं स्वायत्तं कृत्वा, यमपुर्याः विशालां मुख्यवीथीं कार्यरहितैः यथेच्छं विहरद्भिः किङ्करसमूहैः समाकीर्णां कृतवती।

अत्र शब्दालङ्कारः - अनुप्रासः, अर्थालङ्कारः - उपमा, श्लेषः च। शार्दूलविक्रीडितम् वृत्तम्।

**पद्यम्**

**अथ दाशरथेः कर्णमविशत्ताटकागुणः।**
**तथा धनुर्गुणस्तूर्णं प्राविशत्तज्जिघांसया॥ ४२॥**

**अन्वयः** - अथ ताटकागुणः दाशरथेः कर्णम् अविशत्, तथा धनुर्गुणः तज्जिघांसया तूर्णं (दाशरथेः कर्णं) प्राविशत्।

ज्याशब्दरूपेण वधयानुवादः

**अन्वयार्थः** - अथ - अनन्तरम्, ताटकागुणः - ताटकायाः ध्वनिः, दाशरथेः - रामस्य, कर्णम् - श्रोत्रम्, अविशत् - प्रविष्टः, तथा - तत्कालमेव, धनुर्गुणः - चापस्य मौर्वी, तज्जिघांसया - तस्याः ताटकयाः हन्तुमिच्छायाः, तूर्णं - शीघ्रं, (दाशरथेः कर्णं) प्राविशत् - प्रविष्टः।

**सारः** - ताटकायाः ध्वनिः यावता रामस्य कर्णं प्राप्तः, तावता एव तस्याः हननेच्छया तस्य चापस्य मौर्वी तस्य कर्णदेशं प्राप। अर्थात्, ताटकायाः घोरं नादं श्रुत्वा रामः तां हन्तुं शीघ्रं ज्यां कर्णपर्यन्तम् आकृष्टवान्।

अत्रानुष्टुब्वृत्तम्, अतिशयोक्त्यलङ्कारः।

**पद्यम्**

**ततो भाविनि सङ्ग्रामे बद्धश्रद्धस्य ताटका।**
**स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत्॥ ४३॥**

रामबाणस्य ताटकाप्राणाः वीरपाणमकल्पयत्

**अन्वयः -** ततः ताटका भाविनि सङ्ग्रामे बद्धश्रद्धस्य रामबाणस्य स्वप्राणान् वीरपाणम् अकल्पयत्।

**अन्वयार्थः -** ततः - तदनन्तदरं, ताटका, भाविनि सङ्ग्रामे - भविष्यति युद्धे, बद्धश्रद्धस्य - विहितादरस्य, रामबाणस्य - श्रीरामशरस्य, स्वप्राणान् स्वीयप्राणरूपं वीरपाणम् - वीराणां पानम् अकल्पयत् - कृतवती।

**सारः -** ततः ताटका भविष्यति युद्धे विहितादरस्य श्रीरामशरस्य वीरपाणरूपेण स्वप्राणानेव समर्पितवती।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**मुनिर्भृशाश्वोपज्ञानि ताटकामाथिने ददौ।**
**अस्त्राणि जृम्भकादीनि जम्भशासनशासनात्॥ ४४॥**

ताटकान्तकाय अस्त्राणि अदात्।

**अन्वयः -** मुनिः जम्भशासनशासनात् भृशाश्वोपज्ञानि जृम्भकादीनि अस्त्राणि ताटकामाथिने ददौ।

**अन्वयार्थः** - मुनिः - विश्वामित्रः, जम्भशासनशासनात् - इन्द्रस्य आज्ञया, भृशाश्वोपज्ञानि - भृशाश्वेन आदौ ज्ञातानि, जृम्भकादीनि - जृम्भकप्रभृतीनि, अस्त्राणि ताटकामाथिने - ताटकान्तकाय श्रीरामाय, ददौ - अस्त्राणि अदात्।

**सारः** - विश्वामित्रः इन्द्रस्य आज्ञया ताटकान्तकाय रामाय भृशाश्वेन आदौ ज्ञातानि जृम्भकादीनि अस्त्राणि अदात्।

विग्रहः - जम्भशासनशासनात् - जम्भशासनस्य शासनम्, तस्मात्।

अत्रानुष्टुब्वृत्तम्।

**गद्यम्**

**तत्र कञ्चन विरिञ्चिलोकप्रत्यादेशं प्रदेशं प्रदर्शयन्नवोचत्।**

**व्याख्या** - तत्र - वने, कञ्चन -कमपि, विरिञ्चिलोकप्रत्यादेशं - ब्रह्मलोकातिशयिनं, प्रदेशं - स्थानविशेषं, प्रदर्शयन् - अङ्गुल्या दर्शयन्, अवोचत् - उक्तवान्।

**सारः** - तस्मिन् वने ब्रह्मलोकतुल्यं स्थानमेकं प्रदर्श्य विश्वामित्रः उक्तवान्।

विग्रहः - विरिञ्चिलोकप्रत्यादेशः - विरिञ्चिलोकस्य प्रत्यादेशः।

**पद्यम्**

**प्रतिदिनमवदातैर्ब्रह्मभिर्ब्रह्मनिष्ठैः**
**प्रशमितभवखेदैः सादरं सेव्यमाने।**
**बलिनियमनहेतोर्वामनः काननेऽस्मिन्**
**बलिनियमपरस्सन् ब्रह्मचारी चचार॥४५॥**

वामनाश्रमस्य वर्णनम्।

**अन्वयः** - अवदातैः ब्रह्मनिष्ठः प्रशमितभवखेदैः ब्रह्मभिः प्रतिदिनं सादरं सेव्यमाने अस्मिन् कानने बलिनियमनहेतोः बलिनियमपरः ब्रह्मचारी सन् वामनः चचार।

**व्याख्या** - अवदातैः - प्रसन्नैः, विषयवैराग्ययुक्तत्वात् निर्मलान्तःकरणैः, ब्रह्मनिष्ठैः - ब्रह्मैव निष्ठा - शान्तिपदं, येषां ते तैः, प्रशमिताः - शान्तिं गमिताः, भवस्य - जगतः, खेदाः - जन्ममरणरूपसंसरणरूपाध्वश्रमाः, येषां

ते तैः तथा- भूतैः, ब्रह्मभिः - ब्रह्मर्षिभिः, प्रतिदिनम् - निरन्तरम्, सादरम् - श्रद्धापूर्वकम्, सेव्यमाने - अधिष्ठीयमाने, अस्मिन् - पुरो दृश्यमाने, कानने - अरण्ये, बलेः - वैरोचनेः, नियमनस्य - निग्रहस्य, हेतोः - कारणात्, बलिं निग्रहीतुमिति यावत्, बलीनाम् - इष्टदेवता- पूजोपहाररूपाणां बलीनाम्, नियमाः - शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानाख्याः, तत्परः - तदासक्तः, ब्रह्मचारी सन् - प्रथमाश्रमे विद्यमानः सन्, चचार - अवर्तत ।

**सारः** - इदं पुण्यारण्यं निर्मलान्तःकरणैः, ब्रह्मणि तत्परैः, तापत्रयविनिर्मुक्तैः ब्रह्मर्षिभिः प्रत्यहं श्रद्धापूर्वकम् सेव्यते । अस्मिन्नेव कानने मायावटुः वामनः महाबलिं निग्रहीतुं बलिनियमादिकं ब्रह्मचर्यविधिं पालयन् अवर्तत ।

विग्रहः - सादरम् - आदरेण सह वर्तते इति ।

प्रतिदिनम् - दिने दिने ।

अस्मिन् श्लोके मालिनी वृत्तम् ।

**पद्यम्**

**अपहृतविबुधार्तेर्वामनस्याजमूर्ते-**
**रखिलभुवनभिक्षोराश्रमानोकहानाम् ।**
**ततिरियमतिनीला व्याप्तदिग्व्योमसीमा**
**स्वयमपि परिमातुं लोकमभ्युद्यतेव ॥ ४६ ॥**

**अन्वयः** - अपहृतविबुधार्तेः - अजमूर्तेः अखिलभुवनभिक्षोः वामनस्य आश्रमानोकहानाम् इयं ततिः अतिनीला व्याप्तदिग्व्योमसीमा स्वयमपि लोकं परिमातुम् अभ्युद्यता इव (दृश्यते) ।

वामनाश्रमवृक्षाणां वर्णनम्

**अन्वयार्थः** - अपहृतविबुधार्तेः - परिहृतदेवसन्तापस्य, अजमूर्तेः - विष्णोरंशभूतस्य, अखिलभुवनभिक्षोः - त्रिभुवनयाचकस्य, वामनस्य, आश्रमानोकहानाम् - आश्रमवृक्षाणाम्, इयं ततिः - श्रेणिः, अतिनीला -

समधिकश्यामला, व्याप्तदिग्व्योमसीमा - आक्रान्तगगनतला, स्वयमपि लोकं परिमातुम् - स्वयमपि भुवनं परिच्छेत्तुम्, अभ्युद्यता इव - समुद्युक्ता इव (दृश्यते)।

**सारः** - महाविष्णुः देवानां सन्तापनाशनाय वामनरूपेण अवतीर्य त्रिभुवनमेव भिक्षारूपेण प्राप्तवान्। तस्य आश्रमवृक्षाणाम् इयं श्रेणिः समधिकश्यामला, दिगन्तान् व्याप्य स्वयमपि लोकान् परिच्छेत्तुं समुद्युक्ता इव प्रतीयते।

विग्रहः - अपहृतविबुधार्तेः - अपहृता विबुधार्तिः येन सः, तस्य।

अजमूर्तेः - अजस्य मूर्तिः, तस्य।

अखिलभुवनभिक्षोः - अखिलभुवनस्य भिक्षुः, तस्य।

व्याप्तदिग्व्योमसीमा - व्याप्ता दिग्व्योमसीमा यया सा।

अत्र उत्प्रेक्षालङ्कारः. मालिनीवृत्तम्।

**पद्यम्**

**इति विविधरसाभिः कौशिकव्याहृताभिः**
**श्रुतिपथमधुराभिः पावनीभिः कथाभिः।**
**गलितगहनकृच्छ्रं गच्छतोर्दाशरथ्योः**
**समकुचदिव सद्यस्तादृशं मार्गदैर्घ्यम्॥ ४७॥**

मार्गदैर्घ्यं न ज्ञातः

**अन्वयः** - इति विविधरसाभिः, श्रुतिपथमधुराभिः, पावनीभिः, कौशिकव्याहृताभिः कथाभिः गलितगहनकृच्छ्रं गच्छतोः दाशरथ्योः तादृशं मार्गदैर्घ्यं सद्यः समकुचत् इव।

**अन्वयार्थः** - इति - इत्यनेन प्रकारेण, विविधरसाभिः - नानारसपूर्णाभिः, श्रुतिपथमधुराभिः - श्रवणानन्ददायिनीभिः, पावनीभिः - पवित्रकरिभिः, कौशिकव्याहृताभिः - विश्वामित्रेण उक्ताभिः, कथाभिः -

उपाख्यानात्मकवार्ताभिः, गलितगहनकृच्छ्रं - वनसञ्चारजनितकष्टं विना, गच्छतोः - चलतोः, दाशरथ्योः - रामलक्ष्मणयोः, तादृशं - अत्यधिकम्, मार्गदैर्घ्यं - मार्गस्य विस्तारः, सद्यः - तत्क्षणम्, समकुचत् इव - ह्रस्वीभूताः इव आसीत्।

**सारः** - इत्यनेन प्रकारेण नानाप्रकारकरसपूर्णानि श्रवणानन्दकराणि पवित्राणि विश्वामित्रकथितानि उपाख्यानानि शृण्वतोः रामलक्ष्मणयोः वनसञ्चारस्य कष्टस्य अनुभवः एव नाभूत्। किञ्च, तादृशः दीर्घः मार्गः अपि तत्क्षणादेव ह्रस्वीभूतः इव आसीत्।

विग्रहः - विविधरसाभिः - विविधाः रसाः यासाम्, ताभिः।

कौशिकव्याहृताभिः - कौशिकेन व्याहृताः, ताभिः।

श्रुतिपथमधुराभिः - श्रुतिपथस्य मधुराः, ताभिः।

अत्र उत्प्रेक्षालङ्कारः. मालिनीवृत्तम्।

**गद्यम्**

**ततः सिद्धाश्रमं प्रविश्य विश्वामित्रः सत्रमारभत।**

विश्वामित्रः यज्ञमारभत

**व्याख्या** - ततः - तदनन्तरम्, सिद्धाश्रमं प्रविश्य - तन्नामकं तपोवनं प्रविश्य, विश्वामित्रः, सत्रम् - यज्ञम्, आरभत -प्रारब्धवान्।

**सारः** - तदनन्तरं विश्वामित्रः सिद्धाश्रमम् नामकं तपोवनं प्रविश्य यज्ञं प्रारब्धवान्।

**गद्यम्**

**तदनन्तरमन्तरिक्षान्तरालादापतन्तमन्तकानीकभयानकं तं पलाशगणमवलोक्य पलायमानाः करगलितसमित्कुशाः कुशिकनन्दनान्तेवासिनः ससम्भ्रममभिलषिताहवाय राघवाय न्यवेदयन्।**

अन्तेवासिनां निवेदनम्

**व्याख्या** - तदनन्तरम् - यज्ञप्रारंभानन्तरं, अन्तरिक्षान्तरालात् - नभोमध्यदेशात्, आपतन्तम् - आक्रमणं कुर्वन्तम्, अन्तकानीक- भयानकं - यमसैन्यम् इव भयङ्करम्, तं पलाशगणम् - राक्षसानां समूहं, अवलोक्य - दृष्ट्वा,पलायमानाः - प्रद्रुताः, करगलितसमित्कुशाः - हस्तच्युतदर्भाः, कुशिकनन्दनान्तेवासिनः - विश्वामित्रस्य शिष्याः, ससम्भ्रमम् - सोद्वेगम्, अभिलषिताहवाय - समरोत्सुकाय, राघवाय - श्रीरामाय, न्यवेदयन् - व्यज्ञापयन्।

**सारः** - आकाशमध्यात् आक्रमणं कुर्वन्तं यमकिङ्करवद् भयङ्करं राक्षससमूहं दृष्ट्वा विश्वामित्रस्य शिष्याः प्रद्रुताः। तेषां हस्तेभ्यः दर्भादयः पतिताः। तादृशाः ते उद्वेगेन समरोत्सुकं रामम् उपसर्प्य उक्तवन्तः।

**पद्यम्**

**हृत्वाद्रेः शिखराणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा**
**कृत्वा हस्तविघट्टनं तत इतः स्थित्वा नटित्वा मुहुः।**
**सिक्त्वा क्ष्मामसृजा स्रजान्त्रकृतया बद्ध्वा कचान् खेचरान्**
**दग्ध्वाग्रेः सदृशा दृशा निशिचरा रुन्धन्ति रन्ध्रं दिवः॥४८॥**

राक्षसानाम् अट्टहासवर्णनम्

**अन्वयः** - अद्रेः शिखराणि हृत्वा, तानि परितः क्षिप्त्वा, क्रुधा हसित्वा, हस्तविघट्टनं कृत्वा, तत इतः स्थित्वा, मुहुः नटित्वा, क्ष्माम् असृजा सिक्त्वा, अन्त्रकृतया स्रजा कचान् बद्ध्वा, अग्नेः सदृशा दृशा खेचरान् दग्ध्वा निशिचराः दिवः रन्ध्रं रुन्धन्ति।

**व्याख्या** - अद्रेः - पर्वतस्य, शिखराणि - शृङ्गाटकानि, हृत्वा - आनीय, तानि - आनीतानि शिखराणि, परितः समन्तात्, क्षिप्त्वा - प्रक्षिप्य, क्रुधा - क्रोधेन, हसित्वा - अट्टहासं चण्डं कृत्वा, हस्तयोः - करयोः, विघट्टनम् - स्फालनं कृत्वा, तत इतः - यत्र तत्र यथेष्टम्, स्थित्वा - सन्तिष्ठ्य, समन्ताद्

व्याप्येत्यर्थः, मुहुः नटित्वा - असकृत् उत्साहप्रदर्शनं कृत्वा, क्ष्माम् - पृथिवीम्, असृजा - रक्तेन, सिक्त्वा - सेचयित्वा, अन्त्रकृतया - आन्त्रनिर्मितया, स्रजा -मालया, कचान् - केशान्, बद्ध्वा - संयमयित्वा, खेचरान् - अन्तरिक्षचारिणः, अग्निसदृशा - अग्निकल्पया, दृशा - नेत्रेण, दग्ध्वा - सन्ताप्य, दिवः - आकाशस्य, रन्ध्रम् - अन्तरालम्, निशिचराः - रजनीचराः, रुन्धन्ति - आवृण्वन्ति।

**सारः** - पर्वतशृङ्गाणि आनीय, तानि समन्ततो विकीर्य, अट्टहासं कृत्वा, क्रोधेन करताडनं कृत्वा, सर्वतः सञ्चार्य, पुनः नाट्यं कृत्वा, भूमिं रक्तेन आप्लाव्य, आन्त्रमालिकया केशान् आबध्य, अन्तरिक्षचारिणः अग्निसमानदृष्ट्या सन्ताप्य राक्षसाः आकाशविवरम् आवृण्वन्ति।

अत्र अनुप्रासालङ्कारः, शार्दूलविक्रीडितं वृत्तम्।

**पद्यम्**

श्रीरामः किंशुकदण्डधारी बभूव

**सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव रामभद्रः।**
**क्षात्रक्रमात् पिप्पलदण्डयोग्यः पलाशदण्डाहृतपाणिरासीत्॥ ४९॥**

**अन्वयः** - सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव क्षात्त्रक्रमात् पिप्पलदण्डयोग्यः रामभद्रः पलाशदण्डाहृतपाणिः आसीत्।

**व्याख्या** - सङ्क्रान्तम् - तपोबलेन सम्प्राप्तम्, वर्णान्तरम् - ब्राह्मण्यं, यस्य सः तथोक्तः तस्य, गाधिसूनोः - विश्वामित्रस्य, गाधिराजात्मजस्य, सम्पर्केण - सहवासेन, यत् पुण्यम् - सुकृतम्, तस्मादिव इति हेतूत्प्रेक्षा, क्षतः - नाशात्, त्रायते इति क्षत्रम् - क्षत्रवर्णम्, तस्य सम्बन्धी क्षात्रः, तस्मात् क्रमात्, कुलाचारक्रमात् इति भावः, पिप्पलदण्डयोग्यः - उपनयन कालेऽश्वत्थदण्ड-धारकयोग्यः, क्षत्रियस्योपनयनसमये तथा विधिविहितत्वात्, रामभद्रः -

श्रीरामः, पलाशदण्डे - किंशुकदण्डधारणे, आद्दतः - आदरवान्, पाणिः - करः, यस्याऽसौ तथाविधः, ब्राह्मणस्योपनयनसमये पलाशदण्डधारणस्य विधिविहित्वात्। अथवा पलम् - मांसम्, अश्नन्ति - खादन्ति, ये ते पलाशाः, तेषां दण्डे - नियमने, आद्दतः - व्यग्रः, पाणिः - हस्तः, यस्याऽसौ तथाविधः, आसीत् - बभूव।

**सारः** - तपोबलेन क्षात्रवर्णात् ब्राह्मण्यं प्राप्तस्य विश्वामित्रस्य सहवाससुकृताद् इव, क्षत्त्रियकुलाचारानुगुणं अश्वत्थदण्डधारणयोग्यः श्रीरामः किंशुकदण्डधारी बभूव।

विग्रहः - सम्पर्कपुण्यात् - सम्पर्कस्य पुण्यम्, तस्मात्।

पलाशदण्डाद्दतपाणिः -पलाशदण्डाद्दतः पाणिः यस्य सः।

अत्र पूर्वार्धे हेतूत्प्रेक्षा, उत्तरार्धे विरोधाभासालङ्कारश्च, अत्रोपजातिवृत्तम्।

**पद्यम्**

**मारीचनीचमतिराहवमारचय्य**
**क्षिप्तः क्षणेन रघुनायकसायकेन।**
**मध्येपयोनिधि भयेन निमग्नमूर्ति**
**र्वेषं पुपोष जलमानुषनिर्विशेषम्॥ ५०॥**

**अन्वयः** - मारीचनीचमतिः - क्षुद्रबुद्धिः मारीचनामा राक्षसः, आहवम् - युद्धम्, आरचय्य - कृत्वा, रघुनायकसायकेन - श्रीरामस्य वायव्यास्त्रे, क्षणेन - क्षणमात्रेण, क्षिप्तः - प्रेरितः (सन्), मध्येपयोनिधि - समुद्रान्तः, भयेन - भीत्या, निमग्नमूर्तिः - जलाभ्यन्तरे निलीनदेहः, जलमानुषनिर्विशेषं - जलान्तर्वासिमानवतुल्यवेषं पुपोष - आकारं धारयामास।

मारीचवधः

**सारः** - क्षुद्रबुद्धिः मारीचः युद्धं कृत्वा रामबाणेन झटिति क्षिप्तः समुद्रमध्ये पतितः, भीत्या जलाभ्यन्तरे निलीनदेहः सलिलमनुष्यसद्दशं वेषं धृतवान्।

विग्रहः - मध्येपयोनिधि - पयोनिधेः मध्यम्।

निमग्नमूर्तिः - निमग्ना मूर्तिः यस्य सः।

अत्र वसन्ततिलकावृत्तम्।

**पद्यम्**

**सुबाहुराहवोन्मत्तः कृत्तः काकुत्स्थपत्रिणा।**
**मुनीनामनभिप्रेतः प्रेतनाथातिथिः कृतः॥ ५१॥**

**अन्वयः** - मुनीनाम् अनभिप्रेतः, आहवोन्मत्तः सुबाहुः काकुत्स्थपत्रिणा कृत्तः प्रेतनाथातिथिः कृतः।

सुबाहोः यमलोकगमनम्

**अन्वयार्थः** - मुनीनाम् - ऋषीणाम्, अनभिप्रेतः - असंमतः, आहवोन्मत्तः - युद्धदृप्तः, सुबाहुः - सुबाहुनामा राक्षसः, काकुत्स्थपत्रिणा - श्रीरामस्य शरेण, कृत्तः - छिन्नः, प्रेतनाथातिथिः - यमराजस्य अतिथिः, कृतः - यमलोकं गमितः इत्यर्थः।

**सारः** - लोकपीडकत्वात् ऋषीणाम् असंमतः सुबाहुः युद्धदृप्तः रामशरेण च्छिन्नः यमलोकं गमितः।

विग्रहः - आहवोन्मत्तः - आहवेन उन्मत्तः।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**वंशस्पृशा हृदयहारिफलान्वितेन**
**रामेरितेन सहसा सह सायकेन।**
**स्नेहार्दितेन निरगादनुरागिणीव**
**प्राणावलिर्हृदयतः पिशिताशनानाम्॥ ५२॥**

**अन्वयः** - वंशस्पृशा हृदयहारिफलान्वितेन रामेरितेन स्नेहार्दितेन नायकेन सह अनुरागिणी इव, वंशस्पृशा हृदयहारिफलान्वितेन रामेरितेन स्नेहार्दितेन सायकेन सह प्राणावलिः पिशिताशनानां हृदयतः निरगात्।

राक्षसानां प्राणत्यागः

**अन्वयार्थः** - वंशस्पृशा - वेणुसम्भवेन, हृदयहारिफलान्वितेन - हृदयविदारकबाणाग्रयुतेन, रामेरितेन - रामप्रेरितेन, स्नेहार्दितेन - तैलादिशोधितेन, नायकेन सह अनुरागिणी इव - अनुरागवती युवतिः, वंशस्पृशा - सत्कुलोत्पन्नेन, हृदयहारिफलान्वितेन मनोहरलाभसहितेन, रामेरितेन - सुन्दरीभिः अभिलषितेन, स्नेहार्दितेन - प्रेमपूर्णेन, सायकेन सह - बाणेन सह, प्राणावलिः - पञ्चप्राणश्रेणिः, पिशिताशनानां - राक्षसानाम्, हृदयतः - हृदयप्रदेशात्, निरगात् - निर्जगाम।

**सारः** - यथा काचित् अनुरागवती युवतिः सत्कुलोत्पन्नेन, मनोहरलाभसहितेन, सुन्दरीभिः अभिलषितेन, प्रेमपूर्णेन नायकेन सह शीघ्रं निर्गच्छति, एवं प्राणश्रेणिः राक्षासानां हृदयतः वेणुसम्भवेन, हृदयविदारकबाणाग्रयुतेन, श्रीरामप्रेरितेन, तैलादिसंस्कृतेन बाणेन सह झटिति निर्जगाम।

विग्रहः - रामेरितेन - रामेण ईरितः, तेन।

स्नेहार्दितेन - स्नेहेन आर्दितः, स्नेहार्दितः तेन ।

प्राणावलिः - प्राणानाम् आवलिः।

अत्रालङ्कारः समासोक्तिः, उपमा, श्लेषः।वसन्ततिलकावृत्तम्।

## Summarised Overview

सुकेतुः नाम यक्षः ब्रह्मणः वरप्रसादेन ताटकानाम्नीं पुत्रीं लेभे। सा ताटका सुन्दनाम्ना यक्षेण परिणीता। मारीचनामकं पुत्रं जनयामास। अगस्त्यस्य शापेन सुन्दः मृतः। ततः मारीचः ताटका च अगस्त्यम् आक्रम्य तस्य शापात् राक्षसत्वं तथैव पुरुषभक्षकत्वं च प्राप्तवन्तौ इत्युक्त्वा ताम् हन्तुं विश्वामित्रः रामं आदिशति। रामस्तु तामकर्ण्य स्त्रीवधशङ्कामकरोत्। तदा मन्थरायाः पुनः च भार्गवजनन्याः च दृष्टान्तं प्रदर्श्य विश्वामित्रः तस्य शङ्कां निवारयति। ततः रामः ताटकां हन्तुं प्रतिज्ञां करोति। ताटकावधप्रतिज्ञायाः ज्याघोषरूपेण रामस्यैव अनुवादः कृतः। तदा तं शब्दं श्रुत्वा ताटका आगच्छति। भोजेन ताटकायाः वर्णनं बहुसुन्दरेण श्लोकेन क्रियते।

मृत्योः किङ्कराणां कार्यं सर्वमपि श्रीरामः नाशितवान्। ततः यमकिङ्कराः कार्यं विना यमनगर्याः वीथिषु संभ्रमेण विहरन्ति। एतादृशीं ताटकां रामः एकस्यैव बाणेन वधं करोति। ताटकायाः प्राणः रामबाणस्य वीरपाणमकल्पयत्। ताटकावधानन्तरं विश्वामित्रः भृशाश्वमुनिना आविष्कृतानि बहूनि अस्त्राणि रामाय उपदिशति। वनमार्गे वामनस्य आश्रममपश्यत्। तस्मिन् आश्रमे वामनः ब्रह्मचारिरूपेण महाबलेः नियमनार्थं सञ्चारं कृतवान्। बहवः ब्रह्मर्षयः शुद्धमनस्काः तपः चरन्तीति दृष्टम्। तत्रैव वामनस्य वृक्षाणां वर्णनमपि बहुसुन्दररीत्या भोजेन कृतम्। एवं विश्वामित्रेण कथिताः कथाः श्रृण्वन्तौ रामलक्ष्मणौ मार्गस्य आयासं न ज्ञातवन्तौ । रामलक्ष्मणौ विश्वामित्रेण सह सिद्धाश्रमं प्राप्तवन्तौ। कौशिकः सत्रं आरभत। तत्र यागस्थाने राक्षसाः आक्रमणं कृतवन्तः। तेषां आक्रमणं रामाय निवेदयन्ति अन्तेवासिनः। भोजेन राक्षसानां अट्टहासः वर्णितः। ततः रामः राक्षसैः सह युद्धं करोति। मारीचः रामबाणेन दूरात् क्षिप्तः समुद्रे पतितः। अनन्तरं रामेण सुबाहुमपि यमलोकं प्रेषितः। अन्ये सर्वे राक्षसाः रामेण मारिताः। अथ विश्वामित्रः राक्षसविघ्नहीनः यज्ञं समापयामास।

## Assignments

1. चम्पूरामायणमाश्रित्य ताटकावृत्तान्तं वर्णयत।
2. ताटकां वर्णयत।

3. वामनस्य आश्रमं अधिकृत्य विवृणुत ।

4. सिद्धाश्रमवासिनो ऋषयो राक्षसैः नानाविधं क्रियमाणं उपद्रवं किम् ?

5. पिप्पलदण्डयोग्यः पलाशदण्डाद्दतपाणिरासीत् । व्याख्यात ।

6. सुबाहुमारीचयोः वधं कीदृशमासीत्?

7. अपहृतविबुधार्तेर्वामनस्याजमूर्ते-
रखिलभुवनभिक्षोराश्रमानोकहानाम् ।
ततिरियमतिनीला व्याप्तदिग्व्योमसीमा
स्वयमपि परिमातुं लोकमभ्युद्यतेव ॥ ससन्दर्भं व्याख्यात ।

## Suggested Readings


1. Ramayanacampu of Bhoja, with Ramacnadra's commentary, Nirnaya Sagar Press Mumbai.
2. Ramayanacampu of Bhoja, edited by wasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnaya Sagar Press Mumbay. 1933


## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnaya Sagar Press, Bombay, 1898

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# रामायणचम्पोः

# बालकाण्डस्य अवशिष्टः भागः

# (53- 110 श्लोकाः)

# BLOCK - 4

SGOU

# UNIT 1

# कौशिकवृत्तान्तः।

## Learning Outcomes

- चम्पूकाव्यानां वैशिष्ट्यं ज्ञातुं शक्यते।
- नूतनपदावलीं परिचयः जायते, पद-पदार्थबन्धं स्थापयति।
- चम्पूरामायण बालकाण्डे कौशिकस्य वृत्तान्तं ज्ञातुं शक्यते।

## Background

भोजस्य चम्पूरामायणस्य बालकाण्डे पूर्वस्मिन् खण्डे चम्पूरामायणं किमर्थं रचितं, चम्पूकाव्यस्वरूपं, रावणवृत्तान्तं, रामादीनां जन्मवृत्तान्तं, विश्वामित्रस्य अयोध्या आगमनं, रामस्य यज्ञसंरक्षणं, ताटकावृत्तान्तं इत्यादिकथासन्दर्भाः भोजेन अतिसुन्दरतया वर्णिताः। इदानीं मिथिलां प्रति प्रस्थिताभ्यां रामलक्ष्मणाभ्यां विश्वामित्रः स्वस्य वृत्तान्तं कथयति। विश्वामित्रः कः, तस्य पूर्वेजाः के इत्यादिविषयाः अस्मिन् एकके ज्ञातुं शक्यते। तत् पश्यामः।

## Keywords

SGOU

अव्याजलक्ष्म्या, कुशेशयासनजन्मा, कुशाभिधानो, घृतीच्यां, पवमानः, अनार्जवम् , ब्रह्मदत्ताय, प्रकृतिस्था, गाधिसंज्ञान्, गङ्गामुपतिष्ठमानेन।

## Discussion

विश्वामित्रः सीतया सह रामं योजयितुं निश्चयमकरोत्

**पद्यम्**

**अथ निशिचरमाथाद्वीतवैतानविघ्नः**
**मुनिरवभृथकृत्यं विश्वहृद्यं समाप्य।**
**अमनुत जयलक्ष्म्या राममाजौ समेतं**
**यजनजनितमूर्त्या योक्तुमव्याजलक्ष्म्या॥ ५३॥**

**अन्वयः** - अथ निशिचरमाथात् वीतवैतानविघ्नः मुनिः विश्वहृद्यम् अवभृथकृत्यं समाप्य आजौ जयलक्ष्म्या समेतं रामं यजनजनितमूर्त्या अव्याजलक्ष्म्या योक्तुम् अमनुत।

**अन्वयार्थः** - अथ - तदनन्तरम्, निशिचरमाथात् - राक्षसानाम् विनाशात्, वीतवैतानविघ्नः - वीताः - समाप्तिं गता वैतानः - वितानस्य यागस्य इमे इति वैतानाः यागीयाः विघ्नाः - प्रत्यूहाः यस्य सः, सम्प्राप्त यागविघ्नः, मुनिः - विश्वामित्रः, विश्वहृद्यम् - जगत्प्रियं, अवभृथकृत्यं - यज्ञान्तस्नानादिकर्म, समाप्य - समापणं कृत्वा, आजौ - युद्धे, जयलक्ष्म्या - विजयश्रिया, समेतं - सहितं रामं, यजनजनितमूर्त्या - जनकयज्ञे अवतीर्णरूपया, अव्याजलक्ष्म्या - यथार्थतो लक्ष्मीरूपया सीतया योक्तुम् - संघटयितुं, अमनुत - निश्चयमकरोत्।

**सारः** - अथ निशिचरमाथात् वीतवैतानविघ्नः मुनिः विश्वहृद्यम् अवभृथकृत्यं

समाप्य आजौ जयलक्ष्म्या समेतं रामं यजनजनितमूर्त्या अव्याजलक्ष्म्या योक्तुम् अमनुत।

विग्रहः - निशिचरमाथात् – निशिचराणां माथः, तस्मात्।

यजनजनितमूर्त्या - यजनजनिता मूर्तिः यस्याः सा, तया।

अस्मिन् श्लोके मालिनीवृत्तम्।

**गद्यम्**

**अथ मिथिलां प्रति प्रस्थितः कौशिकः काकुत्स्थमित्थमकथयत्।**

**व्याख्या** - अथ - तादृशनिश्चयानन्तरं, मिथिलां प्रति - जनकपुरीं प्रति, प्रस्थितः - चलितः, कौशिकः - विश्वामित्रः, काकुत्स्थम् - श्रीरामचन्द्रम्, इत्थम् - अनेन वक्ष्यमाणप्रकारेण, अकथयत्- उक्तवान्।

**सारः** - सीतया रामं योजयितुं निश्चित्य मिथिलां प्रति चलितः विश्वामित्रः रामम् एवम् उक्तवान्।

**गद्यम्**

**पुरा खलु कुशेशयासनजन्मा कुशाभिधानो राजर्षिः कुशाम्बप्रमुखैश्चतुर्भिः कौशाम्बीमहोदयधर्मारण्यगिरिव्रजाख्यानां पुरीणां कर्तृभिः पुत्री बभूव।**

**अन्वयः** - पुरा कुशेशयासनजन्मा कुशाभिधानो राजर्षिः कुशाम्बप्रमुखैः चतुर्भिः कौशाम्बीमहोदयधर्मारण्यगिरिव्रजाख्यानां पुरीणां कर्तृभिः पुत्री बभूव खलु।

कुशस्य कथा

**अन्वयर्थः** - पुरा खलु- पूर्वकाले, कुशेशयासनजन्मा - कुशेशयासानात् ब्रह्मणो जन्म यस्य सः, कुशाभिधानो - कुशनाम, राजर्षिः, कुशाम्बप्रमुखैः - कुशाम्बप्रभृतिभिः, चतुर्भिः, कौशाम्बीमहोदयधर्मारण्यगिरिव्रजाख्यानां - कौशाम्बी-महोदय-धर्मारण्य-गिरिव्रजाख्यायां - तत्तत् नाम्ना प्रसिद्धानां, पुरीणां - नगरीणां, कर्तृभिः - निर्मातृभिः, पुत्री - पुत्रवान्, बभूव।

**सारः** - पूर्वकाले ब्रह्मणो जातस्य कुशस्य कुशाम्बादयश्चत्वारः पुत्राः अभूवन्। यैः कौशाम्बी-महोदय-धर्मारण्य-गिरिव्रजाख्यायाः चतस्रः तन्नाम पूर्यो विरचिताः।

**गद्यम्**

**कुशनाभस्तु घृतीच्यां कन्याशतमजनयत्।**

**व्याख्या** - कुशनाभः तु घृतीच्यां - घृताचीनाम अप्सरासि, कन्याशतम् - शतसंख्याकाः कन्याः, अजनयत् - उत्पादयामास।

**सारः** - कुशस्य द्वितीयः पुत्रः कुशनाभः घृताचीनामिकायां अप्सरसि शतसंख्याकाः कन्यकाः उत्पादयामास।

**गद्यम्**

**कन्यास्ताः संनद्धयौवनाः कामयमानः पवमानः प्रत्याख्यानात्प्रत्यापन्नमन्यु-रासामवयवेष्वनार्जवमतनुत।**

**व्याख्या** - ताः कन्याः - कुशनाभस्य पुत्रीशतम्, संनद्धयौवनाः - संप्राप्तयौवनाः, कामयमानः - पत्नीभावेन अभिलषन्, पवमानः - वायुः, प्रत्याख्यानात् - अस्वीकरणात्, प्रत्यापन्नमन्युः - उत्पन्नक्रोधः, आसाम् - कन्यानां, अवयवेषु - अङ्गेषु, अनार्जवम् - कौटिल्यं, अतनुत - अकरोत्।

कन्यकानां अङ्गेषु अनार्जवमकरोत्

**सारः** - वायुदेवः कुशनाभस्य पुत्रीशतम् अभिलषमाणः ताः अयाचत ताभिः अस्वीकरणात् कोपेन तासामङ्गेषु कौटिल्यम् अकरोत्।

**गद्यम्**

**अथ विदितवृत्तान्तेन कुशनाभेन तेन क्षमामेव प्रतिक्रियां मन्यमानेन चूलिसूनवे सौमदेयाय राज्ञे ब्रह्मदत्ताय दत्तास्ताः प्रकृतिस्था बभूवुः।**

कन्यकाः शापान्मुक्ताः बभूवुः

**व्याख्या** - अथ - अनन्तरं, विदितवृत्तान्तेन - विदितः - ज्ञातः, वृत्तान्तः - कन्याङ्गकौटिल्योपादनरूपः येन, कुशनाभेन, क्षमाम् एव - न तु क्रोधः, प्रतिक्रियां - प्रतिस्पन्दम्, मन्यमानेन - मत्वा, तेन - कुशनाभेन, चूलिसूनवे सौमदेयाय - चूलिमहर्षेः सोमदेयनामिकायाः गन्धर्वस्त्रियाश्च पुत्राय, राज्ञे

ब्रह्मदत्ताय, दत्ताः - भार्यात्वेन समर्पिताः, ताः - कन्याः, प्रकृतिस्थाः - तन्महिम्ना यथापूर्वस्वरूपाः बभूवुः - अभूवन्।

**सारः** - वायुशापेन पुत्रीणाम् अङ्गवैकल्यं ज्ञात्वापि कुशनाभः शान्तिमेव आश्रितवान्, न तु क्रोधं प्रदर्शयामास। ततश्च चूलिसोमदेयोः पुत्राय ब्रह्मदत्तनामकाय नृपाय स्वपुत्रीः विवाहे प्रदत्तवान्। तत्प्रभावेण च ताः कन्याः शापान्मुक्ताः पूर्वरूपं प्राप्तवत्यः।

**गद्यम्**

**पुनरपि कुशनाभस्तु पुत्रीयन्पितुः प्रसादादगाधसत्त्वान्गाधिसंज्ञानस्मत्ता-तपादानुदपादयत्।**

विश्वमित्रस्य पिता गाधिः

**व्याख्या** - पुनः अपि - भूयः अपि, कुशनाभः तु, पुत्रीयन् - आत्मनः पुत्रमिच्छन्, पितुः - कुशस्य, प्रसादात् - अनुग्रहात्, अगाधसत्त्वान् - अमितपराक्रमशालिनः, गाधिसंज्ञान् - गाधिनामकः, अस्मत्तातपादान् - मम पितरं, उदपादयत् - अजनयत्।

**सारः** - ततः कुशनाभः पुत्रं प्राप्तुम् इच्छन् पितुः कुशस्य अनुग्रहात् गाधिनामकं अमितपराक्रमशालिनं विश्वामित्रस्य पितरम् अजनयत्।

**गद्यम्**

**इत्थं दाशरथिः कौशिकोत्पत्तिकथानिशमननिरायामयामिनीयामानुबन्धो बन्धूकस्तबकसुन्दरबन्धुरेण सन्ध्यारागेण प्राचीमुखेन शोणीकृतेन शोणाभिधानं दधानेन नदेन प्रवर्तितप्रत्यूषकृत्यः कृतनियमेन मुनिना सह गङ्गामुपतिष्ठमानेन पथा प्रातिष्ठत।**

रामादयः गङ्गानदीतीरेण प्रस्थिताः

**व्याख्या** - इत्थं - अनेन प्रकारेण, दाशरथिः - रामः. कौशिक -उत्पत्ति-कथा-निशमन-निरायाम-यामिनी - यामानुबन्धः - कौशिकस्य - विश्वामित्रस्य, उत्पत्तिकथा - जन्मवृत्तान्तः, निशमनेन - श्रवणेन, निरायामः - आयासरहितः, सङ्कुचितः इति यावत् यामिन्यः - रात्रेः, यामानुबन्धः -

प्रहराणां व्याप्तिकालः यस्य सः तथोक्तः। बन्धूकस्तबकसुन्दरबन्धुरेण - बन्धूकस्य गुच्छः तद्वत् सुन्दरेण - रमणीयेन, बन्धुरेण - मनोहरेण, सन्ध्यारागेण - अरुणोदयजातरागेण, प्राचीमुखेन - पूर्वदिग्भागेन, शोणीकृतेन - अनुरञ्जितेन, शोणाभिधानं दधानेन नदेन - शोणा इति नाम धरतः स्रोतसः जलेन, प्रवर्तितप्रत्यूषकृत्यः - प्रवर्तितम् - अनुष्ठितम्, प्रत्यूषकृत्यम् - प्रातराह्निकम् येन तादृशः सन् (प्रत्यूषकर्माणि समाप्य), कृतनियमेन - कृताह्निककृत्येन, मुनिना सह - विश्वामित्रेण सह, गङ्गाम् - भागीरथीम्, उपतिष्ठमानेन - अनुसरता, पथा - मार्गेण, प्रातिष्ठत - अचलत्।

**सारः** - विश्वामित्रस्य जननवृत्तान्तश्रवणेन रात्रिकालः अदीर्घ इव आसीत्। परेद्युः प्रातः अरुणोदयकाले बन्धूकपुष्पगुच्छवत् सुन्दरी पूर्वा दिक्, तया च अरुणितं शोणास्रोतसः जलम्। तत्र प्रातःकृत्यं निर्वर्त्य विश्वामित्रेण सह श्रीरामः गङ्गानदीमार्गेण प्रस्थितः।

## Summarised Overview

विश्वामित्रः स्वस्य यागं समाप्य सीतया सह रामं योजयितुं मिथिलां प्रति प्रतिष्ठते। विश्वामित्रः रामलक्ष्मणौ नयति। तदा विश्वमित्रः स्वस्य उत्पत्तिकथां वर्णयति। कुशः ब्रह्मणः पुत्रः। तस्य चत्वारः पुत्राः। तेषु द्वितीयः कुशनाभः। तस्य शतं कन्यकाः। ताः वायुना शप्ताः अवयवेषु कौटिल्यं प्राप्तवत्याः। किन्तु ब्रह्मदत्तेन साकं तासां पूर्वस्थितिं सम्प्राप्ताः। सः कुशनाभः पुनः पितुः प्रसादेन गाधिनामानं विश्वामित्रस्य पितरं पुत्रत्वेन प्राप्तवान् इति। कथाश्रवणेन मार्गक्लेशं ते न ज्ञातः। प्रभाते रामादयः शोणानदीतीरे प्रातःकालीकं कृत्यं समाप्य गङ्गानदीमार्गेण प्रस्थिताः।

## Assignments

1. कौशिकवृत्तान्तं प्रतिपादयत।
2. कुशनाभपुत्रीणां कथां वर्णयत।
3. विश्वामित्रः किम् अमनुत?
4. कीदृशः कुशाभिधानः?
5. पवमानः किम् अतनुत?
6. ताः कन्यकाः प्रकृतिस्थाः बभूवुः। कथम्?

## Suggested Readings


1. Ramayanacampu of Bhoja, with Ramacnadra's commentary, Nirnayasagar Press Mumbay.
2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnayasagar Press Mumbay. 1933


## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnaya Sagar Press, Bombay, 1898


SGOU

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# भागीरथीकथा

## Learning Outcomes

- इतिहासावबोधः।
- भोजस्य रचनापाटवम् अवगच्छति।
- बालकाण्डे भागीरथीकथाम् अवगच्छति।

## Background

मिथिलां प्रस्थितः विश्वामित्रः मार्गे तेन कुशस्य कथां सूचितवान्। विश्वामित्रस्य पूर्विकस्य कुशस्य चत्वारः पुत्राः। तत्र कुशनाभः द्वितीयः। तस्य कन्याशतमासीत्। याः वायुना शप्ताः पुनश्च ब्रह्मदत्ताय दत्ताः। पुनः ताः प्रकृतिं स्वरूपं प्राप्तवत्यः। ततः कुशनाभः पितुः अनुग्रहेण गाधिनामकं पुत्रं प्राप्तवान्। गाधेः पुत्रः एव विश्वामित्रः। इत्येवं स्वस्य कथां उक्तवान्। ततश्च शोणनदीतीरात् प्रस्थाय गङ्गानदीतीरे विश्वामित्रेण सह रामादयः प्राप्ताः। विश्वामित्रः मार्गे गङ्गायाः वृत्तान्तं वर्णयति। कथं सुरनदी गङ्गा भूमिं आगता?, कथं जाह्नवी इति नाम आप? इत्यादिकथासन्दर्भाः अस्मिन् एकके पश्यामः।

## Keywords

गामिव, मनोरमा, धराभृतां चक्रवर्ती, मन्दाकिनी, चन्द्रचूडकुटुम्बिनी, जाह्नव्यां, सप्तार्चिषा, शरवणे, सरितस्त्रिदिवौकसाम् , सगरो, केशिनीसुमतिभ्यां, भृगुः, असमञ्जं, षष्टिं पुत्रसहस्राणां, कापिले, अंशुमान्, भगीरथः, जाह्नवी।

## Discussion

**पद्यम्**

**आजानपावनक्षीरां वृषानन्दविधायिनीम्।**
**श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव ॥ ५४ ॥**

अन्वयः - सोऽयम् आजानपावनक्षीराम्, वृषानन्दविधायिनीम्, श्रुतिप्रणयिनीम् आपगाम् गाम् इव आप।

गङ्गानद्याः वर्णनम्

**अन्वयार्थः** - सोऽयम् - राक्षसानां विनाशकः श्रीरामः, आजानपावनक्षीराम् - स्वभावेन पवित्रं क्षीरं यस्याः सा ताम्, आजानशब्दः स्वभावे रूढः, अथवा जनानां समूहो जानम्, आङ् समन्तात्, जानम् - जनसमूहम्, पावयति - स्नानपानाभ्यां पवित्रीकरोति, यत् तथाभूतम्, क्षीरम् - जलम्, यस्याः सा तथाभूतम्, वृषैः - यमनियमादिभिः धर्मैः, य आनन्दस्तं विदधाति या सा ताम् वृषानन्दविधायिनीम्, अथवा वृषणामानन्दं विदधाति या सा तथाभूताम् - धर्मादिभिर्वृद्धिकारिणीम्, अथवा वृषस्यानन्दप्रदायिनीम्, श्रुतिप्रणयिनीम् - श्रुतिपरिचितां, वेदपरिचिता-मित्यर्थः, सितासिते सरिते यत्र सङ्गते इति श्रुतिः। अथवा तरङ्गोत्थित-धुम-धुमध्वनिभिः श्रोत्रानन्दप्रदायिनीम्। अपां समूहः आपम्, तेन गच्छतीति आपगा, ताम् आप - प्राप्तवान्, गङ्गातटमाजगामेत्यर्थः। कथभूतामिति चेत् - गामिव - धेनुमिव, धेन्वपि आजानम् - स्वभावतः,

पावनम् - पवित्रम्, क्षीरम् - दुग्धं, यस्यास्ताम्, वृषस्य - वृषभस्य, आनन्दं - रत्युल्लासम्, विदधाति या सा तथाभूताम्। श्रुतिसखिम् - श्रुतिसखीम्, चत्वारि वाक् परिमिता पदानि इति श्रुत्या श्रुतिधेन्वोः साम्यम्। इत्थम्भूतां कामधेनुमिव गङ्गाम् आप।

**सारः** - श्रीरामः स्वभावपरिशुद्धजलयुक्तां, धर्माचरणस्य आनन्दं विदधानां, वेदप्रतिपाद्यां गङ्गानदीं गाम् इव प्राप्तवान्।

**गद्यम्**

**अथ भागीरथीकथां श्रोतुकामाय रामाय भगवानिदमभाषत।**

**व्याख्या** - अथ - अनन्तरं, भागीरथीकथां - गङ्गावतरणवृत्तान्तं, श्रोतुकामाय - श्रोतुं अभिलाषो यस्य तस्मै, रामाय भगवान् , इदम् - वक्ष्यमाणं वचनं, अभाषत - उक्तवान्।

**पद्यम्**

**पुरा मनोरमा नाम सुमेरोरभवत्सुता।**
**गृहमेधी तयैवासीच्चक्रवर्त्ती धराभृताम्॥ ५५॥**

**अन्वयः** - पुरा मनोरमा नाम सुमेरोः सुता अभवत्। धराभृतां चक्रवर्ती तया एव गृहमेधी आसीत्।

हिमालयः मनोरमां परिणितवान्

**अन्वयार्थः** - पुरा - पूर्वकाले, मनोरमा नाम सुमेरोः सुता - मेरुकन्यका, अभवत् - अजायत। धराभृतां - पर्वतानां, चक्रवर्ती - साम्भ्राट् हिमालयः, तया एव - मनोरमया एव, गृहमेधी - गृहस्थः आसीत्।

**सारः** - पूर्वकाले मेरुपर्वतस्य मनोरमानामा पुत्री बभूव, यां हिमालयः परिणीतवान्।

**पद्यम्**

**कन्याद्वयममुष्यासीदेका मन्दाकिनी तयोः।**
**अन्या भगवती साक्षाच्चन्द्रचूडकुटुम्बिनी॥ ५६॥**

**अन्वयः** - अमुष्य कन्याद्वयम् आसीत्। तयोः एका मन्दाकिनी, अन्या साक्षात् भगवती चन्द्रचूडकुटुम्बिनी।

हिमवतः कन्याद्वयं आसीत्

**अन्वयार्थः** - अमुष्य - हिमवतः, कन्याद्वयम् आसीत्। तयोः - पुत्र्योः, एका - आद्या मन्दाकिनी, अन्या - द्वितीया साक्षात्, भगवती - परमेश्वरी, चन्द्र - चूडकुटुम्बिनी - शिवस्य भार्या।

**सारः** - मनोरमाजानेः हिमवतः पुत्रीद्वयं बभूव। तयोः आद्या मन्दाकिनी, कनीयसी प्रत्यक्षपरमेश्वरी, चन्द्रशेखरस्य शिवस्य भार्या।

**पद्यम्**

**तां नदीं विबुधा लब्ध्वा नाकलोकमनीनयन्।**
**तपस्यन्तीं गिरिर्गौरीं देवाय महते ददौ॥ ५७॥**

**अन्वयः** - विबुधाः तां नदीं लब्ध्वा नाकलोकम् अनीनयन्। गिरिः तपस्यन्तीं गौरीं महते देवाय ददौ।

गङ्गा लोकहितार्थं देवतैर्नीता, गौरीं महादेवाय दत्तवान्

**अन्वयार्थः** - विबुधाः -देवाः, तां नदीं - मन्दाकिनीम्, लब्ध्वा - प्राप्य, नाकलोकम् - स्वर्गलोकम्, अनीनयन् - प्रापयामासुः। गिरिः - हिमवान्, तपस्यन्तीं - तपश्चरन्तीं, गौरीं - गौरीनाम्नीं द्वितीयां पुत्रीम्, महते देवाय - महादेवाय, ददौ - दत्तवान्।

**सारः** - देवाः याञ्चापूर्वकं हिमवतः अनुमतिं प्राप्य, तां मन्दाकिनीं नदीं स्वर्गं प्रापितवन्तः। हिमवान् ईश्वरं प्राप्तुं तपः चरन्तीं गौरीनाम्नीं द्वितीयां पुत्रीं महादेवाय शम्भवे दत्तवान्।

**पद्यम्**

**शिवयोर्युञ्जतोर्वीर्यं दृष्ट्वा धात्र्यां समर्पितम्।**
**पावकः प्रतिजग्राह दैवतैरनुनाथितः॥ ५८॥**

**अन्वयः** - युञ्जतोः शिवयोः वीर्यं धात्र्यां समर्पितं दृष्ट्वा दैवतैः अनुनाथितः पावकः प्रतिजग्राह।

शिवयोः वीर्यं भूमौ पतितं अग्निना स्वीकृतम्

**अन्वयार्थः** - युञ्जतोः - मिथुनकर्मतत्परयोः सतोः, शिवयोः, वीर्यं - रेतो, धात्र्यां - पृथिव्यां, समर्पितं - निक्षिप्तं, दृष्ट्वा - दैवतैः - देवैः, अनुनाथितः - प्रार्थितः, पावकः - अग्निः, प्रतिजग्राह - स्वीकृतवान्।

**सारः** - मिलतोः पार्वतीपरमेश्वरयोः रेतः पृथिव्यां पतितं दृष्ट्वा देवैः प्रार्थितः अग्निः तत् स्वीकृतवान्।

अत्रानुष्टुब्वृत्तम्।

पार्वत्याः शापः

**पद्यम्**

**अनपत्यानथामर्त्यान्बहुभार्यां च मेदिनीम्।**
**अकरोदम्बिकाक्रोधः पुत्रालाभसमुद्भवः ॥ ५९ ॥**

**अन्वयः** - अथ पुत्रालाभसमुद्भवः अम्बिकाक्रोधः अमर्त्यान् अनपत्यान्, मेदिनीं बहुभार्यां च अकरोत्।

**अन्वयार्थः** -अथ - अनन्तरं, पुत्रालाभसमुद्भवः - पुत्रप्राप्तिजनितः, अम्बिकाक्रोधः - पार्वतीकोपः, अमर्त्यान् - देवान्, अनपत्यान् - सन्तति - वर्जितान्, मेदिनीं - भुवं, बहुभार्यां - बहूनां राज्ञां , च अकरोत्।

**सारः** - शिवस्य वीर्ये भूमौ पतिते सति, तनयस्य अप्राप्त्या उत्पन्नः पार्वत्याः कोपः देवान् सन्ततिवर्जितान्, भूमिम् अनेकपत्नीं च अकरोत्।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**अथ सेनान्यमिच्छद्भिरुक्तः सब्रह्मभिः सुरैः।**
**वह्निरह्नाय जाह्नव्यां न्यषिञ्चद्वीर्यमैश्वरम्॥ ६० ॥**

शिवस्य वीर्यं गङ्गायां स्थापयामास

**अन्वयः** - अथ सेनान्यम् इच्छद्भिः सब्रह्मभिः सुरैः उक्तः वह्निः ऐश्वरं वीर्यम् अह्नाय जाह्नव्यां न्यषिञ्चत्।

**अन्वयार्थः** - अथ - अनन्तरम्, सेनान्यम् इच्छद्भिः - तारकासुरसंहारार्थं कार्तिकेयं नाम सेनानायकमिच्छद्भिः, सब्रह्मभिः - ब्रह्मादिभिः, सुरैः उक्तः -

देवैः सूचितः, वह्निः - अग्निः, ऐश्वरं - ईश्वरस्य, वीर्यम् - रेतः, अह्नाय - झटिति, जाह्नव्यां - गङ्गायाम्, न्यषिञ्चत् - स्थापयामास।

**सारः** - ततः सेनापतिं कामयमानैः ब्रह्मसहितैः देवैः सूचितः अग्निः ईश्वरस्य रेतोरूपं तेजः झटिति गङ्गायां स्थापयामास।

**पद्यम्**

शिवस्य वीर्यं शरवणे स्थापयामास

**सापि सप्तार्चिषा क्षिप्तं तेजस्तद्वोढुमक्षमा।**
**हिमवत्प्रान्तकान्तारे श्रान्ता शरवणे जहौ॥ ६१॥**

**अन्वयः** - सापि - सा जाह्नव्यपि, सप्तार्चिषा - अग्निना, क्षिप्तं - पातितं, तत् तेजः - तदैश्वरं तेजः वीर्यं, वोढुम् - धारयितुं, अक्षमा - असमर्था, श्रान्ता - खिन्ना, हिमवत्प्रान्तकान्तारे - हिमालयसमीपवर्तिनि वने, शरवणे - शरप्रचुरे वने, जहौ - परितत्याज।

**सारः** - जानह्नव्यपि अग्निना पातितं शिवस्य वीर्यं धारयितुम् असमर्था, खिन्ना सती, हिमालयस्य समीपस्थे शरप्रचुरे वने परितत्याज।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**तत्राभूत्कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम्।**
**तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः॥ ६२॥**

कार्त्तिकेयस्य उत्पत्तिः

**अन्वयः** - तत्र कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम्, षाण्मातुरम्, तारकध्वान्तविध्वंसि महः सद्यः अभूत्।

**अन्वयार्थः** - तत्र - शरवणे, कृत्तिकाप्रीत्यै - स्तन्यं पाययितुं देवैः प्रेरितानां षड्संख्यकानां कृत्तिकामातृणां प्रीत्यै - प्रसन्नतार्थं,

षोढारूढमुखाम्बुजम् - षड्भिः प्रकारैः प्रादुर्भूतानि मुखकमलानि तस्य तादृशं, षाण्मातुरम् - षण्णां मातृणां अपत्यं,तारकध्वान्तविध्वंसि - तारकस्तन्ना-

माऽसुर एव ध्वान्तं - अन्धकारं विध्वंसयति - नाशयतीति, महः - तेजः, सद्यः - तत्कालं, अभूत् - सञ्जातम्।

**सारः** - तस्मिन् शरवणे षण्णां कृत्तिकानां प्रसन्नतार्थं षट् मुखानि बिभ्रत्, तारकासुररूपस्य अन्धकारस्य विनाशकं, कार्त्तिकेयरूपं तेजः तत्क्षणं जातम्।

अत्रानुष्टुब्वृत्तम्।

**पद्यम्**

**त्रैविध्यं श्रूयतां वत्स सरितस्त्रिदिवौकसाम्।**
**यथोक्तं हव्यमश्नन्त्या देवताया इवाध्वरे॥ ६३॥**

**अन्वयः** - वत्स ! अध्वरे यथोक्तं हव्यम् अश्नन्त्याः देवतायाः इव त्रिदिवौकसां सरितः त्रैविध्यं श्रूयताम्।

**अन्वयार्थः** - वत्स ! अध्वरे यथोक्तं हव्यम् अश्नन्त्याः देवतायाः इव त्रिदिवौकसां सरितः त्रैविध्यं श्रूयताम्।

गङ्गावतरणम्

**सारः** - यज्ञेषु शास्त्रविहितं हविः भुञ्जानस्य अग्नेः इव देवनद्याः गङ्गायाः त्रिप्रकारकत्वम् आकर्णय । (गार्हपत्य-आहवनीय-दक्षिणाग्निभेदेन यथा अग्नेः त्रैविध्यम् शास्त्रसमर्थितमस्ति तथेव सुरसरिदपि शास्त्रसमर्थितं त्रैविध्यं भजते।)

अत्र उपमालङ्कारः, अनुष्टुब्वृत्तम्।

**पद्यम्**

**पुरीमयोध्यामध्यास्त सावित्रः सगरो नृपः।**
**केशिनीसुमतिभ्यां च लङ्घितप्रथमाश्रमः॥ ६४॥**

**अन्वयः** - केशिनीसुमतिभ्यां लङ्घितप्रथमाश्रमः, सावित्रः, सगरः नृपः अयोध्यां पुरीम् अध्यास्त।

राजा सगरस्य द्वे भार्ये

**अन्वयार्थः** - केशिनीसुमतिभ्यां - केशिनी सुमति अभिधानाभ्यां पत्नीभ्यां, लङ्घितप्रथमाश्रमः- गृहीतगार्हस्थ्यः, सावित्रः - सूर्यकुलोत्पन्नः, सगरः -

सगरो इत्याख्या, नृपः - राजा, अयोध्यां पुरीम् - अयोध्यानगरीं, अध्यास्त - अधिवसति स्म।

**सारः** - केशिनीसुमतिनामिकां कन्याद्वयं परिणीय गार्हस्थ्यं प्रविष्टः सगरनामकः सूर्यवंशस्य राजा अयोध्यानगरीम् अधिवसति स्म।

अनुष्टुब्वृत्तम्।

**पद्यम्**

**स पुत्रीयन्सपत्नीकस्तपस्तेपे समाः शतम्।**
**भृगुः प्रीतमनास्तस्मै ददौ दायादसम्पदम्॥ ६५॥**

भृगोः प्रसादेन पुत्रान् प्राप्तवान्

**अन्वयः** - सः पुत्रीयन् सपत्नीकः शतं समाः तपः तेपे। प्रीतमनाः भृगुः तस्मै दायादसम्पदं ददौ।

**अन्वयार्थः** - सः - सगरः, पुत्रीयन् - पुत्रमात्मन इच्छन्, सपत्नीकः - पत्नीभ्यां सहितः, शतं समाः - शतवर्षाणि, तपः तेपे - तपोऽकरोत्। प्रीतमनाः - प्रसन्नहृदयः सन्, भृगुः - तन्नाम महर्षिः, तस्मै - सगराय राज्ञे, दायादसम्पदं - पुत्रधनं, ददौ - प्रादात्।

**सारः** - सगरमहाराजः पुत्रमिच्छन् पत्नीभ्यां सह वर्षशतं यावत् तपः अकरोत्। प्रसन्नहृदयः सन् भृगुः तस्मै सगराय सन्तानभाग्यं प्रादात्।

अनुष्टुब्वृत्तम्।

**पद्यम्**

**असमञ्जं सुतं लेभे वैदर्भी केशिनी तयोः।**
**षष्टिं पुत्रसहस्राणां सुमतिश्च यवीयसी॥ ६६॥**

केशिन्याः सुतः असमञ्जः,सुमतेः षष्ठिससहस्राः पुत्राः

**अन्वयः** - वैदर्भी केशिनी असमञ्जं सुतं लेभे। तयोः यवीयसी सुमतिः च पुत्रसहस्राणां षष्टिं लेभे।

**अन्वयार्थः** - वैदर्भी - विदर्भस्य राज्ञोऽपत्यं स्त्री वैदर्भी, तन्नाम्नी ज्येष्ठपत्नी, केशिनी, असमञ्जं - असमञ्जम् इत्याख्यं सुतं - पुत्रं,लेभे - प्राप। तयोः -

केशिनीसुमत्योर्मध्ये, यवीयसी - कनिष्ठा, सुमतिः च पुत्रसहस्राणां षष्टिं - षष्टिसहस्रसंख्याकान् पुत्रान्, लेभे - प्राप।

**सारः** - सगरस्य प्रथमा भार्या, विदर्भदेशोत्पन्ना केशिनी असमञ्जनामकं पुत्रं प्रसूतवती। कनीयसी भार्या सुमतिः तु ६०,००० पुत्रान् प्राप्तवती।

**पद्यम्**

**असमञ्जसचारित्रमसमञ्जमपोह्य सः।**
**आरब्धहयमेधः सन्नमुञ्चत तुरङ्गमम्॥ ६७॥**

**अन्वयः** - सः असमञ्जसचारित्रम् असमञ्जम् अपोह्य आरब्धहयमेधः सन् तुरङ्गमम् अमुञ्चत।

अश्वः दिग्विजयार्थं प्रेषितवान्

**अन्वयार्थः** - सः - सगरः, असमञ्जसचारित्रम् - प्रजोपद्रवकारितया निन्दितवृत्तम्, असमञ्जम् - असमञ्जनामानं केशिनीपुत्रं, अपोह्य - परित्यज्य, आरब्धहयमेधः सन् - उपाक्रान्ताश्वमेधयज्ञः सन्, तुरङ्गमम् - यज्ञीयाश्वम्, अमुञ्चत - त्यक्तवान्।

**सारः** - सगरः दुष्टस्वभावयुक्तं पुत्रम् असमञ्जं परित्यज्य अश्वमेधयज्ञदीक्षितः सन् अश्वं दिग्विजयार्थं प्रेषयामास।

**पद्यम्**

**क्रव्यादवपुषा सोऽयमहारि हरिणा हयः।**
**ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे॥ ६८॥**

**अन्वयः** - सोऽयं हयः क्रव्यादवपुषा हरिणा अहारि। ततः नष्टं तम् अन्वेष्टुं - सौमतेयाः प्रतस्थिरे।

अश्वम् अन्वेष्टुं सौमतेयाः प्रस्थिताः

**अन्वयार्थः** - सोऽयं हयः अश्वमेधोयाश्वः, क्रव्यादवपुषा - राक्षसवेषधारिणा, हरिणा - इन्द्रेण, अहारि - अपहृतः। ततः - अश्वमेधीयाश्वहरणज्ञानान्तरं, नष्टं - अपहृतं, तम् - यज्ञीयमश्वमन्वेष्टुं, अन्वेष्टुं - परिमार्गयितुं, सौमतेयाः - सुमतिगर्भजाताः षष्टिसहस्रसंख्याकाःसगरपुत्राः, प्रतस्थिरे - प्रस्थिताः।

**सारः -** सगरस्य अश्वमेधाश्वः राक्षसवेषधारिणा इन्द्रेण अपहृतः। ततः अदृश्यमानं तम् अश्वं परिमार्गयितुं षष्टिसहस्रसंख्याकाः सुमतिपुत्राः प्रस्थिताः।

**पद्यम्**

**सर्वे सपर्वतामुर्वीं खनन्तः सगरात्मजाः।**
**चक्रुर्झर्झरितध्वान्तं नागलोकं नखांशुभिः॥ ६९॥**

**अन्वयः** - सर्वे सगरात्मजाः सपर्वताम् उर्वीं खनन्तः नखांशुभिः नागलोकं झर्झरितध्वान्तं चक्रुः।

सगरपुत्राः पातालं प्राप्तवन्तः

**अन्वयार्थः** - सर्वे - षष्टिसहस्रसंमितास्ते, सगरात्मजाः - सगरपुत्राः, सपर्वताम् - पर्वतसहिताम्, उर्वीं - भुवं, खनन्तः - अवदारयन्तः, नखांशुभिः -नखकिरणैः, नागलोकं - पातालं, झर्झरितध्वान्तं - झर्झरितं - विनाशितं ध्वान्तं तमो यस्य तादृशं, चक्रुः - कृतवन्तः।

**सारः** - सगरपुत्राः अश्वान्वेषणार्थं पर्वतसहितां भुवं अवदारयन्तः नखकिरणैः पातालं विध्वंसितान्धकारं कृतवन्तः।

**पद्यम्**

**त एते तपसा दीप्ते तमःस्तोमप्रमाथिनि।**
**कापिले ज्वलने वीरा लेभिरे शलभोपमाम्॥ ७०॥**

**अन्वयः** - ते एते वीराः तपसा दीप्ते, तमःस्तोमप्रमाथिनि, कापिले ज्वलने शलभोपमां लेभिरे।

कपिलस्य कोपाग्निना सगरपुत्राः दग्धाः

**अन्वयार्थः** - ते एते वीराः - सर्वे सगरकुमाराः, तपसा व्रतनियमादिरूपया तपस्यया, दीप्ते - प्रज्वलिते, तमःस्तोमप्रमाथिनि - अन्धकारसमूहस्य विनाशके, कापिले - कपिलसंबन्धिनि, ज्वलने - अग्नौ (कोपाग्नौ) शलभोपमां - शलभसदृशं, लेभिरे - प्राप्तवन्तः।

सारः - वीर्यवन्तः सगरपुत्राः तपःशक्त्या प्रज्वालिते, अन्धकारसमूहस्य विनाशके, कपिलमहर्षिसम्भवे अग्नौ शलभसादृश्यं प्राप्तवन्तः। [कपिलस्य कोपाग्निना दग्धाः]

**पद्यम्**

**असमञ्जसुतं पौत्रमंशुमन्तमथाब्रवीत्।**
**सप्तिं हृत्वा समाधत्तां सप्ततन्तुं भवानिति॥ ७१॥**

**अन्वयः** - अथ असमञ्जसुतं पौत्रम् अंशुमन्तम् अब्रवीत् – "भवान् सप्तिं हृत्वा सप्ततन्तुं समाधत्ताम्" इति।

अश्वम् अन्वेष्टुम् अंशुमन्तं नियुक्तवान्

**अन्वयार्थः** - अथ - षष्ठिसहस्रपुत्रमरणानन्तरं (सगरः),असमञ्जसुतं - असमञ्जस्य सुतम्, पौत्रम् - पुत्रस्य पुत्रं, अंशुमन्तम् - अंशुमानित्याख्यं, अब्रवीत् - 'भवान् - त्वम्, सप्तिं - अश्वं, हृत्वा - आनीय, सप्ततन्तुं - यज्ञं, समाधत्ताम् -समापयितु' इति।

**सारः** - अश्वम् अन्वेष्टुं प्रस्थितानां पुत्राणाम् अनागमनेन चिन्तितः सगरः "भवान् अश्वम् आनीय यज्ञसमाप्तिं साधयतु" इति पुत्रस्य असमञ्जस्य तनयम् अंशुमन्तम् उक्तवान्।

**पद्यम्**

**सोऽपि गत्वा बिलं तत्र दृष्ट्वा भस्मीकृतान्पितॄन्।**
**साश्रुस्तेभ्योऽञ्जलिं दित्सुश्चरल्ँलेभे तुरङ्गमम्॥ ७२॥**

अंशुमान् दग्धान् पितृव्यान् अश्वं च प्राप्तवान्

**अन्वयः** - सः अपि बिलं गत्वा, तत्र भस्मीकृतान् पितॄन् दृष्ट्वा, साश्रुः तेभ्यः अञ्जलिं दित्सुः चरन् तुरङ्गमं लेभे।

**अन्वयार्थः** - सः अपि - अंशुमानपि, बिलं - पातालाभ्यन्तरदेशं गत्वा, तत्र - बिले, भस्मीकृतान् - कपिलकोपाग्निना भस्मतां नीतान्, पितॄन् - पितृस्थानीयान् (सुमतिपुत्रान्), दृष्ट्वा, साश्रुः - बाष्पाकुलाक्षः सन्, तेभ्यः -

पितृभ्यः, अञ्जलिं - तर्पणाञ्जलिं, दित्सुः - दातुमिच्छुः, चरन् - पर्यटन्, तुरङ्गमं - यज्ञाश्वम्, लेभे - प्राप्तवान्।

**सारः** - अंशुमान् पितृव्यान् अन्विष्यन् सगरपुत्रैः निखातं गर्तं प्राप्य, ततः पातालं प्रविश्य, तत्र दग्धान् तान् वीक्ष्य बाष्पसहितः तेभ्यः तर्पणं दातुमिच्छन् यदा अटति स्म, तदा तत्रैव अश्वं प्राप्तवान्।

**पद्यम्**

**मातुलो गरुडस्तेषामेनं तत्रैवमब्रवीत्।**
**गङ्गामिहानयायुष्मन्नेषामेषा गतिः परा ॥ ७३ ॥**

**अन्वयः** - तत्र तेषां मातुलः गरुडः एनम् एवम् अब्रवीत् - आयुष्मन् ! गङ्गाम् इह आनय, [यतः] एषा एषां परा गतिः।

'गङ्गां पातालं आनय' मातुलः अकथयत्

**अन्वयार्थः** - तत्र - पाताले, तेषां - सुमतिपुत्राणां, मातुलः गरुडः, एनम् - अंशुमन्तम्, एवम् - अनेन प्रकारेण, अब्रवीत् - उवाच, आयुष्मन् ! गङ्गाम् इह आनय, [यतः] एषा - गङ्गा, एषां - भस्मीकृतानां सुमतिपुत्राणां, परा गतिः - परलोकप्रापिका।

**सारः** - तस्मिन् समये मातुलः गरुडः तत्रागत्य अंशुमन्तम् इत्थम् अकथयत् - 'भोः चिरञ्जीविन् ! गङ्गाम् पातालम् आनय, सा एव एतेषां तव पितॄणां सद्गतिं दातुं समर्था'।

**पद्यम्**

**ततस्तनयवृत्तान्तं श्रुत्वा लब्धतुरङ्गमः।**
**समाप्य सगरः सत्रं पुत्रशोकाद्दिवं गतः ॥ ७४ ॥**

सगरः दिवंगतः

**अन्वयः** - ततः तनयवृत्तान्तं श्रुत्वा लब्धतुरङ्गमः सगरः सत्रं समाप्य पुत्रशोकात् दिवं गतः।

**अन्वयार्थः** - ततः - तदनन्तरं, तनयवृत्तान्तं - पुत्राणां विनाशवार्तां, श्रुत्वा, लब्धतुरङ्गमः - प्राप्तः यज्ञाश्वः येन सः (सम्प्राप्ताश्वः), सगरः, सत्रं समाप्य -

यज्ञं पूर्णं कृत्वा, पुत्रशोकात् - षष्ठिसहस्रपुत्रमरणजनितशोकाद्धेतोः, दिवं गतः - मृतः।

**सारः** - तदनन्तरम् (अंशुमति अश्वेन सह प्रत्यागते), सगरः सुतानां वार्तां श्रुत्वा, अश्वं प्राप्य अश्वमेधयज्ञं पूरयित्वा, पुत्रमरणस्य दुःखेन मृतः।

**पद्यम्**

**अथांशुमानयं राज्यं चिराय परिपालयन्।**
**दिलीपे न्यस्तभूभारस्तपस्तेपे हिमालये॥ ७५॥**

अंशुमान् हिमालयं गतवान्

**अन्वयः** - अथ अयम् अंशुमान् राज्यं चिराय परिपालयन् दिलीपे न्यस्तभूभारः हिमालये तपः तेपे।

**अन्वयार्थः** - अथ - अनन्तरं, अयम् - सगरपौत्रः, अंशुमान् राज्यं - राज्ञः कर्म, चिराय - चिरकालं, परिपालयन् - कुर्वन्, दिलीपे - दिलीपनाम्नि पुत्रे, न्यस्तभूभारः - क्षिप्तः राज्यभारः, हिमालये, तपः तेपे - तपश्चरितु-मारब्धवान्।

**सारः** - सगरस्य मरणानन्तरं तत्पौत्रः अंशुमान् बहुकालं राज्यभारम् ऊढ्वा वार्द्धक्ये पुत्रं दिलीपं सिंहासने अभिषिच्य स्वयं हिमालयं गत्वा (गङ्गायाः आनयनार्थम्) तपश्चर्यां चकार।

**पद्यम्**

**दिलीपेऽपि दिवं याते श्रुत्वा वृत्तं भगीरथः।**
**अमर्त्यसरितं कर्तुं मेने मर्त्यतरङ्गिणीम्॥ ७६॥**

भगीरथः गङ्गां मनुष्यलोकं आनेतुं निश्चितवान्

**अन्वयः** - दिलीपे अपि दिवं याते भगीरथः वृत्तं श्रुत्वा अमर्त्यसरितं मर्त्यतरङ्गिणीं कर्तुं मेने।

**अन्वयार्थः** - दिलीपे - अंशुमतः पुत्रः, अपि, दिवं याते - स्वर्गं गते, भगीरथः - दिलीपस्य सुतः, वृत्तं - पूर्वजानां चरितं, श्रुत्वा, अमर्त्यसरितं - देवनदीं, मर्त्यतरङ्गिणीं - मानुषसरितं, कर्तुं मेने - निश्चयमकरोत्।

**सारः** - अंशुमतः अनन्तरं राज्यं परिपाल्य तत्पुत्रः दिलीपः अपि स्वस्य वार्द्धक्ये गङ्गां भुवमानेतुं तपः कृत्वा विफल एव दिवङ्गतः। तस्मिन् स्वर्गते तत्पुत्रः भगीरथः पूर्वजानां चरितं श्रुत्वा देवनदीं गङ्गां मनुष्यलोकम् आनेतुं निश्चयमकरोत्।

**पद्यम्**

**ततो गोकर्णमासाद्य तपस्यति भगीरथे।**
**देवो देवापगां वोढुमन्वमंस्त दयानिधिः॥ ७७॥**

शिवस्य अनुग्रहः प्राप्तः

**अन्वयः** - ततः भगीरथे गोकर्णम् आसाद्य तपस्यति, दयानिधिः देवः देवापगां वोढुम् अन्वमंस्त।

**अन्वयार्थः** - ततः - भगीरथस्य निश्चयानन्तरं, भगीरथे, गोकर्णम् - गोकर्णाख्यं, आसाद्य - प्राप्य, तपस्यति - तपश्चरति, दयानिधिः - करुणासागरः, देवः - शिवः, देवापगां -देवनदीं गङ्गाम्, वोढुम् - शिरसा धारयितुम्, अन्वमंस्त -अङ्गीकृतवान्।

**सारः** - एवं निश्चित्य भगीरथः गोकर्णक्षेत्रं प्राप्य चिरं तपश्चचार। तस्य तपसा प्रीतः करुणानिधिः शिवः देवनदीं गङ्गां स्वस्य जटासु धर्तुम् अङ्गीचकार।

**पद्यम्**

**अथ वीचीचयच्छन्नदिगन्तगगनान्तरा।**
**शशाङ्कशङ्खसम्भिन्नतारामौक्तिकदन्तुरा॥ ७८॥**

गङ्गावतरणस्य वर्णनम्

**अन्वयः** - अथ वीचीचयच्छन्नदिगन्तगगनान्तरा शशाङ्कशङ्खसम्भिन्नतारा-मौक्तिकदन्तुरा (सुरलोकतरङ्गिणी पपात)

**अन्वयार्थः** - अथ भगवति शङ्करे प्रसन्ने जाते, वीचीनाम् - तरङ्गाणाम्, चयैः - परम्पराभिः, छन्नम् - आच्छादितम्, दिगन्तगगनान्तरा - नभोऽन्तरालं, च यस्याः सा (वीचीसमूहेन नभोमण्डलम् आच्छादयन्ती) शशाङ्कः - चन्द्रः, एव शङ्खः, तेन सम्भिन्नानि - सङ्गतानि, यानि तारामौक्तिकानि - तारारूपाणि

मुक्तमणयः, तैः दन्तुरा - परिगता, गङ्गा भुवोऽभिमुखं पपात (सुरलोकतरङ्गिणी पपात)

**सारः** - स्वस्य तरङ्गाणां समूहेन सम्पूर्णं नभोमण्डलम् आच्छादयन्ती, चन्द्ररूपेण शङ्खेन सङ्गतैः तारारूपैः मुक्तामणिभिः परिगता (गङ्गा शिवस्य जटाकुहरे पपात)

**पद्यम्**

**तरङ्गाकृष्टमार्ताण्डतुरङ्गायासितारुणा।**
**फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा॥ ७९॥**

**अन्वयः**- तरङ्ग-आकृष्ट-मार्ताण्ड-तुरङ्ग-आयासित-अरुणा फेन-छन्न-स्व- मातङ्ग -मार्गण-व्यग्र-वासवा (सुरलोकतरङ्गिणी पपात)।

**अन्वयार्थः** - तरङ्गैः - वीचिभिः, आकृष्टाः - अमार्गप्रवर्तिताः, ये मार्ताण्डस्य - सूर्यस्य, तुरङ्गाः - अश्वाः, तैः आयासिताः - स्वमार्गप्रवृत्तेन क्लेशितः, अरुणः - सूर्यस्य सारथिः, यया सा, तथा फेनैः- डिण्डिरसमूहैः, छन्नः - आच्छादितः, यः स्वमातङ्गस्य - स्वकीयहस्तिनः ऐरावतस्य, मार्गणे - अन्वेषणे, व्यग्रः वासवः - इन्द्रः यस्याः सा इत्थम्भूता गङ्गा भुवोऽभिमुखं पपात।

**सारः** - यदा गङ्गा आकाशात् भूमिम् अवतरति, तदा आकाशे तस्याः वीचिभिः सूर्याश्वाः मार्गभ्रष्टाः, तेषां नियन्त्रणं कर्तुं प्रयतमानः सूर्यसारथिः अरुणः नितरां श्रान्तः। पुनश्च, सरभसं प्रवहन्त्याः तस्याः फेनैः शुभ्रवर्णः इन्द्रस्य गजः ऐरावतः आच्छन्नः, तम् अन्विष्यन् इन्द्रः सम्भ्रान्तः।

**पद्यम्**

**आविःशाखाशिखोन्नेयनन्दनद्रुमकर्षणा।**
**एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा॥ ८०॥**

**अन्वयः** - आविःशाखाशिखोन्नेयनन्दनद्रुमकर्षणा एकोदकनभोमार्गदिङ्मूढ-दिव - सेश्वराः (सुरलोकतरङ्गिणी पपात)

**अन्वयार्थः** - आविः - प्रत्यक्षाः, याः शाखानाम् - वृक्षशाखानाम्, शिखाः - अग्रभागाभिः, उन्नेयम् - अनुमातुं शक्यम्, नन्दनस्य - देवानां नन्दनोद्यानस्य, द्रुमाणाम् - वृक्षाणाम्, मन्दारकल्पवृक्षादिकानाम्, कर्षणम् - प्रवारणं, यस्याः सा तथाभूता, एकोदकम् - केवलं जलाप्लुतम्, यत् नभः - आकाशः, मार्गे - पथि, दिङ्मूढाः - दिशया विषये ज्ञानशून्याः, त्रिदशेश्वरः - सूर्यः, यया सा तथाभूताः भुवोऽभिमुखं पपात।

**सारः** - गङ्गाप्रवाहेण नन्दनवनस्य वृक्षाः आकृष्टाः नीयन्ते स्म, तत्रापि तेषां प्रकाण्डानां जलनिमग्नत्वात् शाखाग्रभागाः एव दृश्यन्ते स्म, येषां दर्शनेन इमे नन्दनद्रुमाः इति अनुमितिः करणीया। किञ्च, सर्वत्र नभोमण्डलस्य जलाप्लावितत्वेन सूर्योऽपि दिग्भ्रान्तः बभूव।

**पद्यम्**

**आवर्तगर्तसम्भ्रान्तविमानप्लवविप्लवा।**
**नीलजीमूतशैवालकृतरेखाहरित्तटा॥ ८१॥**

**अन्वयः** - आवर्त - गर्त - सम्भ्रान्त - विमान - प्लव - विप्लवा, नील - जीमूत-शैवाल -कृत-रेखा-हरित्-तटा(सुरलोकतरङ्गिणी पपात)

**अन्वयार्थः** - आवर्ताः - अम्भसां भ्रमाः, ते एव गर्ताः - कुहराणि, तेषु सम्भ्रान्तानि - परिभ्रमणानि, यानि विमानानि - व्योमयानानि, एव प्लवाः- उडुपानि, तेषां विप्लवः - विशिष्टप्लवनं यस्यां सा, नीलाः जीमूताः - नीलमेघाः, ते एव शैवलानि - जलनील्यः, तैः कृताः - विरचिताः, रेखाः - श्रेणयः येषां, तानि हरित्तटानि - दिक्कूलानि यय सा तथाभूताः भुवोऽभिमुखं पपात।

**सारः** - गङ्गायाः जलभ्रमेषु भ्रममाणानि व्योमयानानि उडुपानीव प्लवमानानि दृश्यन्ते स्म। जलस्य राभस्येन दूरोत्क्षिप्ताः नीलमेघाः दिगन्तेषु नदीकूले श्रेणीकृताः शैवाला एव दृश्यन्ते स्म।

**पद्यम्**

**अवलेपभराक्रान्ता सुरलोकतरङ्गिणी।**
**पपात पार्वतीकान्तजटाकान्तारगह्वरे॥ ८२॥**

**अन्वयः** - अवलेपभराक्रान्ता सुरलोकतरङ्गिणी पार्वतीकान्तजटाकान्तार-गह्वरे पपात।

**अन्वयार्थः** - अवलेपस्य - गर्वस्य, भरेण - भारेण, आक्रान्ता - पूरिता, सुरलोकतरङ्गिणी - देवनदी गङ्गा,पार्वतीकान्तस्य - शिवस्य, जटा - कपर्दः एव, कान्तारस्य - महारण्यस्य, गह्वरे - कुहरे, पपात - पतिता।

**सारः** - गर्वभारेण पूरिता देवनदी गङ्गा शिवस्य कपर्दरूपस्य अरण्यस्य महाकुहरे पतिता।

**पद्यम्**

**अलब्धनिर्गमा शम्भोः कपर्दादमरापगा।**
**दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम्॥ ८३॥**

शिवस्य कपर्दे संलग्ना बभूव गङ्गा

**अन्वयः** - शम्भोः कपर्दात् अलब्धनिर्गमा अमरापगा दूर्वाशिखालग्नतुषार-कणिकोपमां दधौ।

**अन्वयार्थः** - शम्भोः - शिवस्य, कपर्दात् - जटाजूटात्, अलब्धनिर्गमा - बहिर्गन्तुमसमर्था, अमरापगा - देवनदी, दूर्वाशिखालग्नतुषारकणिकोपमां - दुर्वायाः शिखायामग्रभागे लग्ना - संसक्ता तुषारकणिका हिमबिन्दुस्तस्य उपमां सादृश्यं दधौ - धृतवती।

**सारः** - शिवस्य जटाजूटात् बहिर्गमनमार्गम् अप्राप्य देवनदी गङ्गा दूर्वाग्रे संसक्तस्य अल्पस्य हिमबिन्दोः सादृश्यं प्राप्तवती।

**पद्यम्**

**अदृष्ट्वा तां नदीं तत्र तुष्टाव परमेश्वरम्।**
**भगीरथो विधेः क्रौर्यात्परिक्षीणमनोरथः॥ ८४॥**

**अन्वयः** - भगीरथः तां नदीं तत्र अदृष्ट्वा विधेः क्रौर्यात् परिक्षीणमनोरथः परमेश्वरं तुष्टाव।

शिवं तोषयितुं भगीरथस्य प्रयत्नः

**अन्वयार्थः**- भगीरथः तां नदीं - सुरसरितम्, तत्र - हरजटाजूटे,अदृष्ट्वा - अवलेक्य, विधेः - देवस्य, क्रौर्यात् - प्रातिकुल्यात्, परिक्षीणमनोरथः - प्रणष्टः मनोरथः गङ्गाऽऽनयनरूपो यस्य स तादृशः सन्, परमेश्वरं - शिवं, तुष्टाव - स्तुतवान्।

**सारः** - भगीरथः महादेवस्य जटाजाले संलग्नां गङ्गां बहिः अप्रसृतां वीक्ष्य निराशः सन् पुनरपि परमेश्वरमुद्दिश्य तपश्चकार।

**पद्यम्**

**गङ्गा सप्ताकृतिर्जाता न्यपतद्धरमूर्धनि।**
**तेन स्तुत्या प्रसन्नेन क्षिप्ता बिन्दुसरस्यपि॥ ८५॥**

**अन्वयः** - स्तुत्या प्रसन्नेन तेन (सा) बिन्दुसरसि क्षिप्ता गङ्गा सप्ताकृतिर्जाता धरमूर्धनि, न्यपतत्।

गङ्गायाः सप्तधाराः

**अन्वयार्थः** - गङ्गा - भागीरथी, सप्ताकृतिः - सप्तसु धारासु संविभक्तः जाता - संजाता, धरमूर्धनी - हिमवतः शिखरे, न्यपतत् - पपात। स्तुत्या- भगीरथकृतया स्तुत्या, प्रसन्नेन - प्रसन्नतां गतेन, तेन - शिवेन, सा गङ्गा, बिन्दुसरसि - बिन्दुसरोवरे अपि, क्षिप्ता-निक्षिप्ता सञ्जाता।

**सारः** - भगीरथस्य प्रार्थनया तुष्टः परमेश्वरः गङ्गां भूमौ क्षिप्तवान्। सप्तसु धारासु विभक्ता गङ्गा हिमालयशिखरे पपात, तस्याः बिन्दवः भगीरथस्य तपःक्षेत्रेऽपि पतिताः, यैः बिन्दुसरोवरनामकं पुण्यतीर्थं बभूव।

**पद्यम्**

**तासु प्राचीं गतास्तिस्रस्तिस्रः प्राचेतसीं दिशम्।**
**अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ॥ ८६ ॥**

**अन्वयः** - तासु तिस्रः प्राचीं गताः, तिस्रः प्राचेतसीं दिशं गताः । अन्या पितृक्रियोद्युक्तभगीरथपथानुगा (जाता) ।

भगीरथपथानुगा

**अन्वयार्थः** - तासु - गङ्गायाः सप्तसु धारासु, तिस्रः धाराः, प्राचीं - पूर्वदिशम्, गताः, तिस्रः धाराः, प्राचेतसीं - पश्चिमदिशं गताः। अन्या - अवशिष्टा एका धारा, पितृक्रियोद्युक्तभगीरथपथानुगा - सगराणां तर्पणं चिकीर्षतः भगीरथस्य मार्गम् अनुसरमाणा जाता।

**सारः** - गङ्गायाः सप्तसु धारासु तिस्रः पूर्वां दिशं गतवत्यः । तिस्रः पश्चिमां दिशं गतवत्यः। सप्तमी धारा पितॄणां तर्पणं चिकीर्षतः भगीरथस्य मार्गम् अनुसृतवती।

**पद्यम्**

**सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत्।**
**तां स पीत्वा ततः शान्तो जहौ श्रोत्रेण वर्त्मना ॥ ८७ ॥**

**अन्वयः** - सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत्। सः तां पीत्वा ततः शान्तः श्रोत्रेण वर्त्मना जहौ।

भगीरथस्यश्रोत्रमार्गेण गङ्गा बहिरागता

**अन्वयार्थः** - सैषा भागीरथी - भगीरथस्यापत्यं स्त्री गङ्गा, जह्नोः - जह्नुरित्यरव्यमुनेः, सत्रक्षेत्रं - यज्ञभूमिं, समावृणोत् - जलमग्नमकरोत्। सः - जह्नुः, तां - गङ्गां, पीत्वा, ततः - गङ्गायास्तथाचरणजनितकोपान्निपीय, शान्तः - भगीरथकृतस्तुत्या कोपान्मुक्तः, श्रोत्रेण - कर्णेन, वर्त्मना - मार्गेण, जहौ - परित्यक्तवान्।

**सारः** - भगीरथम् अनुगच्छन्ती गङ्गा मार्गे जह्नुमहर्षेः यागभूमिं जलैः आप्लावितवती । क्रुद्धः जह्नुः गङ्गां समन्ततः पीतवान्। ततश्च भगीरथस्य स्तुत्या प्रसन्नः तां कर्णमार्गेण बहिः त्यक्तवान्।

**पद्यम्**

**तया तटिन्या जाह्नव्या प्रापयन्त्रिदिवं पितॄन्।**
**भगीरथः पुरं प्राप परिपूर्णमनोरथः॥ ८८॥**

**अन्वयः** - तया जाह्नव्या तटिन्या पितॄन् त्रिदिवं प्रापयन् भगीरथः परिपूर्णमनोरथः पुरं प्राप।

भगीरथः परिपूर्णमनोरथः जातः

**अन्वयार्थः** - तया जाह्नव्या - जह्नोः श्रोत्रनिर्गतया गङ्गया, तटिन्या - नद्या, पितॄन् - स्वपूर्वजान् कपिलकोपानलभस्मीकृतान् सुमतिपुत्रान्, त्रिदिवं - स्वर्गं, प्रापयन्, भगीरथः, परिपूर्णमनोरथः - सफलाभिलाषः सन्, पुरं - अयोध्यां, प्राप - आजगाम।

**सारः** - जह्नोः श्रोत्रमार्गेण निर्गता गङ्गा "जाह्नवी" इति ख्याता। तां नदीं पातालं नीत्वा सुमतिपुत्राणां सद्गतिं साधयित्वा भगीरथः सफलसङ्कल्पः सन् स्वनगरं अयोध्यां प्रत्यागच्छत्।

## Summarised Overview

अस्मिन् एकके आदौ गङ्गायाः कथां रामं प्रति वर्णयति विश्वामित्रः। तत्र मनोरमा इति मेरोः पुत्रीं हिमालयः परिणीतवान्। तयोः कन्याद्वयं आसीत्। गङ्गा लोकहितार्थं देवैर्नीता स्वर्नदी जाता। तपश्चरन्तीं गौरीं हिमालयः महादेवाय दत्तवान्। उमा शङ्करेण परिणीता। तत्र शिवस्य वीर्ये भूमौ पतिते सति पार्वती क्रोधेन देवं भूमिं च शप्तवती। अग्निः शिववीर्यं स्वीकृत्य गङ्गायां स्थापयामास। गङ्गा शरवणे त्यक्तवती। तत्र कार्त्तिकेयस्य उत्पत्तिः भवति। स च कृत्तिकाभिः स्तन्यप्रदानेन पाल्यते इत्येषा कथा दृष्टा। ततः गङ्गा कथं भूमिं आगता इत्येतत् विषये विश्वामित्रः श्रीरामं कथयति। तत्र आयोध्यायां सगरः इति नाम महाराजः आसीत्। तस्य द्वे भार्ये केशिनी सुमतिश्च। सः पुत्रान् प्राप्तुं तपः कृतवान्। भृगोः प्रसादेन पुत्रान् प्राप्तवान्। तस्य प्रथमा भार्या केशिनी असमञ्जनामकः पुत्रं असूत। द्वितीया सुमतिः षष्ठिसहस्रं पुत्रान् असूत। सगरः अश्वमेधयज्ञं आरब्धवान्। तस्य अश्वमेधस्य यज्ञे

अश्वः दिग्विजयार्थं प्रेषितः। स च राक्षसवेषधारिणा इन्द्रेण अपहृतः। तस्य अश्वस्य अन्वेषणार्थं सुमतेः पुत्राः प्रस्थिताः यतो हि पुत्रः असमञ्जः पूर्वमेव सगरेण दूरीकृतः। भूमौ सर्वत्र अन्विष्य अश्वम् अप्राप्य पृथ्वीं खनन्तः पातालं प्राप्तवन्तः। तेषां नखानां कान्त्या पातालस्य अन्धकारः नष्टः इति कविः वर्णयति। तत्र पाताले कपिलमहर्षिः तपश्चरन्नासीत्। कपिलस्य समीपे सः अश्वः बद्धः आसीत्। तं दृष्ट्वा कपिलः एव चोरः इति मत्वा सगरपुत्राः तं आक्रान्तवन्तः। यथा सः नेत्रे उन्मीलीतवान् तथा तस्य कोपाग्निना ते सर्वेऽपि दग्धाः। ततः सगरः अश्वान्वेषणार्थं अंशुमन्तं प्रेषयामास। अंशुमान् पातालं गत्वा अश्वं लब्ध्वा दग्धान् पितॄन् पश्यति। गङ्गां पातालमानेतुं गरुडेन उक्तः अंशुमान्। यज्ञं समाप्य दिवङ्गतः सगरः। सगरस्य पौत्रः अंशुमान् राजा बभूव। बहुकालं राज्यं शासित्वा ततः पुत्रं दिलीपं सिंहासने उपावेश्य स्वयं तपः कृतवान्। दिलिपोऽपि स्वस्य कालानन्तरं पुत्रं भगीरथं राज्ये नियोज्य स्वयं गङ्गां यतितवान्। तस्य यत्नः विफलोऽभूत्। सोऽपि दिवङ्गतः। ततः युवा पूर्वजानां कथां श्रुत्वा कथञ्चित् गङ्गां आनीतव्यम् इति सङ्कल्पं चकार। तदनु गोकर्णक्षेत्रं गत्वा तपः कर्तुं प्रवृत्तः। ततश्च शिवः गङ्गां वोढुं अङ्गीकृतवान्। आकाशात् अवतरयन्तीं गङ्गां श्लोकचतुष्टयेन वर्णनं अकरोत् आलङ्कारिकशैल्या भोजाराजः चम्पूरामायणे। इत्थम्भूता गङ्गा अवलेपभराक्रान्ता भागीरथी भगवतः शङ्करस्य जटाकान्तारगह्वरे पपात। भगवतः शङ्करस्य जटारण्यात् निर्गन्तुमक्षमक्षमा गङ्गा तथैव शोभते स्म यथा दुर्वाशिखायां तुषारकणिका राजते। गङ्गायाः तां दशां दृष्ट्वा भगीरथो भगवन्तं शङ्करं तुष्टाव। तेन प्रसन्नेन भगवता शङ्करेण परित्यक्ता भागीरथी सप्तधारावर्तिनी भूत्वा हिमालये पपात। ततः सा बिन्दुसरस्यगात्। तासां सप्तधारासु तिस्रः प्राच्यां दिशायां तिस्रश्च प्रतीच्यां धाराः गताः। सप्तमी च धारा राजानं भगीरथमनुससार। तथैव भागीरथ्या राजा भगीरथः स्वपितॄणां जलक्रियां सम्पादयामास, पुनः परिपूर्णमनोरथः स्वराजधानीमगत्।

## Assignments

**निर्दिष्टाभ्यासः**

1. चम्पूरामायणमाश्रित्य भागीरथीकथां वर्णयत।

2. चम्पूरामायणमाश्रित्य आकाशात् अवतरन्त्याः गङ्गायाः वर्णनम्
3. सगरः कः ? सगरस्य अश्वमेधयज्ञं विशदयत।
4. चम्पूरामायणमाश्रित्य कार्तिकेयजन्मकथां वर्णयत।

**व्याख्यात**

1. आजानपावनक्षीरां वृषानन्दविधायिनीम्।
   श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव।।

2. सर्वे सपर्वतामुर्वीं खनन्तः सगरात्मजाः।
   चक्रुर्झर्झरितध्वान्तं नागलोकं नखांशुभिः॥

**ससन्दर्भं व्याख्यात**

1. तत्राभूत्कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम्।
   तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः॥

2. स पुत्रीयन्सपत्नीकस्तपस्तेपे समाः शतम्।
   भृगुः प्रीतमनास्तस्मै ददौ दायादसम्पदम्॥

3. क्रव्यादवपुषा सोऽयमहारि हरिणा हयः।
   ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे॥

**उत्तरयत -**

1. पार्वत्याः शापमधिकृत्य लिखत।
2. गङ्गायाः त्रैविध्यं - विशदयत।

## Suggested Readings

1. Ramayanacampu of Bhoja, with Ramacnadra’s commentary, Nirnayasagar

Press Mumbai.

2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnayasagar Press Mumbay. 1933

## References

1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnayasagar Press, Bombay, 1898

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

SGOU

UNIT 3

# अहल्यावृत्तान्तः

## Learning Outcomes

- चम्पूकाव्यानां वैशिष्ट्यम् अवगच्छति।
- इतिहासकाव्यानां मूल्यानाम् अवबोधनम्।
- बालकाण्डे अहल्यायाः वृत्तान्तं रामस्य प्रभावश्च अवगच्छति।

## Background

भोजस्य चम्पूरामायणे बालकाण्डे द्वितीये एकके कार्तिकेयस्य उत्पत्तिः, गङ्गायाः अवतरणं, भागीरथी कथा, इत्यादिकथासन्दर्भाः अधीताः। अस्मिन् एकके अहल्यायाः वृत्तान्तं, अहल्यायाः शापमोचनं, रामस्य प्रभावम् इत्यादिविषयान् ज्ञातुं शक्यते। तत् पश्यामः।

## Keywords

गाधिनन्दनं, विशालांपुरीं, दैतेयनिधनं, शतधारपाणिना, कुशप्लवे, दितिः, सप्तमरुतः, अलम्बुषायां, गौतमधर्मदारान्, हिमाद्रिं, वृषणं, एनसः, पादरजसा

## Discussion

**गद्यम्**

**अथ दाशरथिराकर्णितभागीरथीकथस्तां सरितं विलङ्घ्य विशालां विलोक्य पुरीं कस्येयमिति गाधिनन्दनमपृच्छत्। सोऽप्येवमवोचत्।**

विशालनगर्याः परिचयः

**व्याख्या** - अथ - अनन्तरम्, आकर्णिता - श्रुता, भागीरथीकथः - भागीरथ्याः कथा येन सः, दाशरथिः - रामः, तां सरितं - गङ्गां, विलङ्घ्य उत्तीर्य, विशलां पुरीं - विशालानाम्नीं पुरीं, विलोक्य -दृष्ट्वा, कस्य इयम् - अस्याः पुर्याः कः स्वमी, इति, गाधिनन्दनम् -विश्वामित्रं, अपृच्छत् - पृष्टवान्। सः अपि - विश्वामित्रोऽपि, एवम् - वक्ष्यमाणप्रकारेण, अवोचत् - उक्तवान्।

**सारः** - श्रीरामः गङ्गायाः कथां श्रुत्वा तां नदीं उत्तीर्य विशालानाम्नीं नगरीं प्राप्य तस्याः विषये ज्ञातुं विश्वामित्रं पृष्टवान्। विश्वामित्रः अपि इत्थम् उक्तवान्।

**गद्यम्**

**पुरा खलु सुरासुराणां सुधानिमित्तं मिथो विरोधे प्रवृत्ते मायां विश्वमोहिनीं विश्वरूपः प्रदर्श्य दैतेयनिधनं शतधारपाणिना कारयामास।**

सुरासुराणां युद्धे देवेन्द्रः जयं प्राप्तवान्

**व्याख्या** - पुरा खलु - पूर्वकाले, विश्वरूपः- विष्णुः, सुर-असुराणां - देवानां दानवानां च, सुधा-निमित्तं - सुधालाभार्थं, मिथः - परस्परं, विरोधे प्रवृत्ते - वैरेप्रवृत्ते, (सति), विश्वमोहिनीं - जगन्मोहकरूपान्वितां, मायां - इन्द्रजाल-

क्रियां, प्रदर्श्य - दर्शयित्वा, शतधारपाणिना - इन्द्रेण, दैतेयाः - दितेरपत्यानि पुमांसो दैतेयाः, निधनं - विनाशं, कारयामास - कारितवान्।

**सारः** - प्राक्काले समुद्रमथनसमये अमृतप्राप्तये देवासुराणां परस्परं वैरं सञ्जाते मोहिनीरूपं धृत्वा विष्णुः देवेभ्यः अमृतं प्राप्य ततः प्रवृत्ते युद्धे देवेन्द्रः जयं प्रापितवान्।

**गद्यम्**

**तेषां जननी दितिरतिवेलमन्युः शतमन्युशासनं कमपि पुत्रं लब्धुकामा पत्युर्मारीचस्य वचनात्कुशप्लवे सुचिरं तपश्चचार।**

दितेः तपः

**व्याख्या** - तेषाम् - दैतेयानां, जननी - माता, दितिः - दितिः इति नाम्ना अतिवेलमन्युः - अत्यन्तकुपिता, शतमन्युः - इन्द्रः, शासनं- हन्तारं, कम् अपि - बलवन्तं, पुत्रं - सुतं, लब्धुकामा - ईप्समाना, पत्युः- भर्तुः, मारीचस्य - मरीचिपुत्रस्य कश्यपस्य, वचनात् -आदेशात्, कुशप्लवे - कुशप्लवनामके तपोवने, सुचिरम् - बहुकालपर्यन्तं, तपः चचार - तपस्यां अकरोत्।

**सारः** - पुत्राणां मारणेन क्रुद्धा दितिः इन्द्रहन्तारं बलवन्तं पुत्रमपेक्ष्य भर्तुः कश्यपस्य आदेशानुगुणं कुशप्लवनामके तपोवने बहुकालं तपः कृतवती।

**गद्यम्**

**तां कैतवेन शुश्रूषमाणः शतधारपाणिः पादकलितकचकलापामापन्ननिद्रा-मपवित्रेति निर्वर्ण्यावगाहिततदीयजठरः सप्तधा गर्भं निर्भिद्य निर्जगाम।**

दितेः गर्भं सप्तधा विदार्यते

**व्याख्या** - ताम् - दितिम्, कैतवेन - छलेन, तां दितिं शुश्रूषमाणः - सेवमानः, शतधारपाणिः - इन्द्रः, पाद-कलित-कच-कलापाम् - पादयोः पादस्थाने कलितः- स्थापितः कचकलापः केशपाशो यया ताम्, शय्यायां पादस्थाने शिरः शिरःस्थाने पादौ कृत्वा, आपन्न-निद्राम् - निद्राणां, अपवित्रा - अशुचिः, इति - एवं, निर्वर्ण्य - अवलोक्य, अवगाहित-तदीय-जठरः-

तस्याः कुक्षिं प्रविष्टः सन्, सप्तधा - सप्तभिः, गर्भं - भ्रूणं, निर्भिद्य- विदीर्णं कृत्वा, निर्जगाम - बहिरागतः।

**सारः** - आपन्नसत्त्वां दितिं छलेन सेवमानः इन्द्रः कदाचित् शय्यायां पादस्थाने शिरो निधाय सुप्तां ताम् अशुचिरिति अवलेक्य तस्याः कुक्षिं प्रविश्य भ्रूणं सप्तधा विदार्य बहिरागतः।

**गद्यम्**

**दितिरपि विदिततनयवृत्तान्ता तान्यपि खण्डान्याखण्डलेन सप्तमरुतः कारयित्वा त्रिविष्टपं प्रविष्टा।**

सप्तमरुतः कारयति

**व्याख्या** - दितिः अपि विदित-तनय-वृत्तान्ताः - शिशोः सप्तधाविदारणात्मकवार्त्तां ज्ञात्वा, तानि अपि - सप्तसंख्यकान्यपि, खण्डानि - गर्भकलशानि, आखण्डलेन - इन्द्रेण, सप्त-मरुतः - सप्तसंख्यकान् वायून्, कारयित्वा, त्रिविष्टपम् प्रविष्टा - दिवं गता।

**सारः** - इन्द्रस्य गमनानन्तरं दितिः गर्भस्य विच्छेदनं ज्ञात्वा कोपं सन्त्यज्य इन्द्रद्वारा गर्भशकलानि मरुद्देवताः कारयित्वा दिवं गता।

**पद्यम्**

**ततः।**

**अलम्बुषायामिक्ष्वाकोर्जातः कश्चिन्महीपतिः।**
**विशालेति स्वनाम्नात्र विशालां विदधे पुरीम्॥ ८९॥**

विशालः विशालपुरीं निर्मितवान्

**अन्वयः** - इक्ष्वाकोः अलम्बुषायां जातः कश्चित् महीपतिः अत्र स्वनाम्ना विशाला इति विशालां पुरीं विदधे।

**अन्वयार्थः** - इक्ष्वाकोः - रामवंशादिनृपात्, अलम्बुषायां जातः - अलम्बुषा नाम्न्यां जातः - संजातः, कश्चित् महीपतिः - नृपः, अत्र - दितेः तपोभूमौ, स्वनाम्ना - स्वस्य नाम्ना, विशाला इति विशालां पुरीं - महतीम् पुरीं, विदधे - निर्मितवान्।

**सारः** - दितेः दिवं गतानन्तरं तस्याः तपोभूमौ इक्ष्वाकु-अलम्बुषयोः पुत्रः विशालनामको नृपः स्वस्य नाम्ना प्रसिद्धः "विशाला"नाम्नीं विस्तृतां नगरीं निर्मितवान्।

**गद्यम्**

**तदनु तद्वास्तव्येन सुमतिनाम्ना नृपतिना कृतातिथ्यः सराजपुत्रो भगवान्विश्वामित्रस्तत्र निशीथिनीं नीत्वा मिथिलां प्रति प्रस्थितः प्रतपसामुत्तमस्य गौतमस्याश्रमं प्रदर्श्य तद्दारानुषक्तां कथामित्थमकथयत्।**

गौतमाश्रमं प्राप्तवन्तः

**व्याख्या** - तदनु - विशालनगरीवृत्तान्तकथनान्तरं, तद्वास्तव्येन - विशाला-ख्यामगरीनिवासिना, सुमतिनाम्ना नृपतिना, कृतातिथ्यः - विहितः अतिथि-सत्कारः, सराजपुत्रः - रामलक्ष्मणाभ्यां सहितः, भगवान् विश्वामित्रः, तत्र - विशा- लायां, निशीथिनीं - रात्रिं, नीत्वा - गमयित्वा, मिथिलां प्रति प्रस्थितः - चलितः, प्रतपसाम् - प्रकृष्टतपस्विनां, उत्तमस्य - प्रधानस्य, गौतमस्य - तन्नामकस्य, आश्रमं - तपःस्थानम्, प्रदर्श्य - दर्शियित्वा, तत्-दारानुषक्तां - गौतमपत्न्या अहल्याः सम्बन्धिनं, कथाम् - उपाख्यानम् इत्थम् - अनेन वक्ष्यमाणप्रकारेण, अकथयत्।

**सारः** - विशालानगरस्य महाराजेन सुमतिना विहितसत्कारः विश्वामित्रः रामलक्ष्मणाभ्यां सह तत्रैव रात्रिं गमयित्वा प्रातः मिथिलां गच्छन् मार्गे मुनिश्रेष्ठस्य गौतमस्य तपोवनं दर्शयित्वा तस्य पत्न्याः अहल्यायाः वृत्तान्तम् एवम् अकथयत्।

**पद्यम्**

**अत्रागमद्गौतमधर्मदाराननार्यजुष्टेन पथा महेन्द्रः।**
**स च क्रुधा निर्वृषणं वृषाणं भार्यामदृश्यां च मुनिश्चकार॥ ९०॥**

**अन्वयः** - अत्र महेन्द्रः अनार्यजुष्टेन पथा गौतमधर्मदारान् अगमत्। सः मुनिः च क्रुधा वृषाणं निर्वृषणम्, भार्याम् अदृश्यां च चकार।

गौतममहर्षेः शापः

**अन्वयार्थः** - अत्र - गौतममहर्षेः आश्रमे, महेन्द्रः - देवराज इन्द्रः, अनार्यजुष्टेन - अनिष्टजनोचितेन (जराभावेन), पथा - मार्गेण, गौतमधर्मदारान् - गौतमस्य धर्मपत्नीं अहल्याम्, अगमत् - सङ्गतवान्। सः मुनिः च - गौतमश्च, क्रुधा - क्रोधेन, वृषाणं - इन्द्रं, निर्वृषणम् - अण्डकोशविहीनं, भार्याम् - स्वपत्नीं अहल्यां च, अदृश्यां - पूर्वरूपपरित्यागेन पाषाणभावसमापन्नाम्, चकार - कृतवान्।

**सारः** - अस्मिन्नाश्रमे हि देवेन्द्रः असाधुमार्गेण गौतमस्य धर्मपत्नीम् अहल्यां सङ्गतवान्। गौतमः क्रोधेन इन्द्रम् अण्डकोशविहीनं, पत्नीं पाषाणभावसमापन्नाम् च कृतवान्।

**पद्यम्**

**वनमेतद्गते रामे शापान्मुक्ता भविष्यसि।**
**इत्युक्त्वा गौतमः पत्नीं हिमाद्रिं तपसे ययौ॥ ९१॥**

**अन्वयः** -रामे एतद्वनं गते शापात् मुक्ता भविष्यसि इति पत्नीम् उक्त्वा गौतमः तपसे हिमाद्रिं ययौ।

गौतममहर्षिः हिमालयपर्वतं जगाम

**अन्वयार्थः** - रामे - श्रीरामचन्द्रे, एतद्वनं, गते -प्राप्ते सति, शापात् - शिलाभावात् मुक्ता भविष्यसि इति, पत्नीम् - अहल्याम्, उक्त्वा गौतमः तपसे - तपश्चरितुं, हिमाद्रिं - हिमालयं, ययौ -जगाम।

**सारः** - यदा श्रीरामः इदं वनं प्रति आगमिष्यति, तदा त्वम् शिलाभावात् मुक्ता स्वरूपं प्राप्स्यसि इति पत्नीम् उक्त्वा गौतममहर्षिः तपश्चरितुं हिमालयपर्वतं जगाम।

**पद्यम्**

**इत्थं विदितवृत्तान्ते देवतानां गणे तदा।**
**पितृणां प्राभवाल्लेभे मेषस्य वृषणं वृषा॥ ९२॥**

**अन्वयः**- तदा देवतानां गणे इत्थं विदितवृत्तान्ते पितॄणां प्राभवात् वृषा मेषस्य वृषणं लेभे।

**अन्वयार्थः** - तदा - तस्मिन् समये, देवतानां गणे - देवसमुदाये, इत्थम् - अनेन प्रकारेण, विदितवृत्तान्ते - गौतमशापात् इन्द्रो निर्वृषणत्वं गतः इति ज्ञातवृत्तान्ते पितॄणां - पितृदेवानाम्, प्राभवात् - प्रभुत्वात्, वृषा -इन्द्रः, मेषस्य - एडकस्य, वृषणं - अण्डकोशं, लेभे -प्राप्तवान्।

इन्द्रः मेषस्य वृषणं प्राप्तवान्

**सारः** - प्रत्यागते इन्द्रे देवताः प्रवृत्तं वृत्तान्तं ज्ञातवन्तः। ततः पितृदेवतानां माहात्म्येन निर्वृषणः इन्द्रः एडकस्य अण्डकोशं प्राप्तवान्।

**पद्यम्**

**तदेनामेनसो मुक्तां प्रतिगृह्णातु गौतमः।**
**इति तस्याश्रमं भेजे साकं रामेण कौशिकः॥ ९३॥**

**अन्वयः** - तत् एनसः मुक्ताम् एनां गौतमः प्रतिगृह्णातु इति कौशिकः रामेण साकं तस्य आश्रमं भेजे।

**अन्वयार्थः** - तत् - तस्मात्कारणात्, एनसः - परपुरुषसंभोग- जनितपापात्, मुक्ताम् - मोचिताम्, एनां - अहल्यां, गौतमः प्रतिगृह्णातु - पत्नीत्वेन पुनः गृह्णातु इति कौशिकः - विश्वामित्रः, रामेण साकं - रामेण सह, तस्य - गौतमस्य, आश्रमं भेजे - प्राप।

रामेण साकं विश्वामित्रः गौतमाश्रमं प्रविवेश

**सारः** - “तस्मात् भवतः प्रभावेण एषा अहल्या पापात् विमुक्ता भवतु, गौतममहर्षिः च स्वपत्नीं पुनः गृह्णातु” इत्युक्त्वा विश्वामित्रः रामेण सह गौतमस्य आश्रमं प्रविवेश।

**पद्यम्।**

**दुःखे सुखे च रज एव बभूव हेतुः**
**तादृग्विधे महति गौतमधर्मपत्न्याः।**
**यस्माद्गुणेन रजसा विकृतिं गता सा**

**रामस्य पादरजसा प्रकृतिं प्रपेदे ॥ ९४ ॥**

**अन्वयः** - गौतमधर्मपत्न्याः तादृग्विधे महति दुःखे सुखे च रजः एव हेतुः बभूव, यस्मात् रजसा गुणेन विकृतिं गता सा रामस्य पादरजसा प्रकृतिं प्रपेदे।

रामस्य पादरजसा अहल्या शापान्मुक्ता

**अन्वयार्थः** - गौतमस्य - महर्षेः, धर्मपत्न्याः - अहल्याः, तादृग्विधे - तादृशे, महति - अतिकठिने, दुःखे - कष्टप्राप्तौ, सुखे च - पुनः पूर्वरूपमवाप्य प्रतिष्ठाप्राप्तिरूपे सुखे च, रजः एव हेतुः - कारणं, बभूव- अभूत्, यस्मात् - रजरूपादेव हेतोः, रजसा गुणेन - रजो नामकेन प्राकृतेन गुणेनासक्ता सा, विकृतिं गता - पाषाणभावं गता, इन्द्रेण सह ग्रामधर्मेण संयुक्ता सति, महर्षिणा शप्ता शैली भूत्वा दुःखमतिकठिनमवाप, पुनः सा रामस्य - श्रीरामस्य, पादरजसा - चरणधूलिना, प्रकृतिं प्रपेदे -स्वकीयं पूर्वरूपम् अवाप्य मानुषीभूता सति प्रतिष्ठामगमत्।

**सारः** - अहल्यायाः अदृश्यत्वजनिते तीव्रदुःखे, पुनश्च पूर्वरूपप्राप्तिरूपे सुखे च रजः एव कारणम् आसीत्, यतः रजोगुणेन शापभाग् भूत्वा विकृतिं प्राप्ता सा रामस्य चरणधूलिना पुनः मानुषीभूता।

अस्मिन् श्लोके श्लेषालङ्कारः वसन्ततिलका वृत्तश्च।

**गद्यम्**

**तस्मिन्नहल्यया गौतमेन च कृतमातिथ्यं विश्वामित्रः सराजपुत्रः प्रतिगृह्य मिथिलोपकण्ठभुवि जनकयजनभवनमभजत।**

जनकस्य यागशालां प्राप्ताः विश्वामित्रादयः

**व्याख्या** - तस्मिन् - तत्र गौतमाश्रमे, अहल्यया - पूर्वरूपं प्राप्तया गौतमपत्न्या गौतमेन च कृतम् आतिथ्यं - अतिथिसत्कारं, प्रतिगृह्य - स्वीकृत्य, सराजपुत्रः - रामलक्ष्मणाभ्यां सह, विश्वामित्रः - कौशिकः, मिथिला - उपकण्ठ-भुवि - मिथिलासमीपप्रदेशे, जनकस्य - जनकनाम्नो राज्ञो, यजन -भवनम् - यज्ञशालाम्, अभजत - प्राप्तवान्।

**सारः** - कौशिकः गौतममहर्षेः आश्रमपदे, स्वरूपं प्राप्तया अहल्यया गौतमेन च कृतं अतिथिसत्कारं स्वीकृत्य, रामलक्ष्मणाभ्यां सह मिथिलानगरस्य समीपदेशे जनकराजस्य यागशालां प्राप्तवान्।

## Summarised Overview

श्रीरामः गङ्गायाः कथां श्रुत्वा तां नदीम् उत्तीर्य विशालानाम्नीं नगरीम् अधिकृत्य रामं प्रति उक्तवान् विश्वामित्रः। दितेः समुद्रमथने दैत्याः मारिताः इन्द्रादिभिः। दितिः इन्द्रघातिनं पुत्रं प्राप्तुं तपश्चरति। इन्द्रः कपटेन तस्याः गर्भं सप्तधा भिनत्ति। ततः तानि सप्तखण्डानि एव सप्तमरुतः भवन्ति। दितेः तपोवने विशालनामकः राजा विशालनगरीं निर्माति। विशालनगरीं अतीत्य मिथिलामार्गे गौतमाश्रमे अहल्यावृत्तान्तस्य आरम्भः कृतः। इन्द्रः असाधुमार्गेण गौतमस्य धर्मपत्नीं सङ्गतवान्। तेन क्रुद्धः गौतमः इन्द्रम् अहल्यां च शप्तवान्। पुनश्च अहल्यायाः शापमुक्तिः अपि तेनैव सूचितः - 'वनमेतद् गते रामे शापान्मुक्ता भविष्यति' इति। देवाः इन्द्रस्य शापं विज्ञाय, पितृणां प्रभावेन मेषस्य वृषणं प्राप्तवान्। एवम् अहल्यायाः कथां उक्त्वा विश्वामित्रः रामं गौतमाश्रमं प्रति नयति। यथा रामः गौतमाश्रमं प्रविशति तथा अहल्या शापान्मुक्ता स्वस्याः रूपं प्राप्नोति। गौतमश्च तत्र आगच्छति। तत्र कश्चन श्लोकः भोजेन श्लेषालङ्कारं उपयुज्य रचितः। तस्याः शापस्य कारणं रजः, शापमोचनस्य कारणमपि रजः इति सुन्दरतया अहल्यायाः शापमुक्तिः वर्णिता। अहल्यया गौतमेन च कृतं अतिथिसत्कारं स्वीकृत्य, विश्वामित्रः रामलक्ष्मणाभ्यां सह जनकराजस्य यजभवनं प्राप्तवान्।

## Assignments

**निर्दिष्टाभ्यासः**

1. अहल्यावृत्तान्तं विवृणुत।
2. सप्तमरुतः कथं सञ्जातः?

**खण्डिकया उत्तरयत**

1. विशालनगर्याः उत्पत्तिः।

2. अत्रागमद्गौतमधर्मदारानानार्यजुष्टेन पथा महेन्द्रः।

   स च क्रुधा निर्वृषणं वृषाणं भार्यामदृश्यां च मुनिश्चकार॥ - व्याख्यात।

3. दुःखे सुखे च रज एव बभूव हेतुः

   तादृग्विधे महति गौतमधर्मपत्न्याः।

   यस्माद्गुणेन रजसा विकृतिं गता सा

   रामस्य पादरजसा प्रकृतिं प्रपेदे॥ - ससन्दर्भं व्याख्यात।

## Suggested Readings


1. Ramayanacampu of Bhoja, with Ramacnadra's commentary, Nirnaya Sagar Press Mumbai.
2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnaya Sagar Press Mumbay. 1933


## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnaya Sagar Press, Bombay, 1898

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# सीतास्वयंवरः

## Learning Outcomes

- भोजस्य रचनावैशिष्ट्यस्य अवगमनम्।
- चम्पूरामायणस्य मूल्यानि अवगच्छति।
- चम्पूरामायणे सीतास्वयंवरकथां गृह्णाति।

## Background

भोजस्य चम्पूरामायणस्य बालकाण्डे पूर्वस्मिन् एकके विश्वामित्रः विशालनगरीम् अधिकृत्य उक्तवान्। सप्तमरुतः कथं सञ्जातः इति विश्वामित्रेण कथितम्। ततः रामालक्ष्मणौ गैतमाश्रमं प्रति नीत्वा अहल्यायाः वृत्तान्तं कथयति। तदनु श्रीरामस्य पादरजसा अहल्या स्वरूपं प्राप्तवती इति दृष्टम्। अहल्यायाः मोचनं भोजेन सुन्दररीत्या श्लोकेन वर्णितम्। अस्मिन् एकके कथं रामादीनां विवाहः जातः इति पश्यामः।

## Keywords

शतानन्दः, सुरभिः, वसिष्ठः, त्रिशङ्कुः, श्वभक्षकान्, चण्डालभावं, शतमन्युः, अम्बरीषं, शुनःशेपः, मेनका, ब्रह्मर्षिः, सूतिकागृहं, पणः, शिवधनुषः, माङ्गल्यतूर्यायितं, कुशध्वजः, गृहमेधिनौ।

## Discussion

**गद्यम्**

**तदनु जनकेन विधिवदभ्यर्चिते तस्मिन्निमिकुलपुरोधाः शतानन्दो रघुनन्दन - मेवमभाषत।**

**व्याख्या** - तदनु - सराजपुत्रस्य विश्वामित्रस्य जनकयजभवनप्रवेशानन्तरं, जनकेन - विदेहराजेन, विधिवत् - शास्त्रोक्तरीत्या, अभ्यर्चिते - पूजिते, तस्मिन् - विश्वामित्रे, निमिकुलपुरोधाः - निमिवंशस्य पारम्पर्यागतपुरोहितः, शतानन्दः - शतानन्तमहर्षिः, रघुनन्दनम् - श्रीरामचन्द्रं, एवम् - वक्ष्यमाण-प्रकारेण, अभाषत - उक्तवान्।

**सारः** - तत्र जनकमहाराजेन विश्वामित्रे यथाविधि पूजिते सति, जनकवंश-पुरोहितः शतानन्दः श्रीरामम् इत्थं उक्तवान्।

**पद्यम्**

धेनुं प्राप्तुं कौशिकस्य इच्छा

**तिष्ठन्क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनो-**
**रातिथ्यं तत्र लब्ध्वा निरवधि सुरभेः प्राभवादित्यवेत्य।**
**सा तेन प्रार्थिताभूत्तदनु मुनिवरे नाभ्युपेते चकर्ष**
**क्रोशन्तीं तां तयैव प्रचुरबलजुषा कान्दिशीको बभूव॥ ९५॥**

**अन्वयः** - असौ मुनिः क्षत्रार्हवृत्तौ तिष्ठन् ब्रह्मसूनोः आश्रमम् अगमत्। तत्र तु निरवधि आतिथ्यं लब्ध्वा, सुरभेः प्राभवात् इति अवेत्य सा तेन प्रार्थिता

अभूत्। तदनु मुनिवरे न अभ्युपेते क्रोशन्तीं तां चकर्ष। तया एव प्रचुरबलजुषा कान्दिशीकः बभूव।

**अन्वयार्थः** - असौ मुनिः- विश्वामित्रः, क्षत्राय - क्षत्रियवर्णाय, अर्हा या वृत्तिः - व्यापारः, तत्र तिष्ठन् - वर्तमानः सन्, ब्रह्मसूनोः - वसिष्ठस्य, आश्रमम् - तपोवनं, अगमत् - अगात्। तत्र - वसिष्ठमहर्षेः आश्रमे, निरवधि - सीमातीतम्, आतिथ्यं - अतिथिसत्कारं, लब्ध्वा - प्राप्य, सर्वमेतत्, वसिष्ठेन सुरभेः - कामधेनोः, प्राभवात् - सामर्थ्यात्, एव क्रियते, इति - इत्येतत्, अवेत्य - विज्ञाय, तेन - राज्ञा, विश्वामित्रेण, सा - कामधेनुः, प्रार्थिता - याचिता, अभूत् - बभूव। तदनु - तत्पश्चात्, मुनिवरे - वसिष्ठे, विश्वामित्रस्य, तस्याः प्रार्थनायाः, न - नहि, अभ्युपेते - स्वीकृते, सः राजा विश्वामित्रस्य, क्रोशन्तीं - क्रन्दनं कुर्वन्तीं, तां -कामधेनुं, बलात्, चकर्ष - धर्षयति स्म । ततः प्रचुरबलजुषा - भूयिष्ठबलयुक्तया, तया - कामधेन्वा, एव चतुरङ्गबलसम्पन्नेऽपि प्रमर्दितः सन्, कान्दिशीकः बभूव - भयात् पलायितोऽभूत्।

**सारः** - मुनिः विश्वामित्रः क्षत्रधर्मम् आचरन् कदाचित् ब्रह्मपुत्रस्य वसिष्ठस्य आश्रमपदमगच्छत्। तत्र महर्षिणा समर्पितं निस्सीमम् अतिथिसत्कारं सर्वमपि तत्रस्थायाः कामधेनोः बलादेव साध्यमभूदिति विज्ञाय, तेन सा धेनुः याचिता । वसिष्ठमहर्षौ न स्वीकृतवति, सः ताम् आक्रन्दमानां धेनुं बलात् धर्षयति स्म, किन्तु तया सृष्टेन भूयिष्ठबलयुक्तया भयात् पलायितः अभूत्।

**गद्यम्**

**बहुशस्तद्बलचकितस्य तपोबलाधिगतविविधायुधनिगमस्य भूयोऽपि सुरभिनिमित्तं समारब्धसमरस्य दिव्यास्त्रपरम्परां ब्रह्मदण्डेन निरुन्धन्नरुन्धतीजानिरवतस्थे।**

वसिष्ठकौशिकयोः युद्धम्

**व्याख्या** - बहुशः - बहुप्रकारकम्, तस्याः - कामधेनोः, बलेन - शक्त्या, चकितस्य - भयसंभ्रान्तस्य, तपसा - तपोबलेन, अधिगताः - प्राप्ताः, विविधाः - बहुप्रकारकाः, आयुधनिगमाः - धनुर्वेदाद्यस्त्रविद्याः, येनऽसौ तस्य, सुरभिनिमित्तं - कामधेनोः प्राप्त्यर्थं, भूयोऽपि - पुनरपि, समारब्धसमरस्य - उपाक्रान्तयुद्धस्य, विश्वामित्रस्येति शेषः, दिव्यास्त्राणाम् - आमानुषास्त्राणाम् , परम्पराम् - श्रेणिम्, ब्रह्मदण्डेन - ब्रह्मतेजोमयेन, दण्डविशेषेण मन्त्रात्मकेन द्वारा, निरुन्धम् - निवारयन्, मोघीकुर्वन्निति यावत्, अरुन्धत्येव जाया यस्याऽसौ अरन्धतीजानिः - वसिष्ठः, अवतस्थे - आभिमुख्येन स्थितवान्।

**सारः** - धेन्वाः प्रभावेण आश्चर्यान्वितः कौशिकः तप आचरणेन बहूनि दिव्यास्त्राणि सम्पाद्य पुनरपि कामधेनोः निमित्तं युद्धम् आरब्धवान्। तदा तस्य समग्रमपि आयुधसमूहं स्वस्य ब्रह्मदण्डमात्रेण वसिष्ठः निवारयामास।

**गद्यम्**

**ततोऽयं जातव्यलीकः क्षात्रतेजसः परं ब्राह्ममेव महो महीय इति निश्चित्य तत्सिद्धये दक्षिणस्यां दिशि तीव्रतरं तपश्चचार।**

विश्वामित्रः ब्रह्मबलसिद्धये तपश्चकार

**व्याख्या** - ततः - अनन्तरं, अयं - कौशिकः, जातव्यलीकः - उत्पन्नदुःखः, क्षात्रात् - क्षत्रसम्बन्धिनः, तेजसः - बलात्, परं ब्राह्मम् - ब्राह्मणसम्बन्धिनः, महः - तेजः, एव महीयः - उत्कृष्टतरं, इति निश्चित्य - निर्धार्य, तत्सिद्धये - ब्रह्मतेजोऽवाप्तये दक्षिणस्यां दिशि तीव्रतरं - अत्युग्रं, तपः चचार - तपश्चरितुं प्रारब्धवान्।

**सारः** - तदनन्तरं विश्वामित्रमुनिः दुःखितस्सन् क्षत्रबलापेक्षया ब्रह्मबलमेव वरम् इति निर्धार्य, ब्रह्मबलसिद्ध्यर्थं दक्षिणदिग्भागे अत्युग्रं तपश्चरितुं प्रारब्धवान्।

**गद्यम्**

**अथ सावित्रः क्षत्रियस्त्रिशङ्कुः सशरीरः स्वर्गसिद्धिमभ्यर्थयमानो वसिष्ठेन प्रत्याख्यातस्तस्य पुत्रैर्महोदयादिभिर्निर्बन्धकुपितैर्दत्तचण्डालभावस्तमेनं शरणमभजत।**

त्रिशङ्कोः इच्छा

**व्याख्या** - अथ - अनन्तरं, एकदा, सावित्रः - सवितृवंशसमुद्भूतः, क्षत्रियः - क्षत्रियकुलप्रसूतः, त्रिशङ्कुः - एतन्नाम कश्चन अयोध्याधिपतिः, सशरीरः - शरीरेण सहितः, सन्नेव स्वर्गस्य - स्वर्गलोकस्य, सिद्धिम् - प्राप्तिम्, अभ्यर्थयमानः - कामयमानः, शरीरेण सहित एवाहं स्वर्गं यातुं कामये इति प्रार्थयमानो वसिष्ठस्य सविधे, वसिष्ठेन - सूर्यदेवपुरोहितेन ब्रह्मर्षिणा, प्रत्याख्यातः - सशरीरस्वर्गगमनसम्भवं निराकृतः सन्, तस्य - ब्रह्मर्षेः वसिष्ठस्य, पुत्रैः - तपस्यमानैः आत्मजैः, महोदयादिभिः - महोदयप्रभृति-भिः, निर्बन्धकुपितैः - युष्माभिरपि गुरुपुत्रैः अहं सशरीर एव स्वर्गं प्रापणीयः इति पुनः पुनर्याञ्चानिर्बन्धजनितोपद्रवसञ्जातकोपैः, दत्तः - शापप्रभावेण प्रापितः, चण्डालभावः - यस्याऽसौ तथोक्तः, चण्डालो भव इति शप्तः सन्नित्यर्थः, तम् एनम् - विश्वामित्रं तपस्यन्तं, शरणम् अभजत - वसिष्ठप्र-तिपक्षतयाऽयं मां सशरीरमेव स्वर्गं प्रापयिष्यतीति शरणागतोऽभूदित्यर्थः।

**सारः** - सूर्यवंशस्य राजा त्रिशङ्कुः देहसहितः एव स्वर्गलोकं प्राप्तुम् इच्छन् तदर्थं कुलगुरुं वसिष्ठं प्रार्थयामास। वसिष्ठेन निराकृतः तस्य पुत्रान् बलेन निर्बबन्ध। कुपिताः तत्पुत्राः महोदयादयः त्रिशङ्कुं चण्डालत्वेन शप्तवन्तः। ततः त्रिशङ्कुः तपस्यन्तं कौशिकं रक्षणार्थम् अयाचत।

**गद्यम्**

**असावपि तन्मनोरथपरिपूर्तये क्रतुमेकं प्राक्रमत।**

**व्याख्या** - असौ -विश्वामित्रः, अपि, तत्-मनोरथ-परिपूर्तये - त्रिशङ्कोः सदेहस्वर्गप्राप्तिरूपमनोरथसिद्धये, एकम् , क्रतुम् - यज्ञं, प्राक्रमत - प्रारब्ध-वान्।

**सारः** - विश्वामित्रः त्रिशङ्कोः मनोरथसिद्ध्यर्थं यज्ञमेकम् आरब्धवान्।

**गद्यम्**

**तत्र समागतेषु ब्राह्मणेषु जुगुप्सया त्रिशङ्कोरनागतान्वसिष्ठपुत्रानयं शापेन श्वभक्षकानकरोत्।**

कौशिकः वसिष्ठपुत्रान् शपति

**व्याख्या** - तत्र - तस्मिन् यज्ञे, समागतेषु ब्राह्मणेषु त्रिशङ्कोः - तन्नाम नृपात् जुगुप्सया - घृणया, अनागतान्, वसिष्ठपुत्रान् - वसिष्ठस्य पुत्रान्, शापेन श्वभक्षकान् चाण्डालान्, अयम् - विश्वामित्रः, अकरोत्।

**सारः** - विश्वामित्रः उपाक्रान्ते यज्ञे सर्वे ब्रह्मणाः समागताः किन्तु वसिष्ठपुत्राः ईर्ष्यया नागता इति हेतोः कुपितोऽयं विश्वामित्रः तान् शापेन चण्डालान् अकरोत्।

**गद्यम्**

**ततः क्रतुभुजां वर्गेऽपि स्वर्गादनवतीर्णे।**

व्याख्या - ततः - तदनन्तरं, क्रतुभुजाम् - देवानां, वर्गे अपि- समुदायेऽपि, स्वर्गात् - नाकात्, अनवतीर्णे - अनागते।

**सारः** - विश्वामित्रकृते यज्ञे हविर्ग्रहीतुं देवाः न समागताः।

**पद्यम्**

**अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम्।**
**नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम्॥ ९६॥**

**अन्वयः** - अयं महात्मा तपसः प्रभावात् नीलाम्बरं, निह्नुतराजवेषम्, वर्षानिशीथात् अविशेषवेषं त्रिशङ्कुं दिवम् आरोपयामास।

विश्वामित्रः त्रिशङ्कुं स्वर्गं आरोपयामासा

**अन्वयार्थः** - अयं - विश्वामित्रः, महात्मा - महानुभावः, तपसः - स्वकृत-तपस्यायाः, प्रभावात् - सामर्थ्यात्, नीलाम्बरं - नीलवस्त्रं चण्डालाकृति-धारित्वाादिति भावः। अन्यपक्षे नीलाकाशं मेघाच्छन्नत्वादितिभावः, निह्नुतराजवेषम् - प्रच्छन्ननृपवृषं, पक्षे प्रच्छन्नचन्द्रमण्डलं, वर्षानिशीथात् -

वर्षकालसम्बन्धिरात्रिसमयाद्, अविशेषवेषं - विषेशरहितः वेषो यस्य तादृशं, त्रिशङ्कुं - तदाख्यं, दिवम् - स्वर्गं , आरोपयामास - प्रेषितवान्।

**सारः** - देवानाम् अनागमनेन यज्ञे असमाप्तेऽपि, विश्वामित्रः स्वस्य तपोबलेन त्रिशङ्कुं स्वर्गं प्रेषितवान्।

**पद्यम्**

**अपातयत्स्वर्गमुपाश्रयन्तं सञ्जातमन्युः शतमन्युरेनम्।**
**ततोऽवलम्ब्यास्य नियोगशङ्कुं लेभे त्रिशङ्कुर्गगने प्रतिष्ठाम्॥ ९७॥**

**अन्वयः** - स्वर्गम् उपाश्रयन्तम् एनं सञ्जातमन्युः शतमन्युः अपातयत्। ततः अस्य नियोगशङ्कुम् अवलम्ब्य त्रिशङ्कुः गगने प्रतिष्ठां लेभे।

इन्द्रः त्रिशङ्कुं मध्ये गगने प्रतिष्ठितः

**अन्वयार्थः** - स्वर्गम् उपाश्रयन्तम् - प्रविशन्तम्, एनं - त्रिशङ्कुं, सञ्जातमन्युः - समुपजातक्रोधः सन् , चण्डालोऽयं किमिति स्वर्गं प्रेषितः इति, शतमन्युः - इन्द्रः, अपातयत् - स्वर्गादधः निक्षिप्तवान् । ततः - तदनन्तरं, अस्य - विश्वामित्रस्य तत्रैव तिष्ठ, माऽधःपत इति नियोगशङ्कुम् - आदेश-रूपस्थूणाम्, अवलम्ब्य - आश्रित्य, त्रिशङ्कुः, गगने - आकाशे, प्रतिष्ठां - स्थितिं, लेभे - प्राप्तवान्।

**सारः** - यज्ञेऽसम्पूर्णेऽपि विश्वामित्रस्य तपोबलेन स्वर्गं प्रविशन्तं त्रिशङ्कुं कुपितः इन्द्रः अधः पातयामास । तदा 'तत्रैव तिष्ठ' इति विश्वामित्रस्य नियोगशङ्कुं यष्टिम् अवलम्ब्य त्रिशङ्कुः मध्येगगनं स्थितः।

**गद्यम्**

**ततो गीर्वाणगणप्रार्थनया परित्यक्तभुवनान्तरनिर्माणकर्माणं तत्र तपःप्रत्यूहः प्रत्युद्भूत इति पश्चिमायां दिशि पुष्करे पुष्कलं तपश्चरन्तममुमम्बरीषयज्ञपशुविनाशप्रायश्चित्तार्थं बह्वीभिर्गोभिः क्रीत्वा नरपशुतां नीयमानस्तावदृचीकस्य मध्यमपुत्रः शुनःशेपः शरणमयाचत।**

नूतनलोकनिर्माणं देवानां प्रार्थनया त्यजति

**व्याख्या -** ततः - त्रिशङ्कोः स्वप्रतिष्ठापनसमयेन महर्षिः विश्वामित्रः, गीर्वाणानां - देवानां, यो हि गणः - समूहः, तस्य प्रार्थनया - अभ्यर्थनया, प्रसन्नः सन्, परित्यक्तम् - विसृष्टम्, भुवनान्तरस्य - लोकान्तरस्य, निर्माणस्य - निर्मितेः, कर्मा येनऽसौ तथाभूतम्, तत्र - दक्षिणस्यामाशायाम्, प्रत्यूहः - विघ्नः, प्रत्युद्भूतः - उत्पन्नः, इति - इत्येतत्, पश्चिमायां - प्रतीच्याम्, दिशि - आशायाम्, पुष्करे - पुष्करनाम्नी क्षेत्रे, पुष्कलं - विपुलम्, तपः - तपस्याम्, चरन्तम् - कुर्वन्तं, अमुम् - विश्वामित्रं, अम्बरीषस्य - महाराजस्य, यज्ञपशुविनाशे निमित्ते, प्रायश्चित्तार्थं - प्रायश्चित्तं कर्म कर्तुं, प्रायश्चित्तं नाम प्रारब्धकर्मलोपजनितदुरितनिराकरणार्थम् अवश्यकर्त्तव्य-कर्मविशेषः, तदर्थं, बह्वीभिः - अनेकाभिः, शतसंख्यकाभिरित्यर्थः, गोभिः - मूल्यभूतिभिः, क्रीत्वा - क्रयं कृत्वा, नरपशुतां नीयमानः - तत्प्रायश्चित्तस्य नरपशोर्निर्वत्यत्वेन विधिबोधितत्वादिति भावः, तावत् - तदानीम्, ऋचीकस्य - ऋचिकनाम्नः कस्यचिद् दरिद्रब्राह्मणस्य, मध्यमपुत्रः - मध्य भवो मध्यमः आत्मजः, शुनःशेपः - शुनःशेपनामा, शरणम् अयाचत - प्राणसङ्कटापन्नोऽहम्, मम रक्षां कुरु इति प्रार्थितो बभूव।

**सारः** - विश्वामित्रः त्रिशङ्कोः कृते नूतनानां लोकानां, सप्तर्षिमण्डलस्य, देवानां च सृष्टिम् आरब्धवान्। ततः देवानां प्रार्थनया एतत्कार्यं त्यक्त्वा दक्षिणदिशि सञ्जातेन तपोविघ्नेन दुःखितः पश्चिमदिशि पुष्करक्षेत्रे तपश्चर्यां आरब्धवान्। तावति अयोध्याधिपतेः अम्बरीषस्य यज्ञपशौ इन्द्रेण अपहृते सति सः प्रायश्चित्तरूपेण नरबलिं दातुम् ऋचीकमहर्षेः मध्यमपुत्रं शुनःशेपं गवां शतसहस्रेण क्रीत्वा नीतवान्। सः शुनःशेपः रक्षणार्थं विश्वामित्रं प्रार्थितो बभूव।

**गद्यम्**

शुनःशेपवृत्तान्तं

**अयं भगवान्निजतनयविनिमयेन रक्षितुमेनमुन्मुखः पराङ्मुखेभ्यस्तेभ्यो हविष्यन्दादिभ्यः शापेन वसिष्ठपुत्रदशां दत्त्वा गाथाद्वयप्रीताभ्यामिन्द्रो - पेन्द्राभ्यामम्बरीषं शुनःशेपं च परिपूर्णमनोरथौ कारयामास।**

**व्याख्या** - अयं भगवान् - महात्मा विश्वामित्रः, निजतनयविनिमयेन - अनेकपुत्रेष्वन्यतमस्य स्वपुत्रस्य शुनःशेपस्थाने, एनं - शुनःशेपं, रक्षितुम् - बलिभावात् त्रातुम्, उन्मुखः - तत्परः (सन्) , पराङ्मुखेभ्यः - विश्वामित्र-विचारं न स्वीकुर्वद्भ्यः, तेभ्यः हविष्यन्दादिभ्यः - स्वपुत्रेभ्यः, शापेन वसिष्ठपुत्रदशां - चण्डालभावं, दत्वा, गाथाद्वयप्रीताभ्याम् - गाथाद्वयेन विश्वामित्रोपदिष्टेन शुनःशेपगीतेन इन्द्रोपेन्द्रप्रसादकेन सूक्तद्वयेन प्रीताभ्यां प्रसादं गताभ्यां इन्द्रोपन्द्राभ्यां (नरबलिं विनैव यज्ञपूरणेन), अम्बरीषं, (प्राणदानेन) शुनःशेपं च परिपूर्णमनोरथौ - सफलाभिलाषौ कारयामास।

**सारः** - विश्वामित्रः स्वपुत्रेषु कस्यचित् प्रतिदानेन शुनःशेपं रक्षितुम् ऐच्छत्। किन्तु तत्पुत्राः तस्माद्विमुखाः। तेन कुपितः सन् वासिष्ठान् इव स्वपुत्रानपि श्वमांसभक्षकत्वेन शप्त्वा विश्वामित्रः शुनःशेपं इन्द्र-उपेन्द्र-स्तुतिपूर्वकं गाथाद्वयं पाठितवान्। ताभ्यां प्रीतयोः इन्द्रोपेन्द्रयोः अनुग्रहेण शुनःशेपः सजीवं रक्षितः, अम्बरीषोऽपि यज्ञफलं अवाप।

**गद्यम्**

विश्वामित्रस्य मेनकया सहवासः

**ततस्तपस्यन्तमेनं मेनकासङ्गतस्तपोभङ्गश्चिरमङ्गीचकार।**

**व्याख्या** - ततः - तदनन्तरं, तपस्यन्तम् - तपस्यां कुर्वन्तं, एनं - विश्वामित्रं, मेनकासङ्गतः - मेनका नाम अप्सरसः सङ्गात्, तपोभङ्गः - तपस्यात्यागः, चिरम् - बहुकालपर्यन्तं, अङ्गीचकार - अनुसृतवान्।

**सारः** - तपोभङ्गार्थम् इन्द्रेण प्रेषितया अप्सरसा मेनकया आकृष्टः विश्वामित्रः तपोनियमादिकं त्यक्त्वा तया सहवासे चिरकालं अनुसृतवान्।

**गद्यम्**

**पश्चात्पश्चात्तापाभिभूतोऽयमुत्तरे भूभृति कौशिकीतीरे घोरं तपश्चचार।**

**व्याख्या** - पश्चात् - तदनन्तरं, पश्चात्तापाभिभूतः - मेनकासङ्गरूपा-सदाचरणजनितानुतापेन अभिभीतः आक्रान्तः, अयम् - विश्वामित्रः, उत्तरे भूभृति - उत्तरदिगवस्थिते पर्वते हिमालये, कौशिकीतीरे - कौशिक्या नद्याः तीरे, घोरम् - अत्युग्रं, तपः चचार - तपस्यामकरोत्।

**सारः** - मेनकासङ्गादनन्तरं तपोनाशकारणात् अनुतापेन दुःखितः विश्वामित्रः उत्तरदिशि हिमालयपर्वते कौशिक्या नद्याः तीरे अत्युग्रं तपः अकरोत्।

**गद्यम्**

**तत्र जम्भारिप्रहितां रम्भां शैली भवेति शप्त्वा पूर्वस्यां दिशि निरस्तनिःश्वासं तपश्चरत्यमुष्मिन्नूष्मणा तपोऽग्नेरुद्विग्निताामरसखस्तामरसासनः सन्निधाय जितेन्द्रियत्वाद्ब्रह्मर्षिरसि वसिष्ठोऽप्येवं व्याहरतु भवन्तमित्यभाषत।**

रम्भायाः शापः

**व्याख्या** - तत्र - कौशिकीतीरे, जम्भारिप्रहितां - जम्भारिण इन्द्रेण प्रहिताम् - प्रेषिताम्, रम्भां - रम्भाख्यां अप्सरसं, शैली भव - शिलाभावं गच्छ, इति शप्त्वा, पूर्वस्यां दिशि निरस्तनिःश्वासं - निरुद्धप्राणवायुनिर्गमं यथा स्यात् तथा (सप्राणायामं), अमुष्मिन् - विश्वामित्रे, तपश्चरति - तपस्यां कुर्वति (सति), तपोऽग्नेः - विश्वामित्रक्रियमाणतपोरूपाग्नेः, ऊष्मणा - तापेन, उद्विग्नितामरसखः - उद्ग्नितः भयसंभ्रान्ता येऽमरा देवास्तेषां सखा हितैषि तत्सखः, तामरसासनः - कमलासनः ब्रह्मा, सन्निधाय - विश्वामित्रसकाश-मागत्य, जितेन्द्रियत्वात् ब्रह्मर्षिः असि - यतः त्वया विषयवैमुख्येन जित इन्द्रियग्रामस्तत इतः प्रभृतिं त्वं ब्रह्मर्षिः अभवः। वसिष्ठः अपि - तव प्रतिपक्षेऽपि एवम् त्वं ब्रह्मर्षिरसि इति प्रकारेण भवन्तम् - त्वम्, एवं व्याहरतु - वदतु" इति अभाषत - अनेन प्रकारेण उक्तवान्।

**सारः** - उत्तरदिशि यदा विश्वामित्रः तपश्चरति स्म, तदा तस्य तपोभङ्गार्थम् इन्द्रः रम्भां प्रेषितवान्। क्रोधेन तां शप्त्वा विश्वामित्रः पूर्वां दिशं गत्वा तत्र प्राणसञ्चारं निरुध्य अत्युग्रं तपः चचार। तस्य तपोरूपस्य ज्वलनस्य तापेन

व्यथिताः देवाः ब्रह्मणा सह तत्समक्षम् आगत्य तं ब्रह्मर्षिरिति अङ्गीकृतवन्तः। वसिष्ठः अपि एतत् अङ्गीकृतवान्।

**पद्यम्**

**असौ वसिष्ठनिर्देशाद्ब्रह्मर्षित्वमविन्दत।**
**यथोपनयसंस्काराद्द्विजन्मा ब्रह्मवर्चसम्॥ ९८॥**

**अन्वयः** - यथा उपनयनसंस्कारात् द्विजन्मा ब्रह्मवर्चसं (विन्दते, एवं) असौ वसिष्ठनिर्देशात् ब्रह्मर्षित्वम् अविन्दत।

वसिष्ठनिर्देशात् विश्वामित्रस्य ब्रमर्षिपदप्राप्तिः

**अन्वयार्थः** - यथा - येन प्रकारेण, उपनयनसंस्कारात् - उपनयनात्, द्विजन्मा - ब्राह्मणः, ब्रह्मवर्चसं - ब्रह्मतेजः, विन्दते - प्राप्यते, (एवं) असौ - विश्वामित्रः, वसिष्ठनिर्देशात् - वसिष्ठस्य आदेशात्, ब्रह्मर्षित्वम् अविन्दत - प्राप्तवान्।

**सारः** - येन प्रकारेण आचार्यविहितात् उपनयनसंस्कारात् अनन्तरमेव ब्रह्मतेजः प्राप्नोति, एवं सः विश्वामित्रः ब्रह्मादिभिः अनुगृहीतोऽपि वसिष्ठस्य अङ्गीकृतैव ब्रह्मर्षिपदं प्राप्तवान्।

**पद्यम्**

**इति जनकपुरोधःश्लाघितो गाधिसूनुः**
**सह नृपतनयाभ्यां शर्वरीं तत्र नीत्वा।**
**विधिवददिशदर्घ्यं पुष्पदर्भाग्रगर्भं**
**सरसिजदयिताय ज्योतिषे छान्दसाय॥ ९९॥**

सूर्याय अर्घ्यं ददाति

**अन्वयः** - इति जनकपुरोधःश्लाघितः गाधिसूनुः नृपतनयाभ्यां तत्र शर्वरीं नीत्वा सरसिजदयिताय छान्दसाय ज्योतिषे पुष्पदर्भाग्रगर्भम् अर्घ्यम् अदिशत्।

**व्याख्या** - इति - एवं जनकपुरोधःश्लाघितः मिथिलाधिपतेः, पुरोहितेन शतानन्देन जन्मकर्मविद्यातपश्चर्यादिविषयेषु संस्तुतः, गाधेः - गाधिराजस्य,

सूनुः - पुत्रो विश्वामित्रः, नृपस्य - राज्ञो दशरथस्य, तनयाभ्याम् - पुत्राभ्यां श्रीरामलक्ष्मणाभ्यां, सह - साकम्, तत्र - यज्ञशालायाम्, शर्वरीम् - रात्रिं, नीत्वा - अतिवाह्य, सरसिजानाम् - कमलानाम्, दयिताय - बान्धवे, कमलबान्धवाय सूर्यायेत्यर्थः, छान्दसाय - वेदवर्णिताय, ज्योतिषे - ज्योतिस्स्वरूपाय, भगवते सूर्याय, विधिवत् - विधिपूर्वकम्, पुष्पदर्भाग्रगर्भम् - पुष्पकुशमिश्रितम्, अर्घ्यम् - अर्घार्थं जलम्, अदिशत् - दत्तवान्।

अत्र मालिनी वृत्तम् -

**सारः** - एवं शतानन्देन चरितकथनपूर्वकं प्रशंसितः विश्वामित्रः जनकस्य यज्ञशालायां रात्रिं अतिवाह्य प्रातः कमलबान्धवाय वेदस्वरूपिणे सूर्याय पुष्पकुशमिश्रितम् जलाञ्जलिं विधिपूर्वकम् दत्तवान्।

**गद्यम्**

**तदनु जनकराजधानीं रामलक्ष्मणनिरीक्षणकौतुकादनवरतपतितेन विकचकुवलयनिचयोपचीयमानमेचकमरीचिमलिम्लुचेन पौरनारीलोचनरोचिषा कवचितनरपतिपथां विश्वामित्रः प्रविश्य दशरथतनयाविदमभाषत।**

मिथिलाप्रवेशः

**व्याख्या** - तदनु तत्पश्चात् विश्वामित्रः, रामलक्ष्मणेत्यादिः रामलक्ष्मणयोः (कर्मणोः) निरीक्षणे विलोकने यत् कौतुकं कौतूहलं तस्मात्, अनवरतपतितेन अनवरतं सततं पतितेन प्रसृतेन, विकचेत्यादिः-विकचानि विकसितानि यानि कुवलयानि नीलकमलानि तेषां निचयः समूहस्तस्य उपचीयमानाः सततं प्रवर्धमानाः याः मेचकमरीचयः श्यामलकान्तयः तासां मलिम्लुचेन - पाटच्चरेण लुण्ठाकेनेत्यर्थः, तद्वन्नीलवर्णेनेति यावत्। पौरनारीलोचनरोविषा-पौरनारीणां लोचनरोचिषा - नेत्रकान्त्या, कवचितनरपतिपथाम् - कवचितः नरपतिपथः राजमार्गः यस्यास्ताम् जनकराजधानीं मिथिलानगरीं प्रविश्य दशरथतनयौ रामलक्ष्मणौ उद्दिश्य इदं वक्ष्यमाणं अभाषत उक्तवान्।

**सारः** - पुरसुन्दरीणां नीलकमलवन्नीलवर्णानि नयनानि रामलक्ष्मण-विलोकनाय सततं राजमार्गे पतन्ति स्म। तासां नेत्राणां प्रभया राजमार्गस्तदानीं संवलित इव भवति स्म । तादृशीं जनकपुरीं प्रविश्य विश्वामित्रोऽनेन प्रकारेण रामलक्ष्मणौ एवम् उक्तवान्।

**गद्यम्**

**अस्यां खलु नगर्यामारब्धयज्ञस्य राज्ञो जनकस्य भागधेयात्सीता-नामधेयभाजनमजीजनत्कन्यारत्नं रत्नगर्भा भगवती।**

मिथिलायाः माहात्म्यम्

**व्याख्या** - अस्यां खलु नगर्याम् - मिथिलायाम्, आरब्धयज्ञस्य - प्रारब्धमखस्य, राज्ञः जनकस्य भागधेयात् - भाग्याद्धेतोः, सीता नामधेयभाजनं कन्यारत्नं - सीतेति नामधेयस्य भाजनं - श्रेष्ठा कन्यका, रत्नगर्भा - पृथ्वी, भगवती - पूज्या, अजीजनत् - जनयामास।

**सारः** - एतस्यामेव मिथिलानगर्यां यदा राजा जनकः यज्ञमेकम् आरब्धवान्, तदा तस्य भाग्यवशात् पूज्या भूदेवी सीतानाम्नीं श्रेष्ठां कन्यकाम् जनयामास।

**गद्यम्**

**अस्याः पुनः किमपरं माहात्म्यम्।**

मिथिला श्रेष्ठा पुरी

**व्याख्या** - अस्याः - मिथिलायाः, पुनः किम् - भूयः किं वक्तव्यम्, अपरं - इतोऽन्यत्, माहात्म्यम् - श्रेष्ठतायाः वर्णनम्?

**सारः** - अस्याः मिथिलायाः श्रेष्ठतायाः विषये अन्यत् किमपि वर्णनीयं नास्ति

**पद्यम्**

**देव्या यस्या वसनमुदधिः पीठिका हाटकाद्रि-**
**र्हारः सिन्धुः सगरतनयस्वर्गमार्गैकबन्धुः।**

**क्रीडाशैलः प्रथमपुरुषक्रोडदंष्ट्रा च तस्याः**
**सीतामातुर्जगति मिथिलां सूतिकागेहमाहुः ॥ १०० ॥**

**अन्वयः** - यस्याः देव्याः उदधिः वसनम्, हाटकाद्रिः पीठिका, सगरतनयस्वर्गमार्गैकबन्धुः सिन्धुः हारः, प्रथमपुरुषक्रोडदंष्ट्रा च क्रीडाशैलः च तस्याः सीतामातुः जगति मिथिलां सूतिकागेहम् आहुः।

मिथिला सूतिकागेहम्

**अन्वयार्थः** - यस्याः - देव्याः विष्णुपुराणसुक्त्यनुसारेण लक्ष्म्याः अवतार-स्वरूपतायाः सीतायाः जनन्याः पृथ्वीदेव्याः, उदधिः - उदकानि, धीयन्ते अस्मिन्नित्युदधिः - समुद्रः , वसनं - वस्त्रं, हाटकस्य - सुवर्णस्य, अद्रिः - पर्वतः, सुमेरुरित्यर्थः, स एव पीठिका - उपवेशनपीठनम्, सगरस्य - अयोध्याधिपतेः ऐक्ष्वाकुवंशीयस्य राज्ञः, ये सुमत्यां संजाताः षष्टिसहस्रसंख्यकाः, तनयाः - पुत्राः, तेषां स्वर्गप्राप्तेः एकबन्धुः - मुख्यसुहृत्, स्वर्गप्रापिका, या सिन्धुः - सरित् मन्दाकिनी, सैव हारः - मुक्ताकलापः,प्रथमपुरुषक्रोडदंष्ट्रा च - वराहरूपधरस्य विष्णोः दंष्ट्रायां वर्तमानस्य विहाराचलः च, तस्याः - एवमैश्वर्यसम्पन्नायाः, सीतामातुः - जानक्याः, मिथिलाम् एतन्नाम्नीं नगरीम्, जगति लोके, सूतिका गेहम् - सूतिकागृहम्, आहुः - कथयन्ति। एवमपरिमेयमैश्वर्यं भवति मिथिला-नगर्याम् इत्यर्थः।

**सारः** - पृथ्वीदेव्याः समुद्र एव वस्त्रम्, स्वर्णाचलः उपवेशनपीठनम्, गङ्गानदी हारः, वराहरूपस्य विष्णोः दंष्ट्रा एव विहाराचलः। तादृश्याः वसुमत्याः प्रसवगृहं मिथिलानगरी।

**पद्यम्**

**तत्र सीताविवाहार्थममरैरपि दुष्करम्।**
**जनकः कल्पयामास धनुरारोपणं पणम् ॥ १०१ ॥**

**अन्वयः** - तत्र सीताविवाहार्थं जनकः अमरैः अपि दुष्करं धनुरारोपणं पणं कल्पयामास।

सीताविवाहस्य पणः

**अन्वयार्थः** - तत्र - मिथिलापुर्याम्, सीताविवाहार्थं - सीतायाः विवाहार्थं, जनकः - जनको नाम राजा, अमरैः अपि - इन्द्रादिदेवैरपि, दुष्करं - कर्तुमशक्यं, धनुरारोपणं - धनुषः हरकोदण्डस्य आरोपणं अवनमनं, पणं - मूल्यं, कल्पयामास - निर्धारितवान्।

**सारः** - मिथिलायाः राजा जनकः पुत्र्याः सीतायाः विवाहार्थं देवैः अपि अशक्यं हरकोदण्डस्य आरोपणं मूल्यं निश्चितवान्।

**पद्यम्**

**ततो महर्षिर्जनकस्य राज्ञः**
**सभां सुधर्मासदृशीं प्रपेदे।**
**तौ चापतुश्चापविलोकलोलौ**
**सचापकौ कोसलराजपुत्रौ॥ १०२॥**

जनकस्य सभां प्राप्तवन्तौ रामलक्ष्मणौ

**अन्वयः** - ततः महर्षिः राज्ञः जनकस्य सुधर्मासदृशीं सभां प्रपेदे। सचापकौ, चापविलोकलोलौ तौ कोसलराजपुत्रौ आपतुः।

**अन्वयार्थः** - ततः - सीताविवाहपणकथनानन्तरम्, महर्षिः - विश्वामित्रः, सुधर्मासदृशीं - सुधर्मा देवसभा तत्सदृशीम् तत्तुल्याम्, राज्ञः जनकस्य सभाम् प्रपेदे प्राप्तवान्। चापविलोकलोलौ - धनुर्दर्शनसमुत्सुकौ, सचापकौ - धनुर्धारिणौ तौ कोसलराजपुत्रौ दशरथतनयौ रामलक्ष्मणौ च आपतुः - प्राप्तवन्तौ।

**सारः** - सीतावृत्तान्तकथनानन्तरं विश्वामित्रः देवसभातुल्यं जनकस्य आस्थानं प्रविष्टवान् । तेन सह धनुर्धरौ रामलक्ष्मणौ अपि शिवधनुषः दर्शनोत्सुकौ आस्थानं प्राप्तवन्तौ।

**गद्यम्**

**तत्र विधिवदभ्यर्चितः कथितदशरथतनयवृत्तान्तः कौशिकः कौशिकप्रमुखैरमरैरस्मत्कुलमहत्तरे देवराते निक्षिप्तं विशेषतः सीताशुल्कार्थं मया रक्षितमिदमिति जनकेन प्रदर्शितस्य चापस्यारोपणाय राममादिदेश।**

धनुरारोपणाय विश्वामित्रस्य आज्ञा

**व्याख्या -** तत्र - सभायां, विधिवत् - शास्त्रोक्तविधिना, अभ्यर्चितः - राज्ञा जनकेन पूजितः, कथित-दशरथ-तनय-वृत्तान्तः - कथितः जनकं प्रति वर्णितः दशरथतनयस्य रामस्य वृत्तान्तः यज्ञरक्षणताटकावधादिरूपो ये स तथोक्तः, कौशिकः - विश्वामित्रः, कौशिकप्रमुखैः - इन्द्रादिभिः, अमरैः - देवैः, अस्मत्-कुल-महत्तरे - मद्वंशश्रेष्ठे, देवराते - तन्नाम्नि राजनि, निक्षिप्तं - समर्पितं, विशेषतः - प्राधान्येन, सीताशुल्कार्थं - सीतायाः शुल्कार्थं विवाहमूल्यार्थं, मया - जनकेन, रक्षितम् - स्थापितं, इदम् इति - धनुरित्येवं कथयित्वा, जनकेन - राज्ञा, प्रदर्शितस्य - सन्दर्शितस्य, चापस्य - धनुषः, आरोपणाय - आनमनाय, रामम् आदिदेश - आज्ञप्तवान्।

**सारः** - सभायां जनकेन पूजितः विश्वामित्रः रामलक्ष्मणाभ्यां वृत्तान्तं उक्तवान्। ततः जनकः "इदं शिवधनुः इन्द्रादिभिः देवैः अस्माकं पूर्वजे देवराते स्थापितम् । मया सीताविवाहस्य मूल्यमिति निश्चितम्" इत्युक्त्वा धनुः दर्शयामास। विश्वामित्रः तं चापम् आरोपयितुं रामम् आदिष्टवान्।

**पद्यम्**

**ततः।**

रामेण हरकोदण्डभङ्गः

**रामे बाहुबलं विवृण्वति धनुर्वंशे गुणारोपणं**<br>
**माभूत्केवलमात्मना तिलकिते वंशेऽपि वैकर्तने।**<br>
**आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं**<br>
**भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च॥ १०३॥**

**अन्वयः**- रामे बाहुबलं विवृण्वति केवलं धनुर्वंशे गुणारोपणं मा भूत् आत्मना तिलकिते वैकर्तने वंशेऽपि तदेव नितरां न आकृष्टं परं द्रुतं सीतामनोऽपि केवलं तस्य भङ्गः न, क्षितिभुजां दोःस्तम्भदम्भस्य च।

**अन्वयार्थः** - रामे - श्रीरामचन्द्रे, बाहुबलम् - निजभुजपराक्रमम्, विवृण्वति - प्रकटयति सति, केवलम्, धनुर्वंशे - धनूरूपवेणुदण्डे, गुणस्य - प्रत्यञ्चायाः, आरोपणम् - योजनम्, मा भूत् - नहि समभवत्, अपि तु आत्मना - स्वेन, तिलकिते - समलङ्कृते, स्वस्यावतीर्णत्वादिति यावत्, वैकर्तने - सूर्यसम्बन्धिनि, वंशेऽपि - कुलेऽपि, गुणारोपणमभूत्- शौर्यादिगुणसमर्पणमभूदिति विरोधपरिहारः। अन्यवंशीयैः राजभिः धनुः नारोपितमभूत् अपि तु सूर्यवंशीय एव श्रीरामः धनुषः आरोपणे समर्थोऽभूत् इति सूर्यवंशस्य प्रतिष्ठा सञ्जाता। तदेव धनुरेव, नितराम् - अतिशयेन, न - नहि, आकृष्टमभूत्, परम् - किन्तु, द्रुतम् - शीघ्रम्, सीतायाः - जानक्याः, मनः - अन्तःकरणमपि, श्रीरामं प्रति आकृष्टमभूत्। केवलम् - मात्रम्, तस्य धनुषः, एव, भङ्गः - विभेदः, न - नहि, सञ्जातः, अपि तु क्षितिभुजाम् - राज्ञाम्, दोः - हस्तौ, एव स्तम्भौ, तस्य दार्ढ्यविषयको दम्भः - गर्वापर-पर्यायोऽभिमानः, अपि भग्नोऽभूत्।

**सारः** - रामः यदा शिवधनुषः भङ्गेन स्वस्य बलं प्रकटितवान्, तदा अन्यान्यपि कार्याणि युगपत् साधितानि। तेन यदा धनुषि गुणः आरोपितः, तदैव तस्य शौर्येण तद्वंशस्य महिमा अपि महतीं प्रतिष्ठां प्राप। यदा सः बलेन धनुः कृष्टवान्, तदैव अतिवेगेन सीतायाः अन्तकरणमपि आकृष्टवान्। यदा रामस्य बलं सोढुम् अशक्तं शिवधनुः भग्नं, तदैव तत् चापं उन्नेतुमपि अशक्तानां क्षत्त्रियाणां निजभुजबलस्य विषये दर्पः अपि भग्नः।

**पद्यम्**

**रामाकर्षणभग्नकार्मुकभुवा ध्वानेन रोदोरुधा**
**दृप्तक्षत्रयशःसितच्छदकुले जीमूतनादायितम्।**
**वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं**
**सीतायाः किल मानसे परिणये माङ्गल्यतूर्यायितम्॥ १०४॥**

**अन्वयः** - रामाकर्षणभग्नकार्मुकभुवा रोदोरुधा ध्वानेन दृप्तक्षत्रयशः-

सितच्छदकुले जीमूतनादायित्तम् वीरश्रीप्रथमप्रवेशसमये पुण्याहुघोषायितं किल सीतायाः मानसे परिणये माङ्गल्यतुर्यायितम्।

धनुर्भङ्गात् जनितस्य नादस्य वर्णनम्

**अन्वयार्थः** - रामस्य - श्रीरामचन्द्रस्य, कर्षणेन - धनुषः आकर्षणस्य कर्मणा, भग्नं - विदलितं, यत् कार्मुकं - धनुः, तस्माद् भवतीति तथोक्तेन, रोदसी - द्यावाभूमि, रुणद्धि - आवृणोतीति रोदोरुधा, सर्वव्यापकेनेत्यर्थः, ध्वानेन - ध्वनिना, दृप्ताः- गर्वोन्मत्ताः, ये क्षत्राः = क्षत्रियाः, तेषां यश एव सितच्छदकुलम् - हंसश्रेणिः, तस्य विषये, जीमूतस्य - मेघस्य, नादेनेवाचरितं जीमूतनादायितम्। वीरस्य - शूरस्य, श्रियः - लक्ष्म्याः, प्रथमप्रवेशसमये - प्रथमप्रवेशकाले, पुण्याहघोषेण - पुण्याहवाचनशब्देन, इवाचरितम् - अनुष्ठितम्, मङ्गलजनकध्वनित्वं गतमित्यर्थः। तथा सीतायाः - जानक्याः, किल - निश्चयेन, मानसे - मनसि प्रवर्तमाने, परिणये - विवाहसंस्कार-विषये, माङ्गल्यतूर्येण - माङ्गल्यार्थः यः तूर्यध्वनिः, तेनेव आचरितं माङ्गल्यतूर्यायितम्।

**सारः** - श्रीरामस्य बलवत्कर्षणेन शिवधनुः भग्नम्। तस्य विदारणेन जनितः नादः नभोमण्डलं भूमण्डलं च व्याप्नोत्। सः नादः निजबलेन गर्वितानां क्षत्त्रियाणां कीर्तिरूपस्य श्वेतहंससमूहस्य मेघनिर्घोषः इव आसीत् (जीमूतनादेन भीताः हंसाः पलायन्ते)। वीरलक्ष्म्याः आदिमप्रवेशकाले स्वस्तिवाचनम् इव आसीत्। सीतायाः मनसि विवाहस्य मङ्गलनाद इव (इति - अपि )स नादः बभूव।

**पद्यम्**

**नवः कठिनकर्षणत्रुटितचापजन्मा क्षणा-**
**द्दिशां द्विरदघीङ्कृतैः कृतहरित्पतिस्वागतः।**
**जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-**
**प्रयाणपटहध्वनिं प्रथयति स्म तारध्वनिः॥ १०५॥**

त्रुटितचाप-
ध्वनिः सर्वत्र प्रसारितः

**अन्वयः** - कठिणकर्षणत्रुटितचापजन्मा क्षणात् दिशां द्विरदधीङ्कृतैः कृत-हरित्पतिस्वागतः नवः तारध्वनिः जगभ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-प्रयाणपटहध्वनिं प्रथयति स्म।

**अन्वयार्थः** - कठिनकर्षणत्रुटितचापजन्मा - दृढाकर्षणभग्नचाप - सम्भूतः(ध्वनिः), क्षणात् - अतिशीघ्रम्, दिशाम् - आशानाम्, द्विरदधीकृतैः - दिग्गजानां धीङ्कारशब्दैः, (भयजनितैः शब्दः इत्यर्थः), कृतः - विहितः, हरित्पतिस्वागतः - दिगीश्वरकर्तृकस्वागतप्रश्नः, अत्यन्तवेगेन दिगन्त-व्यापीत्यर्थः। नवः - अभूतपूर्वी नवीनः, तारध्वनिः - उच्चध्वनिः, जगद्भ्रमण-कौतुकसञ्चारकौतूहलाद् हेतोः - विश्वे सर्वत्र सञ्चरितुं कौतुहलात्, उच्चलिता - प्रवृत्ता, रामस्य कीर्तिः - यशः, एवाङ्गनेति रूपकम्, तस्याः प्रयाणे - प्रस्थानकाले, यः पटहध्वनिः - तूर्यघोषः, तम्, प्रथयति स्म - प्रकटयति स्म।

**सारः** - रामस्य दृढाकर्षणेन भग्नात् शिवधनुषः अभूतपूर्वः उच्चः शब्दः उत्पन्नः। तच्छ्रुत्वा अतिशीघ्रं भयेन दिग्गजाः धीङ्कारं कृतवन्तः। सः नादः विश्वे सर्वत्र सञ्चरितुं कौतूहलात् प्रस्थितायाः श्रीरामस्य यशः यात्रारम्भे तूर्यघोषः इव आसीत्। दिग्गजानां धीङ्कारश्च दिगीश्वरकृतस्य स्वागतस्य ध्वनिः इव आसीत्।

**गद्यम्**

**तत्र दशरथः सीतापरिणयकृतनिश्चयजनकप्रहितदूताहूतः पुरोहिताभ्युपग-मान्मिथिलामुपागमत्।**

जनकः दशरथं
आहूतवान्

**व्याख्या** - तत्र - तस्मिन् काले , जनकः - सीतायाः परिणयाय रामेण सह विवाहाय कृतः निश्चयः - येन तेन -प्रहितः - प्रेषितः, यो दूतस्तेन आहूतः - पुरोहिताभ्युपगमात् - पुरोहितस्य वसिष्ठस्य अभ्युपगमात् अङ्गीकारात् मिथिलाम् उपागमत् आगतः।

**सारः** - जनकः सीतारामयोः विवाहं कर्तुं निश्चित्य दशरथम् आह्वातुं दूतान् प्रेषयामास। दशरथः कुलगुरोः वसिष्ठस्य अनुज्ञया मिथिलां प्राप्तः।

**पद्यम्**

**यत्कीर्तिस्तिलकायते सुरवधूसङ्गीतगोष्ठीमुखे**
**येनाद्यः पितृमान्पुमान्वसुमती येनैव राजन्वती।**
**इन्द्रः सङ्गरसङ्कटेषु विजहौ वीरस्य यस्योन्मुख-**
**प्रेङ्खत्स्यन्दनकेतनाम्बरदशासन्दर्शनाद्दुर्दशाम्॥ १०६॥**

दशरथ वर्णनम्

**अन्वयः** - यत्कीर्तिः सुरवधूसङ्गीतगोष्ठीमुखे पितृमान् तिलकायते, येन आद्यः पुमान् पितृमान् येनैव वसुमती राजन्वती, यस्य वीरस्य उन्मुखप्रेङ्खत्स्यन्दनकेतनाम्बरदशासन्दर्शनात् इन्द्रः सङ्गरसङ्कटेषु दुर्दशां विजहौ।

**व्याख्या** - यस्य - राज्ञो दशरथस्य, कीर्तिः - यशः, सुराणाम् - देवानाम्, वध्वः - पत्न्यः, तासां सङ्गतस्य - गायनस्य, गोष्ठ्याः - सभायाः, मुखे - प्रारम्भे, तिलकायते - तिलकबिन्दुः इव आचरति, येन - राज्ञा दशरथेन, आद्यः - प्रथमः, पुमान् - पुरुषो भगवान् विष्णुः, पितृमान् - यस्याद्यः पुरुषो भगवान् विष्णुरपि पुत्रतां गतः, वसुमती धरित्री, येनैव राज्ञा दशरथेन, राजन्वती - सुराजशालिनी भवति, यस्य - प्रख्याततमस्य अयोध्याधिपतेः, वीरस्य - योद्धुः दशरथस्य, उन्मुखम् - अभिमुखम्, यथा स्यात् तथा, प्रेङ्खन्त्यः - वायुवशाच्चलन्त्यः, याः, स्यन्दनकेतनाम्बरदशाः - रथध्वज-पताकाचलनानि, सन्दर्शनात् - अवलोकनात्, इन्द्रः परमैश्वर्यशाली देवेन्द्रः, सङ्गरसङ्कटेषु देवासुरसङ्ग्रामसम्मर्देषु, दुर्दशाम् - दुरवस्थाम्. विजहौ - तत्याज। सोऽयं राजा दशरथः मिथिलामगमत् इति पूर्वेणान्वयः।

**सारः** - स्वर्गे देवानां पत्नीनां गानसभासु दशरथस्य यशोगीतानि एव आदौ गीयन्ते। आदिपुरुषस्य नारायणस्यापि पितृभूतः अयम्। सत्स्वपि बहुषु राजसु, दशरथस्य कारणेनैव भूमिः "राजन्वती" (सुराजयुक्ता) इति

कथ्यते। देवासुरसमरेषु दुरवस्थायाम् इन्द्रः साहाय्यार्थमागच्छतः पराक्रमिणः दशरथस्य रथध्वजानां दर्शनेन सन्तुष्टो भवति।

**पद्यम्**

**जनकः स्वकनीयांसमाजुहाव कुशध्वजम्।**
**हत्वा युधि सुधन्वानं साङ्काश्ये स्थापितं पुरे॥ १०७॥**

**अन्वयः** - जनकः सुधन्वानं युधि हत्वा साङ्काश्ये पुरे स्थापितं स्वकनीयांसं कुशध्वजम् आजुहाव।

जनकः कुशध्वजं आह्वायति

**अन्वयार्थः** - जनकः - मिथिलापतिः, सुधन्वानं - सुधन्वनामकं राजानम्, युधि - युद्धे, हत्वा - व्यापाद्य, साङ्काश्ये पुरे - साङ्कश्ये नाम्नि सुधन्वनगरे, स्थापितं - प्रतिष्ठितम्, स्वकनीयांसं - स्वानुजम्, कुशध्वजम् (दूतमुखेन)आजुहाव- आहूतवान्।

**सारः** - सुधन्वनामकं राजानं युद्धे मारयित्वा साङ्काश्यनगरे प्रतिष्ठापितं स्वस्य अनुजं कुशध्वजं जनकः मिथिलां प्रति आहूतवान्।

**गद्यम्**

**तदनु ताभ्यामभ्यर्चितः सपुरोहितो दशरथस्तत्र पुत्राणां गोदानमङ्गलं निर्वर्तयामास।**

**व्याख्या** - तदनु - कुशध्वजागमनानन्तरं, ताभ्याम् - जनककुशध्वजाभ्यां, अभ्यर्चितः - विधिवत् पूजितः, सपुरोहितः - वसिष्ठसहितः, दशरथः, तत्र - तस्मिन्, पुत्राणां - रामादिपुत्रचतुष्टयस्य, गोदानमङ्गलं - विवाहात्प्राक् करणीयं केशान्ताख्यं कर्म, निर्वर्तयामास - कृतवान्।

**सारः** - जनककुशध्वजाभ्यां सत्कृतः वसिष्ठसहितः दशरथः विवाह - दीक्षाङ्गतया पुत्राणां केशान्ताख्यं कर्म कृतवान्।

**पद्यम्**

सीतारामयोः परिणयः

**जग्राह जनकात्सीतां तातादेशेन राघवः।**

**आम्नायशासनेनार्चां यजमानादिवानलः॥ १०८॥**

**अन्वयः** - अनलः आम्नायशासनेन यजमानात् अर्चाम् इव राघवः तातादेशेन जनकात् सीतां जग्राह।

**अन्वयार्थः** - राघवः - श्रीरामचन्द्रः, तातादेशेन - तातस्य पितुर्दशरथस्य आदेशेन - आज्ञया, जनकात् - जनकमहाराजात्, सीतां - तदभिधानां तस्य पुत्रींम्, आम्नायशासनेन - वेदवचनेन, यजमानात् - यजनशीलात्, अर्चाम् - होमादिसत्क्रियां, अनलः इव - अग्निः इव,- जग्राह - गृह्णाति।

**सारः** - यथा अग्निः वेदवचनेन आज्ञया यजनकर्तुः यजनशीलात् होमादिसत्क्रियां स्वीकरोति, तथा श्रीरामः पितुः दशरथस्य अनुज्ञया जनकमहाराजात् सीतां गृहीतवान्। (परिणीतवान् इत्यर्थः)

**पद्यम्**

**आश्चर्यमेतत्।**

ऊर्मिलालक्ष्मणयोः परिणयः

**गुणमनिमिषचापे कश्चिदारोप्य सीतां**
**कुशिकतनयवाक्यादग्रहीद्रामभद्रः।**
**तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्ते**
**निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोऽपि॥ १०९॥**

**अन्वयः** - रामभद्रः अनिमिषचापे कश्चिद् गुणम् आरोप्य कुशिकतनय-वाक्यात् सीताम् अग्रहीत्, तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्ते निहितबहुगुणः सन् लक्ष्मणोऽपि ऊमिलाम् अग्रहीत्।

**व्याख्या** - रामभद्रः - श्रीरामचन्द्रः, लोककल्याणकारित्वादेव - श्रीरामेण सह भद्रशब्दस्यान्वयः, अनिमिषाणाम् - देवानाम्, चापे - धनुषि, कञ्चित् - एकम्, गुणम् - प्रत्यञ्चरूपम्, आरोप्य - योजयित्वा, कुशिकतनयस्य - विश्वामित्रस्य, वाक्यात् - आदेशात्, सीताम् - जानकीम्, मिथिलाधिपतेः पुत्रीम्, अग्रहीत् - पत्नीरूपेण स्वीकृतवान्, तदनु - तत्पश्चात्, तदनु -

श्रीरामस्य पश्चात्, जन्म - उत्पत्तिर्यस्याऽसौ श्रीरामानुजो लक्ष्मणः, मैथिलेन्द्रस्य - मिथिलाधिपतेर्जनकस्य, चित्ते - अन्तःकरणे, निहितः - स्थापितः, बहवः - अनेके, सौशील्य-सौहार्द-शौर्य-वीर्य पराक्रमादिकाः गुणाः - (सद्गुणाः), येनाऽसौ - तथाभूतः, लक्ष्मणोऽपि - एतन्नाम श्रीरामानुजोऽपि, ऊर्मिलाम् - एतन्नाम्नीं कन्याम्, पत्नीरूपेणाग्रहीत् इत्याश्चर्यमेतत्।

**सारः** - श्रीरामः विश्वामित्रस्य वचनात् मूर्ते दिव्यधनुषि एकां मौर्वीं निक्षिप्य सीतां परिणीतवान्। ततः तस्य अनुजः लक्ष्मणः तु अमूर्ते जनकस्य हृदये बहून् गुणान् (विद्याविनयादीन्) निक्षिप्य तस्य अपरां सुताम् ऊर्मिलां परिणीतवान्।

**पद्यम्**

**ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः।**
**माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ॥ ११०॥**

भरतशत्रुघ्नौ माण्डवी श्रुतकीर्तिभ्यां गृहस्थौ जातौ

**अन्वयः** - ततः कुशध्वजनियोगतः भरतशत्रुघ्नौ माण्डवीश्रुतकीर्तिभ्यां गृहमेधिनौ अभूताम्।

**अन्वयार्थः** - ततः - श्रीरामलक्ष्मणयोः सीतोर्मिलाभ्यां सह विवाहे सम्पन्ने सति, कुशध्वजस्य - जनकानुजस्य, नियोगतः - निदेशात्, भरतशत्रुघ्नौ - एतन्नामकौ रामानुजौ, माण्डवीश्रुतकीर्तिभ्याम् - एतन्नाम्नीभ्यां कुशध्वजसुताभ्यां सह, गृहमेधिनौ - गृहैः- दारैः, मेधेते - सङ्गच्छेते, इति गृहमेधिनी - गृहस्थौ, अभूताम्। तत्र माण्डवी भरतस्य पत्न्यभूत्। श्रुतकीतिश्च शत्रुघ्नस्य धर्मपत्न्यभवत्।

सारः - तदनन्तरं भरतशत्रुघ्नौ जनकानुजस्य कुशध्वजस्य निर्देशात् तत्पुत्र्यौ माण्डवी-श्रुतकीर्त्याख्ये कन्यके परिणीय गृहस्थौ अभूताम्।

## Summarised Overview

विश्वामित्रः रामलक्ष्मणाभ्यां सह मिथिलायाः समीपे जनकस्य यजभवनं प्राप्तवान्। तत्र जनकस्य कुलपुरोहितः शतानन्दः कौशिकस्य कथां रामलक्ष्मणाभ्यां कथयितुं आरब्धवान्। क्षत्रियः कौशिकः वसिष्ठाश्रमं गत्वा तत्र वसिष्ठमहर्षेः अभूतपूर्वं आतिथ्यं सम्प्राप्य तदातिथ्यं तस्य आश्रमे वसन्त्यः कामधेन्वाः प्रभावेण इति विज्ञाय कामधेनुं प्राप्तुम् इच्छति। वसिष्ठेन निराकृतः, बलेन कामधेनुं हृष्ट्वा तया एव सः पराभवं प्राप्नोति। कामूधेनुः तदा बहून् योद्धान् सृजति। तैः पराजितः कौशिकः। तत् श्लोकरूपेण कविना कथ्यते। ततः कान्तिशीकः कौशिकः परमेश्वरं उद्दिश्य तपश्चर्यया बहूनि दिव्यास्त्राणि प्राप्नोति। पुनश्च योद्धुं वसिष्ठाश्रमं आगच्छति। किन्तु वसिष्ठः ब्रह्मदण्डबलेन कौशिकस्य सर्वाणि आयुधानि नाशयति। ततः कौशिकः ब्रह्मबलः एव महाबलः इति निश्चित्य तपः कर्तुं आरब्धवान्। ब्रह्मबलसिद्ध्यर्थं दक्षिणस्यां दिशि तपः कर्तुं आरब्धवान्। तत्र सूर्यवंशस्य राजा सशरीरं स्वर्गं प्राप्तुं इच्छन् कुलगुरुं वसिष्ठं प्रार्थयते। वसिष्ठेन निराकृतः। स राजा वसिष्ठस्य पुत्रान् बलेन निर्बद्धाति। तदा कुपिताः ते वसिष्ठपुत्राः त्रिशङ्कुं चण्डालत्वेन शपन्ति। तदा दुःखितः त्रिशङ्कुः रक्षणार्थं विश्वामित्रस्य समीपं आगच्छति। विश्वामित्रः तस्य मनोरथपूर्त्यर्थं यज्ञमेकं आरभते। तत्र सर्वेषु ब्राह्मणेषु समागतेषु वसिष्ठपुत्राः नागताः। ततः तान् श्वभक्षकत्वेन शप्त्वा तदा स्वस्य तपोबलेन त्रिशङ्कुं स्वर्गं प्रेषयति। किन्तु इन्द्रेण सः अधः पातितः। विश्वामित्रस्य आज्ञाबलेन मध्यगगने प्रतिष्ठां लभते। क्रुद्धः विश्वामित्रः नूतनलोकनिर्माणं आरभते। भीताः सर्वे देवाः आगत्य तम् सान्त्वयित्वा त्रिशङ्कोः तस्मिन् एव स्थले स्वर्गसुखप्राप्तिः भवतु इति उक्त्वा गच्छन्ति। ततः पश्चिमस्यां दिशिं पुष्करक्षेत्रे तपश्चरितुं आरभते। तत्र विश्वामित्रः अम्बरीषस्य यज्ञे नरपशुत्वं प्राप्य शुनःशेपं ऱक्षितवान्। तदनन्तरं मेनकया सह कञ्चित् कालं यापयित्वा पुनः तपः कर्तुं आरब्धवान्। तपोभङ्गार्थं प्राप्तां रम्भां शप्त्वा पूर्वस्यां दिशीं अत्युग्रं तपः आचर्य वसिष्ठनिर्देशात् ब्रह्मर्षिपदं प्राप्तवान्। जनकस्य यागभवने रात्रिं यापयामास। प्रातःकाले सूर्याय अर्घ्यप्रदानं दत्वा मिथिलानगरीं प्रविशति। तत्र भोजः एवं वर्णितवान् 'रामलक्ष्मणयोः दर्शनकौतुकेन सर्वाः पौरस्त्रियः तत्र समागताः' इति। मिथिलां प्रविष्टः विश्वामित्रः मिथिलायाः माहात्म्यं वर्णयति। यदा जनकः यज्ञं समारब्धवान् तत्र भूदेवी सीता नाम्नीं पुत्रीं जनयामास

इति उक्तवान्। विश्वामित्रः रामलक्ष्मणाभ्यां सह जनकस्य आस्थानम् आगत्य शिवधनुषः विषये जनकात् सर्वाणि कार्याणि श्रृण्वन्ति। ततः विश्वामित्रः धनुरारोपणाय रामं आदिशति। रामेण शिवधनुषः भङ्गं क्रियते। धनुर्भङ्गात् जनितः नादः महान् आसीत्। जनकः दशरथं आनेतुं दूतान् प्रेषयति। तैः आहूतः दशरथः मिथिलां प्रत्यागच्छति। तत्र दशरथस्य वर्णनं करोति कविः। जनकस्य अनुजः कुशध्वजः अपि तेन आहूतः सन् तत्र आगच्छति। रामलक्ष्मणभरतशत्रुघ्नाभ्यां विवाहः सम्पद्यते। तत् भोजेन मालिनीवृत्तद्वारा मनोहरया रीत्या वर्णितम्।

## Assignments

1. चम्पूरामायणे बालकाण्डे सीतास्वयंवरं संक्षिप्य वर्णयत।
2. कौशिकः किमर्थं कान्दिशीकः अभूत्?
3. त्रिशङ्कोः स्वर्गारोहणं विवृणुत।
4. शुनःशेपस्य वृत्तान्तं विशदयत।
5. कौशिकस्य ब्रह्मर्षिपदप्राप्तिः कथं अभूत्?
6. मिथिलानगरीं वर्णयत।
7. रामस्य शिवधनुषः भङ्गं वर्णयत।
8. शिवधनुषः भङ्गात् जनितः नादः कीदृशः आसीत्?
9. गुणमनिमिषचापे कञ्चिदारोप्य सीतां
   कुशिकतनयवाक्यादग्रहीद्रामभद्रः।
   तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्ते
   निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोऽपि॥ ससन्दर्भं व्याख्यात।
10. ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः।
    माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ॥ ससन्दर्भं व्याख्यात।

11. यत्कीर्तिस्तिलकायते सुरवधूसङ्गीतगोष्ठीमुखे

येनाद्यः पितृमान्पुमान्वसुमती येनैव राजन्वती।

इन्द्रः सङ्गरसङ्कटेषु विजहौ वीरस्य यस्योन्मुख-

प्रेङ्खत्स्यन्दनकेतनाम्बरदशासन्दर्शनाद्दुर्दशाम्॥ ससन्दर्भं व्याख्यात।

## Suggested Readings


1. Ramayanacampu of Bhoja, with Ramacnadra's commentary, Nirnaya Sagar Press Mumbai.
2. Ramayanacampu of Bhoja, edited by Vasudeva Laxman sastri pansikar, Pandurang Jawaji, Nirnaya Sagar Press Mumbay. 1933


## References


1. Ramayanacampu of Bhoja, with Ramanathatripady sastri's commentary, Chowkhamba Krishnadas academy, Varanasi, 2016
2. Ramayanacampu of Bhoja, with Ramachandra Budhendra's commentary, Javaji Dadaji's Nirnaya Sagar Press, Bombay, 1898


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that

1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

Model Question Paper (SET – A)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**SECOND SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 6 - M23SN06DC - गद्यं चम्पू च**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. गद्यस्य लक्षणं किम्? तस्य भेदौ कौ?
2. लक्ष्म्याः वर्तमानाः दोषाः के?
3. किं नाम गुरूपदेशः? तस्य प्राधान्यं किम्?
4. आयोध्यायां विश्वामित्रस्य आगमनं किमर्थमासीत्?
5. कीदृशः कुशिकसुतमद्राक्षीत्?
6. कुशनाभस्य कन्यकाः प्रकृतिस्थाः बभूवुः। कथम्?
7. पार्वत्याः शापः कः?
8. गद्यसाहित्यस्य विशेषताः काः?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page)**

9. दण्डिनः दशकुमारचरितमधिकृत्य लिखत।

10. 'महतीयं खल्वनर्थपरम्परा'- व्याख्यात।

11. वाणीविलासमपरत्र कृतोपलम्भम् अम्भोजभूरसहमान इवाविरासीत्।

आभाति यत्कृतिरनेकविधप्रपञ्चव्याजेन्द्रजालविधिसाधकपिञ्छिकेव॥ व्याख्यात।

12. उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि।

निर्दग्धुं निखिलाः पलाशसमिधौ मेध्यादयोध्यारणेः आविर्भूतमभूतपूर्वमपरं यत्किञ्चिदेकं महः॥ - ससन्दर्भं व्याख्यात।

13. पिप्पलदण्डयोग्यः पलाशदण्डादृतपाणिरासीत् - व्याख्यात।

14. मेल्पुत्तूर्नारायणभट्टमधिकृत्य टिप्पणीं लिखत।

15. कुशनाभपुत्रीणां कथां विवृणुत।

16. स पुत्रीयन्सपत्नीकस्तपस्तेपे समाः शतम्।
भृगुः प्रीतमनास्तस्मै ददौ दायादसम्पदम्॥ ससन्दर्भं विशदयत।

17. विशालनगर्याः उत्पत्तिः प्रतिपादयत।

18. 'गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला' - व्याख्यात।

## SECTION – C
### (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. गद्यसाहित्योद्भवो विकासश्च प्रतिपादयत।

20. शुकनासकृतं लक्ष्मीविगर्हणं विशदयत।

21. सीताविवाहोदन्तमुपपादयत।

22. चम्पूरामायणमाश्रित्य ताटकावृत्तान्तं प्रतिपादयत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No..................** **QP CODE........................**

**Name......................**

**SECOND SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 6 - M23SN06DC - गद्यं चम्पू च।**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section - A
**(प्रथमो भागः)**

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**
**(Answer any five Questions in a paragraph)**

1. अनन्तभट्टस्य भारतचम्पूमधिकृत्य लघुटिप्पणीं लिखत।
2. विवेकरहितानां राज्ञां स्वभावान् वर्णयत।
3. नलचम्प्वोः टीकाः काः?
4. विश्वामित्रः रामलक्ष्मणौ किं उपदिशति?
5. सहस्रभानुरपि सङ्कुचितभानुरेव तत्सानूनि नूनं संश्रयते। कथम्?
6. विश्वामित्रः किम् अमनुत?
7. पवमानः किम् अतनुत?
8. लक्ष्मीमदः दारुणः भवति। कुतः?

## SECTION - B
**(द्वितीयो भागः)**

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any six Questions in a page )**

9. बाणभट्टस्य कृतयः काः? विशदयत।

10. विरला हि तेषामुपदेष्टारः - व्याख्यात।

11. पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति-व्याख्यात।

12. बाणभट्टस्य हर्षचरितमधिकृत्य टिप्पणीं लिखत।

13. सुबाहुमारीचयोः वधं कीदृशमासीत्?

14. ताटकायाः वर्णनं कुरुत।

15. गङ्गायाः त्रैविध्यं विशदयत।

16. 'किं वा तेषां साम्प्रतं,येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्' - आशयं विशदयत।

17. कौशिकस्य ब्रह्मर्षिपदप्राप्तिः कथं अभूत्?

18. दुःखे सुखे च रज एव बभूव हेतुः तादृग्विधे महति गौतमधर्मपत्न्याः।
यस्माद्गुणेन रजसा विकृतिं गता सा रामस्य पादरजसा प्रकृतिं प्रपेदे॥ ससन्दर्भं व्याख्यात।

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. भोजस्य चम्पूरामायणस्य शास्त्रीयमध्ययनं कुरुत।

20. लक्ष्म्याः स्वभाववैशिष्ट्यान् शुकनासोक्तदिशा संगृह्य लिखत।

21. विश्वामित्रकथां यथाग्रन्थमुपपादयत।

22. चम्पूरामायणमाश्रित्य रामजन्मवृत्तान्तं प्रतिपादयत।

SGOU

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

गद्यं चम्पू च

COURSE CODE: M23SN06DC

SGOU

ISBN 978-81-971228-9-7

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841